# जैनदार्शनिकप्रकरणसङ्ग्रहः-२

(चतुश्चत्वारिंशत्प्रकरणात्मकः)

लालभाई दलपतभाई संस्कृति विद्यामंदिर

श्रुतभवन संशोधन केंद्र

**ग्रंथनाम:** जैनदार्शनिकप्रकरणसङ्ग्रहः-२
**कर्ता:** विविधजैनविद्वान्
**विषय:** जैनन्याय
**भाषा:** संस्कृत
**प्रबंध संपादक:** मुनिवैराग्यरतिविजयगणी
**प्रकाशक:** लालभाई दलपतभाई संस्कृति विद्यामंदिर, श्रुतभवन संशोधन केन्द्र
**आवृत्ति:** प्रथम, वि.सं.२०७१ (ई.२०१५)
**पत्र:???**

**लाभार्थी:**

**प्राप्तिस्थल:**
लालभाई दलपतभाई संस्कृति विद्यामंदिर,
गुजरात युनिवर्सिटी बस स्टँड के पास,
अमदाबाद-३८०००९
फो.०७९-२६३०२४६३
इ-मेल-i.dindologyorg@gmail.com

श्रुतभवन संशोधन केन्द्र,
४७/४८ अचल फार्म,
सच्चाइ माता मंदिर के आगे,
कात्रज, पुणे-४६
मो. ०७७४४००५७२८ (९.०० से ५.००) गुरुवार बंद
इ-मेल- shrutbhavan@gmail.com
वेबसाईट- www.shrutbhavan.org

श्रुतभवन संशोधन केन्द्र, (अमदाबाद शाखा)
उमंग शाह
अर्हम् फ्लेक्सीपेक,
२०१,तीर्थराज कोम्प्लेक्स, एलीसब्रीज,
कर्णावती, अमदावाद-६
मो. ०९८२५१२८४८६

# प्रकाशकीय

जैनदार्शनिकप्रकरणसङ्ग्रहः -२ इस अप्रगट कृति को श्री संघ के समक्ष प्रस्तुत करते हुए हमें अतीव हर्षानुभूति हो रही है। जैन दार्शनिक पृष्ठभूमि को अन्य दर्शनों के आलोक में समझने के लिये ये प्रकरण अत्यंत उपयोगी है। यह संग्रह तत्कालीन दार्शनिक प्रवाहों के विषय में श्रमणसंघ की जागृति का उत्तम उदाहरण है।

श्रुतभवन संशोधन केन्द्र के सन्निष्ठ समर्पित सहकारिगण की कडी महेनत और लगन से यह दुर्गम कार्य सम्पन्न हुआ है। इस अवसर पर श्रुतभवन संशोधन केन्द्र के संशोधन प्रकल्प हेतु गुप्तदान करने वाले दाता एवं श्रुतभवन संशोधन केन्द्र के साथ प्रत्यक्ष-अप्रत्यक्ष रूप से जुडे हुए सभी महानुभावों का हार्दिक अभिनन्दन करते है। इस ग्रन्थ के प्रकाशन का अलभ्यलाभ ........................ने प्राप्त किया है। आपकी अनुमोदनीय श्रुतभक्ति के लिये हम आपके आभारी है।

**कृतज्ञता**

श्रुतभवन संशोधन केन्द्र के उपक्रम में शास्त्र संशोधन का विराट प्रकल्प प्रवर्तमान है। इस प्रकल्प में दो कार्य होते है।

१) अद्यावधि अमुद्रित शास्त्र का सम्पादन एवं प्रकाशन।

२) मुद्रित शास्त्र का समीक्षित पुनःसम्पादन।

इस कार्य में हमें गच्छाधिपति पदारूढ आदि आचार्यभगवंतों के प्रेरणा और आशीर्वाद प्राप्त हुए है।(नाम लिखो)

परम पूज्य आचार्यदेव श्रीमद् विजय पुण्यपालसूरीश्वरजी म.सा.,

परम पूज्य आचार्यदेव श्रीमद् विजयप्रेमसूरीश्वरजी म.सा.,

परम पूज्य आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म.सा.,

परम पूज्य आचार्यदेव श्रीमद् विजयधर्मधुरन्धरसूरीश्वरजी म.सा.,

परम पूज्य आचार्यदेव श्रीमद् विजयनित्यानन्दसूरीश्वरजी म.सा.,(वल्लभसू.)

परम पूज्य आचार्यदेव श्रीमद् विजयजयघोषसूरीश्वरजी म.सा.,

परम पूज्य आचार्यदेव श्रीमद् दोलतसागरसूरीश्वरजी म.सा.,

परम पूज्य आचार्यदेव श्रीमद् विजय राजयशसूरीश्वरजी म.सा.,

परम पूज्य आचार्यदेव श्रीमद् कलाप्रभसागरसूरीश्वरजी म.सा.,(अंचलगच्छ)

परम पूज्य आचार्यदेव श्रीमद् विजयसूर्योदयसूरीश्वरजी म.सा.,(धर्मसू.)

परम पूज्य आचार्यदेव श्रीमद् विजय कीर्तिसेनसूरीश्वरजी म.सा.,(मोहनलालजीम.)

परम पूज्य आचार्यदेव श्रीमद् मनोहरकीर्तिसागर सूरीश्वरजी म.सा.,

परम पूज्य आचार्यदेव श्रीमद् विजयहेमप्रभसूरीश्वरजी म.सा.,(नीतिसू.

परम पूज्य आचार्यदेव श्रीमद् विजय अभयदेवसूरीश्वरजी म.सा.,डहेलावाळा

परम पूज्य आचार्यदेव श्रीमद् विजय प्रद्युम्नसूरीश्वरजी म.सा.,(नेमिसू.)

परम पूज्य आचार्यदेव श्रीमद् विजयसोमचन्द्र सूरीश्वरजी म.सा.,

परम पूज्य आचार्यदेव श्रीमद् प्रद्युम्नविमलसूरीश्वरजी म.सा.(विमलगच्छ),

परम पूज्य उपाध्यायश्री मणिप्रभसागरजी म.सा(खरतरगच्छ)

**हमारे कार्य को शुद्ध और सटीक करने के लिये हमारा निरंतर मार्गदर्शन करते है-**

परम पूज्य आचार्यदेव श्रीमद् विजय मुनिचन्द्रसूरीश्वरजी म.सा.,

परम पूज्य आचार्यदेव श्रीमद् विजय शीलचन्द्रसूरीश्वरजी म.सा.,

परम पूज्य आचार्यदेव श्रीमद् विजय हेमचन्द्रसूरीश्वरजी म.सा.,

परम पूज्य उपाध्यायश्रीभुवनचन्द्रजी म.सा.,(पार्श्वचन्द्र गच्छ)

परम पूज्य पंन्यास प्रवरश्री अजयसागरजी म.सा.,

परम पूज्य पंन्यास प्रवरश्री पुण्डरीकरत्नविजयजी म.सा.

**हम उन संस्था एवं विद्वानों के भी आभारी है जो हमारा मार्गदर्शन और सहाय करते है-**

पू.आ.श्री कैलाससागरसू. ज्ञानमंदिर,श्री महावीर जैन आराधना केन्द्र, कोबा।

श्री लालभाई दलपतभाई भारतीय संस्कृति विद्यामंदिर अमदावाद।

भाण्डारकर प्राच्यविद्या संशोधन संस्थान,पुणे

पद्मश्री कुमारपाळ देसाइ, श्री जितेन्द्र बी.शाह,श्री बाबुभाइ सरेमलजी,श्री यतिन शाह पाटण,महेन्द्रकुमार भनशाली जोधपुर

# अनुक्रमः

सम्पादकीयम्
कृतिपरिचयः

**प्रथमः खण्डः- प्रमाणवादः**

१) प्रमाणलक्षणकण्टकोद्धारप्रकारः

२) सर्वार्थनिराकरणवादस्थलम् (श्रीरविप्रभसूरिकृतम्)

३) उपाधिप्रकरणम् (उदयनाचार्यकृतम्)

४) उपाधिप्रकरणविडम्बनम् (बाढेश्वरकृतम्)

५) उपाधिखण्डनम्

६) अनुमानदूषणानि

७) दशावयवानुमानम्

८) परहेतुतमोभास्करनामस्थलम्

९) सर्वानुमानोत्थापनस्थलम्

१०) ज्ञानस्य स्वप्रकाशकत्वसाधनम्

**द्वितीयः खण्डः ईश्वरवादः**

११) ईश्वरवादः

१२) ईश्वरनिराकरणवादः

१३) ईश्वरवादस्थलम्

१४) ईश्वरजगत्कर्तृत्वनिराकरणवादः

**तृतीयः खण्डः-सर्वज्ञवादः**

१५) सर्वज्ञवादस्थलम्

१६) सङ्क्षेपेण सर्वज्ञसिद्धिः

१७) सर्वज्ञव्यवस्थापनवादस्थलम्

**चतुर्थः खण्डः-जीववादः**

१८) जीवास्तिवादस्थलम्

१९) आत्मनित्यत्वसिद्धिः

२०) एकेन्द्रियाणां जीवत्वस्थापना

२१) सर्वव्याप्यात्मवादः
२२) सर्वगतात्मसिद्धिः

**पञ्चमः खण्डः-सङ्कीर्णवादः**

२३) विद्वज्जनालापः
२४) अपशब्दनिराकरणम्
२५) तमोवादः
२६) चक्षुर्द्वैतनिराकरणम्
२७) विप्रवक्त्रमुद्गरः
२८) सर्ववाक्यस्य सावधारणता
२९) जातिसिद्धिः
३०) सामान्यसिद्धिवादः
३१) शशविषाणादिदृष्टान्ते निषेधविचारः
३२) आकाशादीनां मूर्तत्वविचारः
३३) सामान्यविशेषविचारः
३४) बौद्धानां सम्प्रदायचतुष्टये बाह्यार्थविचारः
३५) शब्दाम्बरगुणत्वनिर्लोठनस्थलम्
३६) आख्यातार्थविचारः
३७) शब्दार्थसम्बन्धसाधनम्
३८) तुल्याधिकरणसमासविचारः
३९) कार्यकारणभावसम्बन्धसिद्धिः

**षष्ठः खण्डः -जैनवादः**

४०) वेदबाह्यतानिराकरणम् (हरिभद्रसूरिकृतम्)
४१) गणधरवादः
४२) केवलज्ञानसिद्धिः
४३) एकान्तनित्यानित्यवादभङ्गः
४४) परिणामनित्यतावादः

**परिशिष्टानि**

प्रथमं परिशिष्टम्–अकारादिक्रमेण वादसूचिः

द्वितीयं परिशिष्टम्–उद्धरणस्थलसङ्केतः

तृतीयं परिशिष्टम्–पारिभाषिकशब्दकोशः

चतुर्थं परिशिष्टम्–विशेषनामकोशः

पञ्चमं परिशिष्टम्–न्यायसूचिः

षष्ठं परिशिष्टम्–सङ्केतविवरणम्

## सम्पादकीयम्

सङ्ग्रहेऽस्मिन् वादात्मिकानां सप्तत्रिंशद्दार्शनिकलघुकृतीनां समुच्चयो वर्तते। तासां सम्पादने विविधाः हस्तलिखितप्रतय उपयुक्ताः।

१) तत्र प्रथमा पुण्यपत्तननगरस्य भाण्डारकरप्राच्यविद्यासंशोधनसंस्थाने वर्तते। (अस्याः क्रमाङ्कः १८८२-८३/०) कर्गदपत्रात्मिकाया अस्याः प्रतेः द्वात्रिंशत्पत्राणि सन्ति। प्रत्येकं पत्रं बाहल्येन[1] एकविंशत्यङ्गुलीयकमानम्[2],पृथुलत्वेन[3] च दशाङ्गुलीयकमानम्। प्रत्येकस्मिन् पत्रे एकोनविंशतयः पङ्क्तयः, प्रत्येकासु पङ्क्तिषु च षष्ठिः अक्षराणि सन्ति। देवनागरीलिपौ लिखितान्यक्षराणि स्पष्टान्यत एव सुवाच्यानि सन्ति। प्रतौ लेखनकालो नोल्लिखितः तथापि लेखनशैल्या वैक्रमीयं षोडशं शतकमनुमीयते। संस्थाकीयसूचिपत्रे एषा **प्रमाणप्रमेयकलिके**ति नाम्नाङ्किता। वस्तुतोऽत्र अष्टाविंशतीनां कृतीनां सङ्ग्रहो विद्यते, दिगम्बराचार्यश्रीनरेन्द्रसेनकृता प्रमाणप्रमेयकलिका तत्र प्रथमेति कृत्वा तत्र सा तन्नाम्नैवाङ्किता। सङ्ग्रहेऽस्मिन्नेतस्याः प्रतेः चतुर्विंशतिः कृतयः सम्पादिताः। प्रमाणप्रमेयकलिका, अग्निशीतत्वव्यवस्थापनवादस्थलम्, सर्वज्ञव्यवस्थापकस्थलम्, स्त्रीनिर्वाणसिद्धिश्चेत्येताः चत्वारः कृतयः प्रकाशितपूर्वा इत्यत्र तासां पुनरावर्तनं न कृतमिति ज्ञेयम्।

**सर्वार्थनिराकरणवादस्थलम्** (श्रीरविप्रभसूरिकृतम्) (अत्र द्वितीयम्)

**प्रमाणलक्षणकण्टकोद्धारप्रकारः**(अत्र प्रथमम्)

**विद्वज्जनालापः** (अत्र त्रयोविंशतितमम्)

**अपशब्दनिराकरणम्** (अत्र चतुर्विंशतितमम्)

**सर्वज्ञव्यवस्थापनवादस्थलम्** (अत्र सप्तदशम्)

**ईश्वरनिराकरणवादः** (अत्र द्वादशम्)

**सङ्क्षेपेण सर्वज्ञसिद्धिः** (अत्र षोडशम्)

**सर्वज्ञवादस्थलम्** (अत्र पञ्चदशम्)

**जीवास्तिवादस्थलम्** (अत्र अष्टादशम्)

**ईश्वरवादस्थलम्** (अत्र त्रयोदशम्)

**वेदबाह्यतानिराकरणम्** (हरिभद्रसूरिकृतम्) (अत्र चत्वारिंशत्तमम्)

**गणधरवादः** (अत्र एकचत्वारिंशत्तमम्)

**तमोवादः** (अत्र पञ्चविंशतितमम्)

**चक्षुर्द्वैतनिराकरणम्** (अत्र षड्विंशतितमम्)

**आत्मनित्यत्वसिद्धिः** (अत्र एकोनविंशतितमम्)

---

[1] लम्बाई

[2] अङ्गुलीयकम् = सेंटिमीटर इत्यस्मत्परिभाषा।

[3] चौडाई

**केवलज्ञानसिद्धिः** (अत्र द्विचत्वारिंशत्तमम्)

**विप्रवक्त्रमुद्गरः** (अत्र सप्तविंशतितमम्)

**सर्ववाक्यस्य सावधारणता** (अत्र अष्टाविंशतितमम्)

**जातिसिद्धिः** (अत्र एकोनत्रिंशत्तमम्)

**शशविषाणादिदृष्टान्ते निषेधविचारः** (अत्र एकत्रिंशत्तमम्)

**आकाशादीनां मूर्तत्वविचारः** (अत्र द्वात्रिंशत्तमम्)

**सामान्यविशेषविचारः** (अत्र त्रयस्त्रिंशत्तमम्)

**बौद्धानां सम्प्रदायचतुष्टये बाह्यार्थविचारः** (अत्र चतुःत्रिंशत्तमम्),

इत्येताः कृतयोऽत्र सङ्ग्रहे सन्ति।

अस्यां प्रतौ नैयायिकप्रमाणप्रमेयाभिधानं प्रकरणमपि लिखितमिति दृश्यते तत्तु अज्ञातकर्तृकस्य पञ्चदर्शनखण्डननाम्नः प्रकरणस्य प्रारम्भिकांशरूपं मुद्रितपूर्व[1]मित्यत्र न सम्पादितमिति ज्ञेयम्।

२) द्वितीया गौर्जरात्रे पत्तननगरस्याचार्यश्रीहेमचन्द्राचार्यज्ञानमन्दिरे वर्तते। (अस्याः क्रमाङ्कः- डा.-२०२/ ग्रन्थ-८८११) कर्गदपत्रात्मिकाया अस्याः प्रतेः चत्वार्येव पत्राणि सन्ति। मूलप्रतेरभावात् पत्रमानमस्या निर्देष्टुं दुःशकम्। प्रत्येकस्मिन् पत्रे एकविंशतयः पङ्क्तयः, प्रत्येकासु पङ्क्तिषु च द्वासप्ततिरक्षराणि सन्ति। देवनागरीलिपौ लिखितान्यक्षराणि स्पष्टान्यत एव सुवाच्यानि सन्ति। अस्या अपि लेखनकालो नावगम्यते।

**उपाधिखण्डनम्** (अत्र तृतीयम्),

**उपाधिप्रकरणविडम्बनम्** (अत्र चतुर्थम्),

**उपाधिप्रकरणञ्चेति** (अत्र पञ्चमम्) प्रकरणत्रयमत्रत्यं सङ्ग्रहेऽस्मिन् सम्पादितम्।

३) तृतीयापि गौर्जरात्रे पत्तननगरस्याचार्यश्रीहेमचन्द्राचार्यज्ञानमन्दिरे एव वर्तते। (अस्याः क्रमाङ्कः-डा.-१९१/७४१२) कर्गदपत्रात्मिकाया अस्याः प्रतेः त्रिण्येव पत्राणि सन्ति। मूलप्रतेरभावात् पत्रमानमस्या निर्देष्टुं दुःशकम्। प्रत्येकस्मिन् पत्रे सप्तदश पङ्क्तयः, प्रत्येकासु पङ्क्तिषु च एकसप्ततिरक्षराणि सन्ति। एतस्याः प्रतेः

**ईश्वरजगत्कर्तृत्वनिराकरणवाद** (अत्र चतुर्दशं)

**एकान्तनित्यानित्यवादभङ्गस्थलञ्चेति** (अत्र चतुःत्रयस्त्रिंशत्तम्) कृतिद्वयमत्र सम्पादितम्।

४) तुरीयापि गौर्जरात्रे पत्तननगरस्याचार्यश्रीहेमचन्द्राचार्यज्ञानमन्दिरे एव वर्तते। (अस्याः क्रमाङ्कः-डा.-२०२/८७९२) कर्गदपत्रात्मिकाया अस्याः प्रतेः षट् पत्राणि सन्ति। मूलप्रतेरभावात् पत्रमानमस्या निर्देष्टुं दुःशकम्। प्रत्येकस्मिन् पत्रे सप्तदश पङ्क्तयः, प्रत्येकासु पङ्क्तिषु च पञ्चाशदक्षराणि सन्ति। एतस्याः प्रतेः

**ईश्वरजगत्कर्तृत्वनिराकरणवादः** (अत्र चतुर्दशं)

**एकान्तनित्यानित्यवादभङ्गस्थल**ञ्चेति(अत्र चतुःत्रयस्त्रिंशत्तम्) कृतिद्वयमत्र सम्पादितम्।

अस्यां प्रतौ **सर्वव्याप्यात्मवादा**ख्या कृतिरेकाधिका वर्तते सात्र सम्पादिता (अत्र एकविंशतितमम्) ।

५) पञ्चमी पुण्यपत्तननगरस्य भाण्डारकरप्राच्यविद्यासंशोधनसंस्थाने वर्तते। (अस्याः क्रमाङ्कः १८९५-९८/५९५-२७) कर्गदपत्रात्मिकाया अस्याः प्रतेः द्वादश पत्राणि सन्ति। प्रत्येकं पत्रं बाहल्येन एकविंशत्यङ्गुलीयकमानम्,पृथुलत्वेन च दशाङ्गुलीयकमानम्। प्रत्येकस्मिन् पत्रे सप्तदश पङ्क्तयः, प्रत्येकासु पङ्क्तिषु च

[1] जैनदार्शनिकप्रकरणसङ्ग्रहः सं.-नगीन जे. शाह,प्रका.- ला.द.सं.विद्यामन्दिर। (ई.१९७३)

पञ्चपञ्चाशदक्षराणि सन्ति। आदिमपत्रस्यारम्भांशो जीर्णत्वादवाच्योऽस्याः। परमब्रह्मोत्थापननाम्नाङ्किताायामस्यां प्रतौ नव वादस्थलानि सन्ति। तेभ्योऽमुद्रितपूर्वाणि सप्त प्रकरणान्यत्र सम्पादितानि। तद्यथा-

**सर्वानुमानोत्थापनस्थलम्** (अत्र नवमम्),

**सर्वज्ञव्यवस्थापनवादस्थलम्** (अत्र सप्तदशम्),

**शब्दाम्बरगुणत्वनिर्लोठनस्थलम्** (अत्र पञ्चत्रिंशत्तमम्),

**एकेन्द्रियाणां जीवत्वस्थापना** (अत्र विंशतितमम्),

**परहेतुतमोभास्करनामस्थलम्** (अत्र अष्टमम्),

**दशावयवानुमानम्** (अत्र सप्तमम्),

**अनुमानदूषणानि** (अत्र षष्ठम्) इति।

शेषं प्रकरणद्वयं परमब्रह्मोत्थापन-अग्निशीतत्वव्यवस्थापकस्थलाख्यं जैनदार्शनिकप्रकरणसङ्ग्रहे[१] प्रकाशितपूर्वम्।

६) षष्ठी पुण्यपत्तननगरस्य भारतीयेतिहाससंशोधकमण्डले वर्तते। (अस्याः क्रमाङ्कः-४६०) कर्गदपत्रात्मिकाया अस्याः प्रतेः चत्वार्येव पत्राणि सन्ति। मूलप्रतेरभावात् पत्रमानमस्या निर्देष्टुं दुःशकम्। प्रत्येकस्मिन् पत्रे अष्टौ पङ्क्तयः, प्रत्येकासु पङ्क्तिषु च सप्तचत्वारिंशदक्षराणि सन्ति। एतस्याः प्रतेः **ईश्वरवादो**ऽत्र (अत्र दशमः) सम्पादितः।

७) सप्तमी मध्यप्रदेशस्थोज्जयिनी(उज्जैन)नगरस्याचार्यश्रीचन्द्रसागरसूरिज्ञानमन्दिरे वर्तते। (अस्याः क्रमाङ्कः-२२१०) प्रतिरेषा परमपूज्याचार्यदेवश्रीमद्-हर्षसागरसूरीश्वराणां प्रसादेन लब्धा। कर्गदपत्रात्मिकाया अस्याः प्रतेः द्वादशपत्राणि सन्ति। मूलप्रतेरभावात् पत्रमानमस्या निर्देष्टुं दुःशकम्। प्रत्येकस्मिन् पत्रे षोडश पङ्क्तयः, प्रत्येकासु पङ्क्तिषु च सप्तषष्ठ्यक्षराणि सन्ति। एतस्यां प्रतौ आहत्य त्रयोदश वादाः सन्ति। तत्र अन्तिमाः चत्वारो वादा दिगम्बरमतसमीक्षणरूपाः स्वातन्त्र्येणान्यत्र प्रकाशिष्यन्तेऽतोऽत्र शेषा नवैव सम्पादिताः। तद्यथा–

**अपशब्दनिराकरणम्** (अत्र पञ्चविंशतितमम्)

**सामान्यसिद्धिवादः** (अत्र त्रिंशत्तमम्)

**कार्यकारणभावसम्बन्धसिद्धिः** (अत्र एकोनचत्वारिंशत्तमम्) )

**आख्यातार्थविचारः** (अत्र षट्त्रिंशत्तमम्)

**परिणामनित्यतावादः** (अत्र चतुःचत्वारिंशत्तम् )

**शब्दार्थसम्बन्धसाधनम्** (अत्र सप्तत्रिंशत्तमम्)

**सर्वगतात्मसिद्धिः** (अत्र द्वाविंशतितमम्)

**ज्ञानस्य स्वप्रकाशकत्वसाधनम्** (अत्र दशमम्)

**तुल्याधिकरणसमासविचारः**(अत्र अष्टात्रिंशत्तम्)

तत्रतत्र खण्डितपाठदर्शनाद् अस्या मूलादर्शः त्रुटितः क्षतिग्रस्तो दुर्वाच्यो वा स्यादित्यनुमीयते।

### सम्पादनपद्धतिः

अत्र सम्पादन उपयुक्ताः सर्वा अपि हस्तप्रतयः शुद्धप्राया इति तत्र विशिष्टा संशोधनापेक्षा नाभूत्। केवलमनुलेखनसम्भावनाजन्यत्वेन स्पष्टतया प्रतीयमानानामशुद्धीनां मूलपाठ एव परिमार्जनं विहितम्। सम्पादितानां

[१] सं.-नगीन जे. शाह,प्रका.- ला.द.सं.विद्यामन्दिर। (ई.१९७३)

सर्वासामपि कृतीनां प्रायश एका एव हस्तप्रतिरुलपब्धेति तत्राशुद्धत्वेनोपलक्षितः पाठः सम्मार्ज्य तत्रैव वृत्ताकारे () कोष्ठके शुद्धः पाठो दर्शितः। यत्रापि च पाठे स्वल्पोऽपि सन्देहः तत्र प्रश्नचिह्नं कृतम्। लिपिकृतोऽनवधानादिना भ्रष्टः पाठः चतुष्कोणे [ ] कोष्ठके, पुनरावृत्तश्च पाठः धनुराकारे { } कोष्ठके न्यस्तः। सर्वथा सन्दिग्धाः पाठा अधोरेखयाङ्किताः।

अन्वयसौकर्यार्थं पूर्वपक्षोत्तरपक्षयोः शङ्कासमाधानग्रन्थयोश्च सम्बन्धः पृथ्वक्षरैः प्रदर्शितः। साक्षिपाठा पृथुवक्राक्षरैरुपन्यस्ताः।

परिशिष्टे वर्तमानायां विशेषनाम्नां पारिभाषिकनाम्नां च सूच्यां निर्दिष्टानां नाम्नां स्थलान्वेषणसौकर्यार्थं सर्वासामपि कृतीनां गद्यांशान् विभज्य परिच्छेदक्रमः कृतेश्च सङ्केत उपकल्पितः। कृतिसङ्केतस्य विवरणं पञ्चमे परिशिष्टे वर्तते।

सम्पादनेऽस्मिन् दृश्यमानाः छद्मस्थसुलभाः क्षतयो विद्वांसः सम्मार्क्ष्यन्ति निर्देक्ष्यन्ति चेति निवेदयति श्रुतभवनस्थः

**-सम्पादकगणः**

वैक्रमीये सप्तत्यधिके द्विसहस्रतमे वर्षे शारदपूर्णिमायाम्।

## परिचयः

---

दार्शनिकक्षेत्रे वादपदमतिप्रचलितमस्ति। उच्चारार्थकस्य 'वद्'धातोर्भावार्थे घञि प्रत्यये विहिते वादपदस्य मुखेनोच्चार्यमाणः शब्द इति व्युत्पत्तिनिमित्तकोऽर्थो लभ्यते। तस्य प्रवृत्तिनिमित्तमाश्रित्य न्यायसूत्रेषु पुनरेतत्तल्लक्षणं गीयते–'**प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः**।'[१] अस्यायमर्थः–यस्मिन् प्रमाणतर्काभ्यां स्वपक्षस्थापना विपक्षप्रतिषेधश्च विधीयते, यस्मिँश्च पूर्वोत्तरपक्षौ पञ्चावयववाक्यक्रमेण सिद्धान्ताविरुद्धां तत्त्वचर्चामारभेते स वादः। वादे गृहीतस्य[२] कस्यचित् तत्त्वनिर्णयार्थं व्यक्तिः तत्समूहो वा पूर्वोत्तरपक्षयोर्विभज्य विचाराङ्गसंशयजननीर्विप्रतिपत्तीरुपस्थाप्य गुणदोषान्निर्णीय एकतरं गृहीतं सिद्धान्तयन्ति। वादेनैव गृहीतं तथ्यं सिद्धान्तो भवतीति।

गौतमर्षिणा वादार्थमुपक्रान्तायाः तत्त्वचर्चायाः त्रयो नियमा उपदर्शिताः। तद्यथा- प्रथमं तावद् वादे प्रस्तूयमाना चर्चा प्रमाणतर्काभ्यां युक्तैव भवितुमर्हति। द्वितीयम्, सा सिद्धान्ताविरोधिनी भवितुमर्हति। तृतीयम्,चर्चायां पक्षस्य स्थापना पञ्चावयववाक्यक्रमेण कार्या। एताँश्च नियमाननुसृत्य प्रवृत्तो वाद एव तत्त्वनिर्णयाय प्रभवति। तदेवं वादः तत्त्वनिर्णयस्य परमं साधनम्, अतः स एव तस्य मुख्यं प्रयोजनम्, जयपराजयौ तु तत्रात्यन्तं गुणीभूतावित्यामनन्ति। यत्र तु तत्त्वनिर्णयं विहाय जयपराजयौ एव प्रधानीभवतः सा चर्चा वादे नान्तर्भवति। जयार्थमेव प्रवृत्तस्य प्रतिवादिनो निग्रहार्थं जल्प-वितण्डा-छलानामप्युपयोग अवश्यं कर्तव्य इति न्यायसूत्रे प्रतिपादितम्[३]।

प्रमाणनयतत्त्वालोकालङ्कारस्याष्टमे परिच्छेदे महावादिभिः श्रीमद्भिर्देवसूरिभिः वाद एव विस्तृतं विवृतः। तत्र वादस्य लक्षणं तावदित्थं प्ररूपयन्ति सूरयः। तद्यथा- '**विरुद्धयोर्धर्मयोरेकधर्मावच्छेदेन स्वीकृततदन्यधर्मव्यवस्थापनार्थं साधनदूषणवदनं वादः**' इति।(प्र.न.८.१)

द्वयोर्विरुद्धयोर्धर्मयोरेकतरं स्वाभिप्रेतं धर्मं सत्यापयितुं क्रियमाणः स्वपक्षसाधको वचनप्रयोगः, स्वाभिप्रेताद् धर्माद् विरुद्धं धर्म निराकर्तुं क्रियमाणः परपक्षदूषको वचनप्रयोगश्च वाद इत्युच्यते। अत्र हि सूरिभिःवादस्य द्वौ हेतूपदर्शितौ। तद्यथा- जिगीषा तत्त्वनिर्णयश्च[४]। तत्त्वनिर्णय एव वादस्य फलम्,अत आ तत्त्वनिर्णयान्तं यावद्वा तत्त्वं स्फुरति तावद् वादः प्रवर्तते[५]। विजिगीषायाः प्रवृत्ताद् वादात् तत्त्वनिर्णयार्थं प्रवृत्तो वाद एव श्रेष्ठ इति।

वादस्य वादि-प्रतिवादि-सभ्य-सभापतिरूपाणि चत्वार्यङ्गानि भवन्ति,प्रत्येकस्य स्वीयं स्वीयं कर्तव्यं भवति,वादस्य फलं च तत्त्वनिर्णयादि यद् भवति तत्सर्वं तत्रोक्तं सूरिभिः[६]।

---

[१] न्यायसूत्रे प्रथमाध्यायस्य द्वितीयमाह्निकम्।

[२] Theory इत्याङ्ग्लभाषायाम्, विवादास्पदोऽधुनानिर्णीतः कश्चिदर्थ इत्यर्थः।

[३] यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः।(१.२.२)
स प्रतिपक्षस्थापनाहीनो वितण्डा।(१.२.३)
वचनविघातोऽर्थविकल्पोपपत्त्या छलम्।(१.२.१०)
तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत्।(४.२.५०)
ताभ्यां विगृह्य कथनम्।(४.२.५१)

[४] प्रारम्भकश्चात्र जिगीषुः तत्त्वनिर्णिनीषुश्च॥ स्वीकृतधर्मव्यवस्थापनार्थं साधन-दूषणाभ्यां परं पराजेतुमिच्छुर्जिगीषुः॥ तथैव तत्त्वं प्रतिष्ठापयिषुस्तत्त्वनिर्णिनीषुः॥ (प्र.त.लो.८.२-३-४)

[५] सजिगीषुकेऽस्मिन् यावत्सभ्यापेक्षं स्फूर्तौ वक्तव्यम्॥ उभयोस्तत्त्वनिर्णिनीषुत्वे यावत्तत्त्वनिर्णयं यावत्स्फूर्ति च वाच्यम्॥ (प्र.त.लो.८.२२-२३)

[६] चतुरङ्गो वाद इत्युक्तम्, कानि पुनश्चत्वार्यङ्गानि ? इत्याहुः—

**वादि-प्रतिवादि-सभ्य-सभापतयश्चत्वार्यङ्गानि॥१५॥**

वादस्येति शेषः॥१५॥ अथैतेषां लक्षणं कर्म च कीर्तयन्ति—

आबह्वोः प्राचीनकालादस्यामार्यभूमौ मौखिका वादाः प्रचलन्ति स्म। कल्पसूत्रे श्रूयते यदुत-श्रमणस्य भगवतो महावीरस्य चतुर्शताः श्रमणाः वादिन आसन् ये देवमनुष्यासुरसहितायां पर्षदि अपराजिताः आसन्[१]। एवं पुरुषादानीयस्यार्हतः पार्श्वस्य षट्शताः श्रमणाः वादिन आसन्[२]। अर्हतोऽरिष्टनेमेः अष्टशताः श्रमणाः वादिन आसन्[३]। कौशलिकस्यार्हत ऋषभस्य पञ्चपञ्चाशदुत्तराः षट्शताधिकाः द्वादशसहस्राः श्रमणाः वादिन आसन्[४]। ईन्द्रभूत्यादयो ब्राह्मणा अपि भगवन्तं वादे पराजेतुमेव समुपस्थिता आसन्। तस्मिन् काले एषा परम्परा आसीद् यद्-यदि वादे युक्तिप्रतियुक्तिषु उभयस्यापि पक्षस्य प्राबल्यं समं भवति तदा वादिप्रतिवादिनोः प्रतिभानिर्णयः क्रियते। वादी एकसङ्ख्यामाश्रित्य स्वाभिमततत्त्वनिरूपणं करोति,तदुत्तरं प्रतिवादिना तदभिमतं तत्त्वद्वयं वाच्यम्,तदुपरि वादिना तत्त्वत्रयं वाच्यम्, प्रतिवादिना तदभिमतं तत्त्वचतुष्टयं वाच्यम्, एवं यः सर्वाधिकसङ्ख्यं तत्त्वं वक्तुं प्रभवति स वादविजेता भवति। इत एव कारणात् स्थानाङ्ग-समवायाङ्गयोरागमयोः एकमारभ्य दशं यावत्सङ्ख्येयासङ्ख्येयसङ्ख्यामाश्रित्य पदार्थनिरूपणं विहितम्। बौद्धदर्शने....सूत्रेऽप्ययमेव क्रमो दृश्यते। रोहगुप्तात् त्रैराशिकमतोत्पत्तिरपि अस्या एव परम्परायाः परिणामः।

मध्यकाले वादे प्रवर्तमानान् विषयानधिकृत्य विद्वद्भिरनेके ग्रन्थाः( यथा-श्रीहरिभद्रसूरिकृतः शास्त्रवार्तासमुच्चयः), अनेकाः व्याख्याः(यथा- श्रीअभयदेवसूरिकृता वादमहार्णवटीका), बृहन्निबन्धाश्च प्रणीताः। तदनन्तरं लघुनिबन्धानां प्रणयनं प्रवृत्तम्। बृहन्निबन्धेषु साङ्गोपाङ्गः वादविषयो विव्रियते लघुनिबन्धेषु पुनः तस्यैव प्राथमिकी परीक्षा प्रदर्श्यते इति। तदेते लघुनिबन्धाः वादविश्वे 'वादस्थलम्' इति नाम्ना प्रचलिताः सन्ति।

सर्वत्र वादे कश्चिदेको विवादविषयो वर्तते यो निर्णयाभावात् शङ्कास्पदो भवति। शङ्कायां पुनर्विधिनिषेधरूपं कोटिद्वयं भवति। एका कोटिर्वादिनोऽन्या प्रतिवादिनो भवति। परस्परेण विरुद्धमेतत् कोटिद्वयं यदा शङ्काया उत्थापनद्वारेण विचारं जनयति तदा विप्रतिपत्तिरित्युच्यते[५]। तदेवं विप्रतिपत्तिरेव वादस्य मूलं भवति।

---

**प्रारम्भक-प्रत्यारम्भकावेव मल्ल-प्रतिमल्लन्यायेन वादिप्रतिवादिनौ॥१६॥**

यौ प्रारम्भक-प्रत्यारम्भकपदाभ्यां पूर्वमुक्तौ तावेव वादिप्रतिवादिशाब्दाभ्यां व्यपदिश्येते॥१६॥

**प्रमाणतः स्वपक्षस्थापन-प्रतिपक्षप्रतिक्षेपावनयोः कर्म॥१७॥**

वादिना स्वपक्षस्य स्थापनं प्रतिवादिपक्षस्य खण्डनं चेति द्वितयं कर्तव्यम्। एवं प्रतिवादिनापि स्वपक्षस्थापनं वादिपक्षप्रतिक्षेपश्चेति द्वयं कर्तव्यम्। अन्यतरस्याप्यभावे तत्त्वनिर्णय एव न स्यादिति भावः। तदुक्तम्—

मानेन पक्ष-प्रतिपक्षयोः क्रमात् प्रसाधनक्षेपणकेलिकर्मठौ। वादोऽत्र मल्ल-प्रतिमल्लनीतितो वदन्ति वादि-प्रतिवादिनौ बुधाः॥१७॥

**वादिप्रतिवादिसिद्धान्ततत्त्वनदीष्णत्व-धारणाबाहुश्रुत्य-प्रतिभा-क्षान्ति-माध्यस्थ्यैरुभयाभिमताः सभ्याः॥१८॥**

**नदीष्णत्वं**-कुशलत्वं, शेषं स्पष्टम्॥१८॥

**वादि-प्रतिवादिनोर्यथायोगं वादस्थानककथाविशेषाङ्गीकारणाग्रवादोत्तरवादनिर्देशः, साधकबाधकोक्तिगुणदोषावधारणं, यथावसरं तत्त्वप्रकाशनेन कथाविरमणं, यथासम्भवं सभायां कथाफलकथनं चैषां कर्माणि॥१९॥**

यदा वादि-प्रतिवादिनौ स्वयमनङ्गीकृतपक्षप्रतिपक्षौ प्रवर्तेत तदा 'त्वया शब्दस्य नित्यत्वं साधनीयं त्वया च कथञ्चिन्नित्यत्वम्' इत्येवं रूपयोः **पक्षप्रतिपक्षयोरङ्गीकारणा,** 'सर्वानुवादेन वा वक्तव्यम्' इत्येवंरूपस्य **कथाविशेषस्याङ्गीकारणा,** 'अनेन प्रथमं वक्तव्यमनेन पश्चात्' इत्यग्रवादोत्तरवादनिर्देशः, वादि-प्रतिवादिभ्याम् अभिहितयोः **साधक-बाधक-वचनयोर्गुणदोषावधारणं,** यदा एकेन प्रतिपादितमपि तत्त्वमन्येन नाभ्युपगम्यते, यदा वा द्वावपि तत्त्वपराङ्मुखमुदीरयन्तौ न विरमतः तदा **तत्त्वप्रकाशनेन तयोर्विरमणं,** जय-पराजयादिरूपं वादफलकथनं **चैषां**-सभ्यानां **कर्माणि** कर्तव्यानि॥१९॥

**प्रज्ञाऽऽज्ञैश्वर्य-क्षमा-माध्यस्थसम्पन्नः सभापतिः॥२०॥ वादि-सभ्याभिहितावधारणं कलहव्यपोहादिकं चास्य कर्म॥२१॥**

वादि-प्रतिवादिभ्यां सभ्यैश्च कथितस्यावधारणं, कलहनिराकरणम्, आदिना पारितोषिकवितरणादिकं **चास्य** सभापतेः **कर्म**-कर्तव्यम्॥२१॥ (प्र.त.लो.अव.८.१५-२१)

[१] समणस्स भगवओ महावीरस्स चत्तारि सया वाईणं सदेवमणुआसुराए परिसाए वाए अपराजिआणं उक्कोसिआ वाइसंपया हुत्था।(सू.१४२)(कप्पसुत्तं,सं.-मुनिश्रीपुण्यवि.म.प्र.-

[२] छस्सया वाईणं (सू.१५७)

[३] अट्ठसया वाईणं (सू.१६७)

[४] उसभस्स णं अरहओ कोसलिअस्स बारससहस्सा छच्च सया पण्णासा उक्कोसिआ वाइसंपया हुत्था।( सू.१९७) यद्यपि भगवत ऋषभदेवस्वामिनः काले परमतमेव नासीदिति वादिनां निरूपणं निष्प्रयोजनमिति वक्तुं शक्यते तथापि तत्सूत्रं वादलब्धिसम्पन्नमुनिसङ्ख्यामात्र-प्रतिपादकमिति न विरोधः।

[५] यथोक्तं गदाधरभट्टाचार्यैः प्रामाण्यवादे—**विचाराङ्गसंशयजननीर्विप्रतिपत्तीराह** इति

वादे प्रतिपक्षपुरस्कृताया युक्तेः खण्डनार्थं द्वौ मार्गौ प्रचलितावास्तुः। तर्कमार्गो विकल्पमार्गश्च। प्रथमे पूर्वपक्षीयानुमाने दोषदर्शिका प्रतियुक्तिः प्रदर्श्यते, द्वितीये पुनर्विकल्पानुत्थाप्य पूर्वपक्षीयानुमानं दूष्यते। यथोर्णनाभः तन्तुभिर्जालं निर्माय भक्ष्यं सर्वतो वेष्टयति तथात्र वादी युक्तिजालैः प्रतिवादिनं वेष्टयति। प्राचीनन्याये बहुधायं द्वितीयो मार्गो दृश्यते।

सङ्ग्रहेऽस्मिन् वादात्मिकानां पञ्चचत्वारिंशद्दार्शनिकलघुकृतीनां समुच्चयो वर्तते। द्वित्राः कृतीर्विहाय सर्वा अपि जैना एवेति जैनदार्शनिकप्रकरणसङ्ग्रह इति सार्थकं तन्नाम। विषयसाम्यात् प्राज्ञवर्यश्रीयुतशाहोपाह्वनगीनमहोदयेन सम्पादितस्यानुगाम्ययं सङ्ग्रहः तस्यैव द्वितीयभागो भविष्यतीति। सम्पादनेऽस्मिन् सौकर्यार्थं विषयमनुसृत्य पञ्च खण्डा उपकल्पिताः। तत्र प्रथमे प्रमाणवादाख्ये खण्डे प्रमाणविषया दश वादाः सन्ति। द्वितीये ईश्वरवादाभिधे खण्डे ईश्वरकर्तृत्वविषयाः चत्वारो वादाः सन्ति। तृतीये सर्वज्ञवादनाम्नि खण्डे सर्वज्ञसत्ताविषयाः त्रयो वादाः सन्ति। चतुर्थे जीववादाभिधाने खण्डे जीवविषयाः पञ्च वादाः सन्ति। पञ्चमे खण्डे सप्तदशसङ्कीर्णवादानां सङ्कलनं विद्यते। षष्ठे जैनवादनामनि खण्डे स्वसमयरूपाः पञ्च वादाः सन्ति। क्रमशः तेषां परिचयः प्रस्तूयते।

१) **प्रमाणलक्षणकण्टकोद्धारप्रकारः**-स्वपरव्यवसायि ज्ञानम् इति प्रमाणलक्षणं जैनदर्शनानुमतम्। तत्र परैर्ये दोषाः प्रदर्श्यन्ते तेषामुद्धारोऽत्रोपदर्शितः।

२) **सर्वार्थनिराकरणवादस्थलम्**-वादस्थलेऽस्मिन् केनापि प्रतिवादिनोपक्रान्तस्य अनुमानस्य द्वात्रिंशद्भिः विकल्पैः प्रतिकारकरणप्रकारः प्रदर्शितोऽस्ति। वादस्थलमेतद् आचार्यश्रीरविप्रभसूरिभिः कृतम्। सूरीणां जीवनवृत्तादिकं कालगर्भम्।

३) **उपाधिप्रकरणम्**-वादस्थलेऽस्मिन् उपाधिलक्षणस्य विमर्शो विद्यते। उपाधिरत्रासिद्धिनामकस्य हेतुदोषस्य भेदः। साध्यव्यापकत्वे सति साधनाव्यापकत्वमिति च तल्लक्षणम्। प्रकरणमिदम् उदयनाचार्येण कृतमिति यद्यप्यस्या हस्तप्रतौ लिखितं दृश्यते तथापि तत्र संवादि ऐतिह्यं प्रमाणं नोपलभ्यते।

४) **उपाधिप्रकरणविडम्बनम्**- बाढेश्वरकृतेऽस्मिन् वादस्थले स एव विषयः। विदुषोऽस्य नैयायिकस्य नामाप्यश्रुतपूर्वमिति तस्य विषये न किञ्चिदपि वक्तुं पार्यते।

५) **उपाधिखण्डनम्**-वादस्थलेऽस्मिन् उदयनाचार्येण प्रस्तुतं उपाधिलक्षणं समीक्षितम्। जैनदार्शनिकप्रकरणसङ्ग्रहे[1] श्रीसाधुविजयनिबद्धे (तपा.सोमसुन्दरसूरिशिष्य-लक्ष्मीसागरसूरिशिष्य-सुमतिसाधुसूरिशिष्य-जिनहर्षशिष्य) वादिविजयापरनामहेतुखण्डनपाण्डित्याभिधाने प्रकरणे तृतीयमारभ्या पञ्चमाधिकारमयमेव विषय उपवर्णित इति तदप्यवलोकनीयं सुधीभिरिति।

६) **अनुमानदूषणानि**-लघावस्मिन् वादस्थले पञ्चानां हेत्वाभासानां व्याख्यावर्णनं वर्तते।

७) **दशावयवानुमानम्**-न्यायनयानुसारेण अनुमानं द्विविधं भवति-स्वार्थानुमानं परार्थानुमानं च। तत्र परार्थानुमाने पञ्चावयववाक्यक्रमेण बोधो भवति। प्रतिज्ञावाक्यम्, हेतुवाक्यम्,उदाहरणवाक्यम्, उपनयवाक्यम्, निगमनवाक्यं चेति पञ्चावयववाक्यानि भवन्तीति प्रसिद्धम्। तत्रैव हेतौ पञ्चानां हेत्वाभासानाम् अभावरूपेषु पञ्चसु अवयववाक्येषु विवक्षितेषु दशावयवमनुमानं भवतीत्येतदत्रोक्तम्।

८) **परहेतुतमोभास्करनामस्थलम्**- सर्वार्थनिराकरणवादस्थलवदत्रापि प्रतिवाद्युपस्थापितस्य हेतोः प्रतिकारकरणप्रकारः प्रदर्शितोऽस्ति।

९) **सर्वानुमानोत्थापनस्थलम्**-अत्रापि स एव विषयः।

---

[1] सं.-नगीन जे. शाह,प्रका.- ला.द.सं.विद्यामन्दिर। (ई.१९७३)

१०) **ज्ञानस्य स्वप्रकाशकत्वसाधनम्-**ज्ञानं यथा परं=स्वस्मादन्यद् विषयं प्रकाशयति तथा स्वमपि प्रकाशयति न वेति विप्रतिपत्तौ ज्ञानस्य स्वप्रकाशकत्वमत्र साधितम्।

११) **ईश्वरवादः** १२) **ईश्वरनिराकरणवादः** १३) **ईश्वरवादस्थलम्**

१४) **ईश्वरजगत्कर्तृत्वनिराकरणवादः-**द्वितीयखण्डवर्तिषु चतुर्ष्वपि वादस्थलेषु ईश्वरस्य जगत्कर्तृत्वं परीक्षितमस्ति। तत्र प्रथमे वादे ईश्वरस्य जगत्कर्तृत्वं समर्थितं शेषेषु तु निराकृतमिति।

१५) **सर्वज्ञवादस्थलम्** १६) **सङ्क्षेपेण सर्वज्ञसिद्धिः**

१७) **सर्वज्ञव्यवस्थापनवादस्थलम्-**मीमांसकाः सर्वज्ञसत्तां नाङ्गीकुर्वते। तृतीयखण्डवर्तिषु त्रिष्वपि वादेषु तन्निराकरणपूर्वकं सर्वज्ञसिद्धिः समादृता। अत्र विप्रतिपत्तिः- सकलपदार्थविषयं ज्ञानं सम्भवति न वा? विधिकोटिर्जैनानाम्,निषेधकोटिर्मीमांसकानाम्।

१८) **जीवास्तिवादस्थलम्-**चैतन्यं भूतचतुष्टयातिरिक्तवृत्ति वा न वेति विप्रतिपत्तौ विधिकोटिर्जैनानाम्, निषेधकोटिरन्येषामिति वादस्थलेऽस्मिन् जीवस्य भूतेभ्यो व्यतिरिक्तमस्तित्वं साधितम्।

१९) **आत्मनित्यत्वसिद्धिः-**भूतभिन्नोऽप्यात्मा भूतेभ्य उत्पद्यते नष्टेषु च भूतेषु विनश्यतीत्येकान्तमतं निराकृत्यात्रात्मनो नित्यानित्यत्वं साधितम्।

२०) **एकेन्द्रियाणां जीवत्वस्थापना-**पृथ्व्यप्तेजोवायुवनस्पतीनां जीवत्वसाधकमनुमानपञ्चकमात्रमत्र वादे सन्दर्शितम्।

२१) **सर्वव्याप्यात्मवादः** २२) **सर्वगतात्मसिद्धिः** -नैयायिकादिभिः स्वीकृतमात्मनो विभुत्वमनयोः युक्तिभिर्निराकृतम्।

२३) **विद्वज्जनालापः-** वादस्थलेऽस्मिन् प्राथमिके सम्पर्के विद्वद्भिः सह कथमालापः कर्तव्य इत्युपदर्शितम्।

२४) **अपशब्दनिराकरणम्-**कदाचिद्वादे वैयाकरणः प्रतिवाद्याक्षेपं कुर्याद् यदुत-भवतात्रापशब्दस्य प्रयोगः कृत इति, अस्य प्रतिविधानमस्मिन् वादस्थले विहितम्। गावीगोणीत्यादिशब्दानामसाधुत्वं प्रचक्षाणा वैयाकरणा अत्र परीक्षिताः।

२५) **तमोवादः-**मीमांसकमतेन अन्धकारः स्वतन्त्रं द्रव्यम्, नैयायिकमतेन तेजोऽभावरूपः स,जैनानां मते भावरूपः स पुद्गलस्यैव पर्यायविशेषः। वादस्थलेऽस्मिन् न्यायकन्दलीटिप्पणमनुसृत्य मीमांसकमतं निराकृतम्,ततः ................सूत्राण्यनुसृत्य नैयायिकमतमपि निराकृत्य तमसः पौद्गलिकत्वं समर्थितम्।

२६) **चक्षुर्द्वैतनिराकरणम्-**लघावप्यस्मिन् वादस्थले महत्त्वपूर्णो विषयः चर्चितः। मनुष्यस्य मुखे द्वौ चक्षुर्गोलकौ विद्येते किन्तु तयोः चक्षुरिन्द्रियमेकं वर्तते द्वे वा वर्तेते इति विप्रतिपत्तिः। अत्र चक्षुरिन्द्रियमेकमेवेति सिद्धान्तो युक्तिपुरस्सरं स्थापितः।

२७) **विप्रवक्त्रमुद्गरः-**जात्या = जन्मना ब्राह्मणा एव श्रेष्ठाः सन्ति इत्यवधारणमस्मिन्वादस्थले परीक्षितम्।

२८) **सर्ववाक्यस्य सावधारणता-** सर्वं हि वाक्यं सावधारणं भवतीति संस्कृभाषाया अत्यधकप्रचलितो न्यायः। तत्रोपस्थापितायाः शङ्कायाः प्रतिवचनमस्य लघुभूतस्य वादस्य विषयः।

२९) **जातिसिद्धिः-**अत्यन्तं लघुन्यस्मिन्वादे जातिपदार्थसिद्ध्यै युक्तिरुपदर्शितास्ति।

३०) **सामान्यसिद्धिवादः-** अत्रापि जातिसिद्धिरेवोद्दिष्टा।

३१) **शशविषाणादिदृष्टान्ते निषेधविचारः-**असन् पदार्थोऽभावस्य प्रतियोगी भवति न वेति विप्रतिपत्तौ अपेक्षया स भवतीत्यत्र सिद्धान्तितम्।

३२) **आकाशादीनां मूर्तत्वविचारः-** वादस्थलेऽस्मिन्नाकाशादीनां द्रव्याणां मूर्तत्वामूर्तत्वविचारः चिकीर्षितः। तत्र क्रियावत्त्वं मूर्तत्वमिति नैयायिकाभिमतम्,सर्वमूर्तद्रव्यसंयोगित्वं च विभुत्वम्। मूर्तत्वं नाम सर्वगतत्वमित्यभिप्रेत्यात्र विचारोऽयमादृतः। सर्वत्रागच्छदिति सर्वगतमिति व्युत्पत्त्यर्थानुसारं तु आकाशं मध्यमपरिमाणवदणुपरिमाणवद्वा भवेद् गमनक्रियावच्च स्यादिति तद्वारणायात्र प्रयतितम्।

३३) **सामान्यविशेषविचारः-***सामान्यादत्यन्तमभिन्ना विशेषा इति साङ्ख्याः। विशेषेभ्योऽत्यन्तमभिन्नं सामान्यम् इति बौद्धाः। सामान्यादत्यन्तं भिन्ना विशेषा इति नैयायिकवैशेषिकाः। कथञ्चिद्भिन्नाभिन्नौ सामान्यविशेषौ इति जैनाः।* एतावन्मात्र एवात्र विचारः।

३४) **बौद्धानां सम्प्रदायचतुष्टये बाह्यार्थविचारः-** दर्शनशास्त्रे बाह्यार्थधिकृत्य प्रस्थानद्वयं प्रवर्तते। कानिचिद्दर्शनानि जगदिदं वस्तुसदिति वदन्ति तेषां नैयायिकवैशेषिकमीमांसकसाङ्ख्यजैनादीनां वास्तववादः। कानिचित्पुनर्दर्शनानि जगदिदं काल्पनिकमिति मन्वते तेषां वेदान्तिप्रभृतीनां कल्पनावादः। बौद्धदर्शनस्य चतुःसु सम्प्रदायेषु वैभाषिकसौत्रान्तिकेतिसम्प्रदायद्वयं वास्तववादि,अन्यच्च योगाचारमाध्यमिकेतिसम्प्रदायद्वयं कल्पनावादि। सर्वेषामप्येतेषां व्युत्पत्त्यर्थनिदर्शनपूर्वकं विवरणमस्मिन् वादस्थले प्रस्तुतम्।

३५) **शब्दाम्बरगुणत्वनिर्लोठनस्थलम्-**नैयायिकमते शब्द आकाशस्य गुणः,जैनमते पौद्गलिकः। तदत्र वादस्थले शब्दस्य पौद्गलिकत्वमुपपादितम्। यत्त्वत्र श्रोत्रेन्द्रियस्याप्राप्यकारित्वमुक्तं न्यायमते तदनुपपन्नम्।

३६) **आख्यातार्थविचारः-**शाब्दबोधे आख्यातस्य क्रिया इत्यर्थः क्रियते। क्रियाप्रधानमाख्यातमिति वचनात् पचतेः पाकक्रियारूपोऽर्थो लभ्यते।अस्मिन् विषये वैयाकरणानां मतमत्र विचारितम्।

३७) **शब्दार्थसम्बन्धसाधनम्-** शब्दार्थयोः पञ्चविधः प्रचलितः सम्बन्धो नास्तीत्यत्र साधितम्। अत्र दृश्यमानं सामान्यनिरसनमसम्बद्धमिव प्रतिभाति।तत्त्वं तु बहुश्रुता विदन्ति।

३८) **तुल्याधिकरणसमासविचारः-**नीलोत्पलमित्यादिषु विशेष्यविशेषणयोः कर्मधारयसमासः विहितो वैयाकरणैः। विशेष्यविशेषणयोः एकाश्रयवृत्तित्वरूपं तुल्याधिकरणत्वं न सङ्गच्छते इति विचारितमत्र। वस्तुतः तुल्याधिकरणत्वम् एकविभक्तिकत्वरूपमिति न कश्चिद्विरोधावकाशः।

३९) **कार्यकारणभावसम्बन्धसिद्धिः-**बौद्धानां क्षणिकवादं शून्यवादं च पूर्वपक्षीकृत्य कार्यकारणयोः सम्बन्धोऽत्र साधितः।

४०) **वेदबाह्यतानिराकरणम्-** वेदप्रामाण्यमनभ्युपगच्छन्तो जैना वेदबाह्याः सन्तीति प्रवादनिराचिकीर्षयात्र वादस्थले युक्तयः प्रदर्शिताः। यद्यप्यत्र वादस्थलमिदं सिताम्बराचार्यश्रीहरिभद्रसूरिकृतमित्युल्लिखितं तथापि तद् याकिनीमहत्तरासूनुसिताम्बराचार्यश्रीहरिभद्रसूरिरचितमस्तीति संशयास्पदमेव।

४१) **गणधरवादः-** कल्पसूत्रस्य सप्तमे व्याख्याने गणधरवादस्य सामान्यं विवरणं श्रूयते जिज्ञासुभिः। अस्यैव विस्तृतं विवेचनं विशेषावश्यकभाष्ये गणधरवक्तव्यतायां (गा.१५४९-२०२४) कृतं श्रीमद्भिः जिनभद्रगणिक्षमाश्रमणपूज्यपादैः। महद् गभीरार्थं चैतद् विवेचनमाश्रित्य अज्ञाताभिधानेन केनचिद् मेधाविना मुनिना सङ्कलिता कृतिरियम्।

४२) **केवलज्ञानसिद्धिः-** समस्तवस्तुगोचरं न सम्भवतीति मीमांसकमतं निराकृत्य केवलज्ञानसिद्धौ प्रमाणमुपदर्शितमत्र।

४३) **एकान्तनित्यानित्यवादभङ्गः-**उत्पादव्ययध्रौव्यात्मकस्य वस्तुनः सिद्धिर्हि अर्पणानर्पणाभ्यां भवति। अनेकान्तः तत्साधनम् एकान्तग्रहश्च तत्प्रतिबन्धकः। नानेकान्तेन विना वस्त्ववगमः सुशक इति व्यवस्थापयितुं वादेऽस्मिन्नेकान्तवादः परीक्षितः।

४४) **परिणामनित्यतावादः-**अनुपदोक्ता एव परीक्षात्र प्रकारान्तरेण प्रस्तुता।

तदेवमेतानि वादस्थलानि यथामति सम्पाद्यात्र प्रस्तुतानि विदुषां बोधवृद्ध्यै बोधिशुद्ध्यै च सम्पद्यन्तामिति शुभमभिलषन् विरमति परमगुरुवराचार्यवर्य**श्रीमद्विजयरामचन्द्रसूरीश्वराणां** विनेयान्यतमः पितृगुरु**मुनिप्रवर-श्रीसंवेगरतिविजया**नामनुजस्य **मुनिप्रवरश्रीप्रशमरतिविजय**स्य च सतीर्थ्यो

**-वैराग्यरतिविजयः**

वैक्रमीये सप्तत्यधिके द्विसहस्रतमेऽब्दे विजयदशम्यां श्रुतभवने।

# अनुक्रमणिका

**प्रथमः खण्डः- प्रमाणवादः**

१) प्रमाणलक्षणकण्टकोद्धारप्रकारः

२) सर्वार्थनिराकरणवादस्थलम् (श्रीरविप्रभसूरिकृतम्)

३) उपाधिप्रकरणम् (उदयनाचार्यकृतम्)

४) उपाधिप्रकरणविडम्बनम् (बाढेश्वरकृतम्)

५) उपाधिखण्डनम्

६) अनुमानदूषणानि

७) दशावयवानुमानम्

८) परहेतुतमोभास्करनामस्थलम्

९) सर्वानुमानोत्थापनस्थलम्

१०) ज्ञानस्य स्वप्रकाशकत्वसाधनम्

**द्वितीयः खण्डः ईश्वरवादः**

११) ईश्वरवादः

१२) ईश्वरनिराकरणवादः

१३) ईश्वरवादस्थलम्

१४) ईश्वरजगत्कर्तृत्वनिराकरणवादः

**तृतीयः खण्डः-सर्वज्ञवादः**

१५) सर्वज्ञवादस्थलम्

१६) सङ्क्षेपेण सर्वज्ञसिद्धिः

१७) सर्वज्ञव्यवस्थापनवादस्थलम्

**चतुर्थः खण्डः-जीववादः**

१८) जीवास्तिवादस्थलम्

१९) आत्मनित्यत्वसिद्धिः

२०) एकेन्द्रियाणां जीवत्वस्थापना

२१) सर्वव्याप्यात्मवादः

२२) सर्वगतात्मसिद्धिः

**पञ्चमः खण्डः-सङ्कीर्णवादः**

२३) विद्वज्जनालापः
२४) अपशब्दनिराकरणम्
२५) तमोवादः
२६) चक्षुर्द्वैतनिराकरणम्
२७) विप्रवक्त्रमुद्गरः
२८) सर्ववाक्यस्य सावधारणता
२९) जातिसिद्धिः
३०) सामान्यसिद्धिवादः
३१) शशविषाणादिदृष्टान्ते निषेधविचारः
३२) आकाशादीनां मूर्तत्वविचारः
३३) सामान्यविशेषविचारः
३४) बौद्धानां सम्प्रदायचतुष्टये बाह्यार्थविचारः
३५) शब्दाम्बरगुणत्वनिर्लोठनस्थलम्
३६) आख्यातार्थविचारः
३७) शब्दार्थसम्बन्धसाधनम्
३८) तुल्याधिकरणसमासविचारः
३९) कार्यकारणभावसम्बन्धसिद्धिः

**षष्ठः खण्डः -जैनवादः**
४०) वेदबाह्यतानिराकरणम् (हरिभद्रसूरिकृतम्)
४१) गणधरवादः
४२) केवलज्ञानसिद्धिः
४३) एकान्तनित्यानित्यवादभङ्गः
४४) परिणामनित्यतावादः

## परिशिष्टानि

प्रथमं परिशिष्टम्–अकारादिक्रमेण वादसूचिः
द्वितीयं परिशिष्टम्–उद्धरणस्थलसङ्केतः
तृतीयं परिशिष्टम्–पारिभाषिकशब्दकोशः
चतुर्थं परिशिष्टम्–विशेषनामकोशः
पञ्चमं परिशिष्टम्–न्यायसूचिः
षष्ठं परिशिष्टम्–सङ्केतविवरणम्

प्रथमः खण्डः

# प्रमाणवादः

१

## ॥प्रमाणलक्षणकण्टकोद्धारप्रकारः॥

[१] प्रमाणं स्वपरव्यवसायिज्ञानम्, प्रमाणत्वान्यथानुपपत्तेः। अत्र चायं कण्टकोद्धारप्रकारः। तथा हि- न तावदत्र पक्षप्रतिक्षेपदक्षदोषसंश्लेषः। अयं हि भवत् किं प्रतीतसाध्यधर्मविशेषणत्वम्[अ], अनभीप्सितसाध्यधर्मविशेषणता[आ], निराकृतसाध्यधर्मविशेषणत्वं[इ] वा भवेद् इति भेदत्रयी त्रिवलीव तरलाक्षीणामुन्मीलति।

[२] तत्र न तावत् प्रतीतसाध्यधर्मविशेषणत्वम्[अ] अत्राख्यायमानं प्रेक्षावतां ख्यातये। यतः प्रसिद्धमेव साध्यं साधयतामेतदुन्मज्जति अपो द्रवा इत्यादिवत्। न चैतत्प्रमाणलक्षणमद्यापि परेषां प्रसिद्धकोटिमाटीकिष्टम्।

[३] नाप्यत्रानभीप्सितसाध्यधर्मविशेषणता[आ] भाषणीया। सा हि स्वानभिप्रेतं साध्यं साधयतां धीमतां धावति। शौद्धोदनस्य नित्यत्वसाधनवत्। न चार्हतानामेतत् प्रमाणलक्षणमनाकाङ्क्षितम्।

[४] नापि निराकृतसाध्यधर्मविशेषणता[इ] अत्रोपपत्तिपद्धतिप्रतिबद्धतां दधाति। तद्धि प्रत्यक्षेण अनुमानेन आगमेन वा साध्यस्य निराकरणाद् भवेत्। न चैतद् अनुष्णस्तेजोऽवयवी, नास्ति सर्वज्ञो, जैनेन रजनिभोजनं भजनीयमित्यादिवत् प्रत्यक्षानुमानागमादिभिः बाधासम्बन्धवैधुर्यं दधानमीक्ष्यते। तस्मान्नात्र दोषः पक्षस्य सूक्ष्मोऽप्युत्प्रेक्षितुमापार्यते।

नापि हेतोः। स खल्वसिद्धता विरुद्धता व्यभिचारो वा भवेत्। यदि तावदसिद्धता तदपि किमन्यतराऽसिद्धिरुभयासिद्धिर्वा भवेत्। अन्यतराऽसिद्धिश्चेत् तदापि वादिनः प्रतिवादिनो वान्यतरस्येयमसिद्धिः स्यात्। यदि वादिनस्तदा किं स्वरूपद्वारेणाश्रयद्वारेण भिन्नाधिकरणताद्वारेण पक्षैकदेशद्वारेण प्रतिज्ञार्थैकदेशद्वारेण वासौ स्यात्। स्वरूपद्वारेण चेत्किं हेतुस्वरूपे विप्रतिपत्तेरप्रतिपत्तेः सन्देहाद्वा। न प्राच्यः प्रकारः सारः। प्रमाणत्वाख्यहेतुस्वरूपे समस्तप्रामाणिकपरिषदामविसंवादात्। नापि द्वितीयः प्रमाणस्वरूपमप्रतिपद्यमानस्य वादिनोऽप्रामाणिकत्वप्रसङ्गात्। नापि तृतीयः, सर्वथैवानिर्णीतप्रमाणस्वरूपस्य प्रतिपत्तुस्तत्र सन्देहानुत्पादात्।

न खलु सकलकलमनाकलितस्थाणुत्वस्य स्थाणुत्वपुरुषत्वोल्लेखी सन्देहः कस्यापि सम्पद्यते। तत्स्वरूपप्रतिपत्तौ वा क्वचित् कथं सर्वथा प्रमाणस्वरूपे संशयः स्यात्? आश्रयासिद्धिव्यधिकरणसिद्धी तु जैनस्य दोषावेव न सम्मतौ, अस्ति सर्वज्ञः सुनिश्चितासम्भवाद्बाधकप्रमाणत्वाद्, उदेष्यति शकटं कृत्तिकोदयाद् इत्यादेर्गमकत्वेन स्वीकृतत्वात्। सम्मतत्वे वा न तयोरत्रावकाशशङ्काशङ्कुसङ्कथाप्रमाणस्य धर्मिणः, सकलवादिनामविवादास्पदत्वात्, प्रमाणत्वहेतोस्तत्र वृत्तिनिर्णयाच्च।

पक्षैकदेशासिद्धतापि नात्र साधीयस्तां दधाति। सा हि सम्पूर्णपक्षाव्यापकत्वे सति सम्भविनी, सचेतनास्तरवः स्वापादित्यादिवत्, न चैतदत्रास्ति। नाप्यनित्यः शब्दो नित्यत्वादिवत्

प्रतिज्ञातार्थैकदेशासिद्धता अभिधानीया। तस्यास्तत्त्वतः स्वरूपासिद्धिरूपत्वाद्,अन्यथा धर्मिणोऽपि हेतुत्वे तत्प्रसङ्गात्। स्वरूपासिद्धिश्चात्र न यथा स्थेमानम् आस्तिघ्नुते तथानन्तरमेव न्यरूपीति न वादिनः साधनमसिद्धमेतत्। नापि प्रतिवादिनः तत्राप्येवंप्रकारप्रकल्पनाप्रबन्धस्य प्रायः समानत्वात्। अत एव वादिप्रतिवाद्युभयस्यापि नासिद्धमिदम्। एवं च कथमिदं साधनमसिद्धिसम्बन्धं दधीत?

[५] नापि विरुद्धताबन्धसम्पर्ककलङ्कीतमेतद् विपक्षाद् व्यावृत्तत्वात्।

[६] नापि व्यभिचारपिशाचसञ्चारदुःसञ्चरन्तो निर्णीतविपक्षवृत्तित्वेन सन्दिग्धविपक्षवृत्तित्वेन चात्र व्यभिचारः प्रोच्येत, नाद्येन अनित्यः शब्दः प्रमेयत्वादिवत् विपक्षे वृत्तिनिर्णयाभावात्। स्वपरव्यवसायिज्ञानस्य हि विपक्षः संशयादिर्घटादिश्च। न च तत्र कदाचन प्रमाणता वरिवर्ति। नापि द्वितीयेन विवादापन्नः पुमान् सर्वज्ञो न भवति वक्तृत्वादित्यादिवद् विपक्षे वृत्तिसन्देहस्यासम्भवात्, संशयघटादिभ्यः प्रमाणव्यावृतेर्निर्णीतत्वात्। तन्नानैकान्तिकत्वलक्षणमपि दूषणमत्रौपढौकते इति हेतोरपि न कलङ्ककणिकापि प्रोन्मीलति।

[७] निदर्शनं पुनर्नोपदर्शितमेवात्रेति न तद्दोषोद्धारसंरम्भः। भवतु वा तदपि व्यतिरेकरूपं संशयघटादि। न चात्र कश्चिद् दूषणकणा(णः)। स खल्वसिद्धसाध्यव्यतिरेकोऽसिद्धसाधनव्यतिरेकोऽसिद्धोभयव्यतिरेकः, सन्दिग्धसाध्यव्यतिरेकः सन्दिग्धसाधन-व्यतिरेकः सन्दिग्धोभयव्यतिरेकोऽव्यतिरेकोऽप्रदर्शितव्यतिरेको विपरीतव्यतिरेको वा स्यात्। न तावदाद्याः षट्, घटादौ साध्यसाधनव्यतिरेकस्य स्पष्टनिष्टङ्कना। नापि सप्तमः, व्याप्त्यात्र व्यतिरेकनिर्णयात्। नाप्यष्टमनवमौ, यत्र न स्वपरव्यवसायिज्ञानत्वं न तत्र प्रमाणत्वमिति व्यतिरेकोपदर्शनादित्यतो निःकलङ्काद् अनुमानात् तल्लक्षणसिद्धेरनवद्यमिदं लक्षणम्॥

**॥इति प्रमाणलक्षणकण्टकोद्धारप्रकारः॥**

## २

श्रीरविप्रभसूरिकृतम्

# ॥सर्वार्थनिराकरणवादस्थलम्॥

[१] यः कश्चिदिह विपश्चित् किञ्चित्साधयति तार्किकस्तत्त्वम्।निगदामि सर्वतोमुखनिषेधमेतस्य दमनाय॥

तथा हि–अहो! विद्वन्! यदेतदसमप्रतिभावता भवता साधयितुमुपक्रान्तमास्ते तत्किमसदसद्वा[१]? प्रमेयमप्रमेयं वा[२]? प्रत्यक्षगम्यमप्रत्यक्षं वा[३]? साध्यविषयं प्रत्यक्षं प्रमाणमप्रमाणं वा[४]? स्वतःप्रमाणं परतो वा[५]? स्वसंवेदनं परसंवेदनं वा[६]? ऐन्द्रियमतीन्द्रियं वा[७]? भ्रान्तमभ्रान्तं वा[८]? सविकल्पकमविकल्पं वा[९]? क्षणिकमक्षणिकं वा[१०] ? सामान्यरूपं विशेषरूपं वा[११] ? भवदीयं सर्वसाधारणं वा[१२] ? वर्तमानक्षणविषयमतीतानागतक्षणविषयं वा[१३] ? प्रवर्तकं निवर्तकं वा[१४]? प्रस्तुतार्थप्रवर्तकमितरार्थप्रवर्तकं वा[१५] ? स्वसन्तानगतं परसन्तानगतं वा[१६] ? इति द्वात्रिंशद् विकल्पाः तवाभिमतमते तत्त्वपादपप्रतिघातकठिनकुठारप्रहारकल्पा इति।

[२] तत्र न तावद् भवदभिमतं साध्यमसत्। अम्बरारविन्दवद् अविद्यमानस्य साध्यत्वासम्भवात्। स्वयमेव तस्यास्तित्वे चासाध्यत्वाद्, अन्यथा मन्दरादयोऽपि साध्यत्वमासादयेयुः। यदुक्तम्-

***सतोऽपि साध्यता नास्ति स्वयं सत्त्वेन सिद्धितः। असतस्तु कुतः सिद्धिरन्तरिक्षारविन्दवत्॥***

[३] अप्रमेयमपि साध्यमेतदत्यन्तमचिन्त्यम्। प्रत्यक्षादिप्रमाणगोचरातिक्रान्ततया सर्वथैवाविद्यमानत्वे शशशृङ्गादिवत् साध्यतया ध्यातत्वात्। प्रमेयत्वे तु मकराकरपुरस्सराविपरीतसर्वजनप्रतीतवस्तुस्तोमवत्साध्यतया अविभाव्यत्वात्। यदुक्तम्-

***अप्रमेयं कुतः साध्यं शशशृङ्गादिसौहृदात्। प्रमेयमपि साध्यं न प्रमेयत्वेन सिद्धितः॥२॥***

[४] प्रत्यक्षगम्यमपि न साध्यतामर्हति। पुरःपरिस्फुरद् घटादिवत् स्वत एव अवधारितत्वेन साधनानुचितत्वात्। अप्रत्यक्षं तु सन्देहदोलाहेलाधिरुढस्वस्वात्मनि निश्चयोत्पादनाय द्वैधमपि नानायासं प्रवर्तितुमीष्टे। उक्तं च-

***प्रत्यक्षं न भवेत्साध्यं पुरोवर्ति घटादिवत्। अप्रत्यक्षं पुनः साध्यं सन्देहजनयत्यलम्॥३॥***

[५] अप्रमाणं चेत्प्रत्यक्षं कथं वस्तुतः प्रस्तुतार्थसमर्थनाय प्रथते? प्रमाणं चेत् न पुण्यप्रामाण्यावगमे उपायमनपायं कमपि तस्य पश्यामः।

प्रत्यक्षमप्रमाणं चेत् कथं साध्यार्थसाधकम्?। प्रामाण्ये तस्य पश्यामो नोपायं किञ्चिदद्भुतम्॥

[६] स्वतश्चेत् प्रत्यक्षं प्रमाणं तैमिरिकाणां द्विचन्द्रदर्शनेऽपि तर्हि न गर्हिता प्रमाणता। तदेतच्च निबिडजडस्यापि स्वयं प्रेक्षावत्ता समुत्तम्भनाखर्वगर्वसर्वस्वम्। परतश्चेत्प्रमाणं परोऽपि स्वतः परतो वा प्रामाण्यममन्दमास्कन्दतीति नानवस्था विराममवलोकयामः। उक्तं च-

*स्वतःप्रमाणे प्रत्यक्षे भ्रान्ताभ्रान्तभिदा कदा ?। प्रामाण्ये परतः स्थाप्येऽनवस्थादौःस्थ्यमुत्थितम्॥*

[७] स्वसंवेदनं च प्रत्यक्षमात्मानमेव संवेदयितुमाद्रियते। ननु भवदभीप्सितं साध्यं परसंवेदनं चेद्, आत्मानमसंवेदयत् परं परिच्छिनत्तीति मुधा श्रद्धातुमशक्यम्। प्रदीपादौ तथा व्यभिचारात्। अथ युगपदेव स्वपरसंवेदन तदस्तु वः तदप्यशस्तम्, एकस्यामेव क्रियायां व्याकुलत्वेन तत्कालं क्रियान्तरेषु प्रवृत्त्ययोगात्। क्षणिकत्वाच्च क्रियान्तराधिकृतसमयान्तरावस्थानाघटनात्। तथा हि-

*स्वसंवेदनमध्यक्षं परं संवेदयेत्कथम्?। परसंवेदनं स्वस्य संवित्तौ दुर्लभं तथा॥*

[८] अतीन्द्रियं च प्रत्यक्षं सर्ववेदिन एवेत्येन(एवेति चेदत्र) उच्यते। नाधुनातनानां तमोजननाञ्जन(ना)नामित्यवगणयितव्यम्। ऐन्द्रियं तु साध्यस्य सन्निधानेनावबोधमादधाति। व्यवधानेन तावदर्थपरिच्छेदो दुर्लभः द्वीपान्तरतरणिमण्डलेन अत्रत्यघटपटाद्यवबोधवत्। सन्निधानेन चेत्, स्वचक्षुषि काचकामलादिदोषोपलक्षणमिवावभावनीयस्तदवगमः। प्रदीपादिदृष्टान्तस्तु प्रत्यक्षस्याचेतनत्वमेव साधयति। तथा हि-

*अतीन्द्रियं किलाध्यक्षे न सम्भवति सम्प्रति। ऐन्द्रियं तु तदासत्तिव्यवधानैर्न बाधकम्॥*

[९] भ्रान्तमपि प्रत्यक्षं न भवदभिप्रेतसाध्यसाधकम्। तेन मृगतृष्णिकासु जलोल्लेखपोषकेणेव यथावस्थितवस्तुतत्त्वस्य परिच्छेत्तुमशक्यत्वात्। प्रत्युतात्यन्तिकवैपरीत्यस्यैव साध्यमानत्वात्। अभ्रान्तं चेत्, कथमस्याभ्रान्तभावः सम्भावनीयः स्वतः परतो वा? स्वतश्चेत्, सुशिक्षितोऽपि बटुर्न स्वं स्कन्धमध्यारोढुं प्रौढतामियर्ति। स्वस्याभ्रान्ततावगतौ च तदाकुलप्रवृत्तिकं कथं प्रस्तुतार्थ-समर्थनसामर्थ्यमत्यर्थमयते? परतश्चेत्, तदपि भ्रान्तमभ्रान्तं वेति पौनःपुन्येन तदेव पूर्वोक्तसुव्यक्तमुत्तिष्ठते इत्यनवस्थादौःस्थ्यम्। तथा हि-

*भ्रान्ताध्यक्षेन साध्यस्य न सिद्धिः पारमार्थिकी। अभ्रान्तता तु तस्यैव दुर्बोधा परतः स्वतः॥*

[१०] सविकल्पमपि प्रत्यक्षं यदि तद्विषयं प्रवृत्तं तदा तेन सर्वात्मना साध्यस्य परिच्छिन्नत्वात् सर्वसम्मतघटादिवस्तुवद् विप्रतिपत्तेरभाव एवेति निरर्थको भवदीयः साध्यसाधनप्रयासः। निर्विकल्पके च तस्मिन् शब्दप्रवेशा[व]काशो नास्तीत्यसत्कल्पम् अविकल्पकं तदिति सर्वथावधीरयितव्यम्।

*सविकल्पकबुद्धेऽर्थे विसंवादः कुतः सताम्?। अविकल्पकम(मस)त्कल्पं व्यवहारप्रवेशतः॥९॥*

[११] क्षणिकं च प्रत्यक्षं क्षणविनश्वरस्वरूपतया तत्समयमपि विपद्यमानं कथं प्रस्तुतवस्तुपरिच्छेदायावदातं भवेत्? स्वयं हि समुत्पन्नं वस्तु क्रमेणार्थक्रियायां व्याप्रियते जलधारणादौ घटादिवत् पितुः सुश्रूषादौ तनयवद्वा। अक्षणिकं चेत् नित्यतया व्यावहारिकस्थिरतया वा?। रूपादिकारणकलापं समुत्थापनीयत्वेन तावन्नित्यत्वं दूरापास्तप्रसरम्। व्यावहारिकस्थिरतया तु न कस्यापि पुत्रादिवत् प्रतीतं क्षणविध्वंसित्वेनैव सर्वत्र तस्य प्रसिद्धेः।

*क्षणध्वंसि किलाध्यक्षं न किञ्चिदवगच्छति। अक्षणिकं न कस्यापि प्रतीतिपथमृच्छति॥१०॥*

[१२] सामान्यरूपं च यदि प्रत्यक्षं तदवगमकं तदा सामान्यस्य सकलसमानव्यक्तिव्यापकत्वात् नित्यत्वाच्चेति तद्विषयस्यापि सर्वत्र प्रतीतगोत्वादिवत् साधनं नास्त्येव भवदिष्टस्य वस्तुनः। विशेषरूपं चेत् प्रत्यक्षं तत् कस्मात् भवत एव संस्मयं समुज्जृम्भते स्म नास्मादृशाम्? सामग्र्यभावाच्चेति(त्)। सामग्री हि लोचनालोकस्य रूपादिरूपा, असौ किं भवत एव सन्निहिता, नान्येषाम्? जायते चेदस्मादृशामपि तत्प्रत्यक्षं तदा विप्रतिपत्तिमेव न कुर्महे। प्रत्यक्षोपलक्षितेऽर्थे कस्यापि विसंवादादर्शनात्। तथा हि-

***सामान्यरूपे प्रत्यक्षे स्वयमेतत्प्रसिद्ध्यति।व्योमादिवद्विशेषे तु विसंवादः कुतो भवेत्?॥११॥***

[१३] भवदीयं च प्रत्यक्षं भवत एवोत्पद्यमानमस्ति नास्ति सत्यमसत्यं वेति को नाम निश्चेतुमुत्सहते? सर्वसाधारणं च प्रत्यक्षं सर्वज्ञमन्तरेण न कोऽप्यधिगन्तुमीश्वर इति प्रतीतमिदम्।

***तवैवाध्यक्षसंवित्तेर्वस्तु को मन्यते तथा। सर्वसाधार[णं] चैतत् मन्यते यदि सर्ववित्॥१२॥***

[१४] वर्तमानक्षणविषयं च प्रत्यक्षमसङ्गतमेव। समसमयसमुज्जृम्भमाणयोर्विषयप्रत्यक्षक्षणयोः ग्राह्यग्राहकभावाभावात्। सहोत्पद्यमानगोशृङ्गयुग्मवत्। अतीतानागतक्षणगतं तु प्रत्यक्षमविद्यमानविषयत्वादेवोपेक्षणीयम्।

***वर्तमानक्षणाध्यक्षं गोशृङ्गवदबोधकम्। इतरेषु क्षणेष्वेतत् निर्गोचरमनर्थकम्॥१३॥***

[१५] निवर्तकं तु प्रत्यक्षं साध्यस्याभावमेव व्यञ्ज[य]तीति कथं ततोऽस्य प्रसिद्धिः? प्रवर्तकं चेत् तत्किं प्रवर्तयति? परिच्छेदं चेत्, स्वयं सन्तमसन्तं वा। असतः प्रवर्तने विष्णुपदपद्मेन किमपराद्धं येन तन्न प्रवर्तयति? सतः पुनः प्रवर्तनमनवस्थामेव व्यवस्थापयति। तथा हि-

***निवर्तकं यदध्यक्षं तत्साध्याभावाशू_कम्। प्रवर्तकं परिच्छेदः(दं?) सत्त्वासत्त्वेषु दुर्घटम्॥१४॥***

[१६] अप्रस्तुतार्थप्रवर्तकं च प्रत्यक्षमफलमेव, प्रस्तुतार्थस्य तथैव विसंवादास्पदीभूतत्वेनावस्थितत्वात्। प्रस्तुतार्थप्रवर्तकं चेत् तत्किं क्षीरनीरन्यायेन विषयं मिश्रीकुर्वन् प्रवर्तयति सन्दंशकनिदर्शनेनैकदेशं सङ्गृह्णन् वा? पयोद्वितयन्याय तावन्नास्त्येव, प्रत्यक्षस्य विषयान्तर्व्याप्तेरभावात्। इतरोदाहरणं तु प्रतिनियतगृहीतविषयभागतत्त्वमेव सूचयेत्, इतरस्यासङ्गृहीतत्वात्। शेषसङ्ग्रहाय पक्षान्तरमपेक्षणीयमेव।

***अप्रस्तुतार्थे प्रत्यक्षं प्रस्तुते हि निरर्थकम्। सन्दंशकपयोन्यायात् प्रस्तुतेऽप्यप्रवर्तकम्॥१५॥***

[१७] स्वसन्तानगतं च प्रत्यक्षं कथं बहिर्गतं साध्यं साधयितुमलम्? अपवरकान्तर्गतरत्नमिव बहिःस्थितार्थसार्थं परसन्तानगतं चेत्, तर्हि भवतः किमायातम्? तस्येवावबोधसम्भवात्। य एव हि भुङ्क्ते स एव तृप्तिमाप्नोतीति प्रकटम्। तथा हि-

***स्वसन्तानगतेऽध्यक्षे न सिद्धिर्बाह्यवस्तुनः। परसन्तानसंस्थे तु न किञ्चिद्भवतो भवेत्॥१६॥***

[१८] अथेत्थमनर्थकमात्थ - एवं ह्यनल्पकल्पकल्पनाभिः कदर्थ्यमाने साध्ये बालगोपालादिप्रतीतस्फीतवस्तुव्यवहारोच्छेद एव प्रसज्यते। ननु विद्वन्! भवतु नाम का अस्माकं तत्रार्थे

चिन्ता दुरन्ता? स एष कर्णे स्पृष्टः कटी वालयति भवान्। प्रस्तुतेऽर्थे विचार्यमाणे जगत्त्रयीचिन्तामनन्तामुपक्रमसे। स्कन्धाधिरुढेन प्रौढभारमात्रं न शक्नोषि वोढुमतिमात्रं भुवनत्रयोद्धारमारभसे। प्रस्तुतार्थे चर्च्यमाने असम्बद्धार्थसार्थचिन्ता भवतो जाड्यमेवाताड्यमभिव्यञ्जयतीति विरम्यते।

**[१९]** एवं दुर्दमवादिवृन्दविशदोद्गीर्णस्वतत्त्वस्थितेर्युक्तानल्पविकल्पजल्पनमयं निःखेदमुच्छेदनम्।
स्वान्तेवासिजनानुत्कलमकरोत् सर्वानुगामिक्रमम्, श्रीशब्दादिरविप्रभाभिधगुरुर्दिङ्मात्रवादस्थलम्॥

**॥(इति) सर्वार्थनिराकरणं नाम वादस्थलम्॥**

३

उदयनाचार्यकृतम्

## ॥उपाधिप्रकरणम्॥

[१] मैत्रतनयत्वेन श्यामत्वे साध्ये शाकाद्याहारपरिणतिपूर्वकत्वमुपाधिः। **ननु** कथमुपाधित्वम्? साध्याभावाविनाभाविव्यत्ययत्वादिति **चेत्**, तत्त्वस्यार्थो विविच्यताम्। (पू) साध्यस्य श्यामत्वस्याभावेनाविनाभाविव्याप्तौ अस्य व्यत्ययो भाव इति विवेचनमिति **चेत्, (स)** ननु तर्हि सामान्यवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वाद् अनित्यत्वं यदा साध्यते तदा कृतकत्वमुपाधिः स्यात्। तस्यापि हि विपर्ययः साध्यस्यानित्यत्वस्याभावं न व्यभिचरति। **ननु** कृतकत्वम् अनित्यत्वव्यभिचारित्वादनुपाधिरिति **चेत्**, अथ कुत्र व्यभिचारः? (पू) प्रध्वंसाभावेऽनित्यत्वं विनापि कृतकत्वं दृश्यत **इति चेत्**, ननु कतमत् कृतकत्वमभिप्रेत्य भवान् ब्रवीति। **(शं)** प्रागसत उत्तरकालसम्बन्ध इति **चेत्**, ननु नैतत्कृतकत्वं वयमुपाधित्वेन ब्रूमः, किन्तु प्रागसतः सत्तायोगित्वं, न च तत्प्रध्वंसे गतं तस्य सत्तारहितत्वात्। ननु अनित्यत्वं विनाशित्वं तदभावश्च विनाशित्वम्, न च तेन प्रा[ग]सतः सत्तायोगित्वस्य कृतकत्वस्याभावो व्याप्तः, प्रागभाव एव व्यभिचारात्। तथा हि– प्रागभावे प्रागसत्त्वे सति सत्तायोगित्वं नास्ति। न चास्त्यविनाशित्वं अनित्यत्वाभावः। ननु न वयं विनाशित्वमनित्यत्वं ब्रूमः, नापि तदभावमविनाशित्वं, किन्तु स्वप्रच्युत्युपलक्षितसत्तायोगित्वम् अनित्यत्वम्। स्वप्रच्युत्युपलक्षितसत्ताशून्यत्वं च नित्यत्वाभावो। तथा च- यत् कृतकं तदनित्यमित्यस्यायमर्थः- यत् प्रागसत्त्वे सति सत्तायोगि तत् स्वप्रच्युत्युपलक्षितसत्तायोगित्वरहितं यथाकाशमिति। साध्यानित्यत्वाभावव्याप्ताभावत्वाद् भवेदेव कृतकत्वमुपाधिः।

[२] **अन्ये तु** भावत्वे सतीति विशिष्य कृतकत्वस्योपाधित्वं प्रसञ्जयन्ति, **तदयुक्तम्**, न हि यत्र भावत्वकृतकयोरेकतरदुभयं वा निवृत्तं तत्रानित्यत्वविनाशित्वं विनाशित्वलक्षणं निवृत्तम्, प्रागभाव एव व्यभिचारात्। तथा हि– प्रागभावेऽभावत्वं कृतकत्वसहितं नास्त्येव, अथ च विनाशित्वं विद्यते, नाविनाशित्वम्। न च भावत्वे सति कृतकत्वस्य सत्येव भावत्वेऽकृतकत्वमेव विपर्ययः, विशिष्टव्यतिरेकस्य अन्यतरव्यतिरेक उभयव्यतिरेके च भाषणात्। तथा च भावत्वे सति कृतकत्वस्य सत्येव भावत्वेऽकृतकत्वम्। यत्कृतकं न भवति न तदनित्यमित्यस्यायमर्थः- यत्र भावत्वमस्ति कृतकत्वं नास्ति तन्नानित्यं एव यथाकाशम्। यत्र च कृतकत्वमस्ति भावत्वं नास्ति तन्नानित्यं यथा प्रध्वंसः। यत्र भावत्वं कृतकत्वं च द्वयमेव च नास्ति तन्नानित्यं यथान्योन्याभावः। तथा च व्यभिचारः प्रागभावे। एतद्द्वयाभावेऽपि नित्यत्वावस्थानात्।

[३] अनित्यत्वं च प्रकृते विनाशित्वमेव कृतकत्वं च प्रागसत उत्तरकालसम्बन्ध इति। किञ्च भावत्वे सति कृतकत्वनिवृत्तौ चेदनित्यत्वनिवृत्तिः तर्हि अनित्यत्वभावे भावत्वे सति कृतकस्य भावः स्यात्। यथा वह्न्यभावे धूमनिवृत्तिर्धूमभावे वह्निभावः। तथा च प्रागभावे व्यभिचारः।

[४] **स्यादेतत्**-भावत्वे सत्यनित्यत्वे साध्ये भावत्वे सति कृतकत्वमुपाधित्वेन प्रसञ्जयामः। तथा हि– यत्र भावत्वे सति कृतकत्वं तत्र भावत्वे सति अनित्यत्वं, यथा घटे। यत्र भावत्वे सति न कृतकत्वं तत्र भावत्वे सति नानित्यत्वं यथाकाशे। आकाशे हि भावत्वे सति कृतकत्वं नास्ति, भावत्वे सत्यपि कृतकत्वाभावात्, तत्र भावत्वे सति अनित्यत्वमपि नास्ति, भावत्वे सत्यपि अनित्यत्वाभावात्। प्रध्वंसे च भावत्वे सति कृतकत्वं नास्ति, कृतकत्वे सत्यपि कृतकत्वाभावात्। तत्र भावत्वे सत्यनित्यत्वाभावः,

भावत्वानित्यत्वयोरुभयोरभावात्। प्रागभावे च भावत्वे सति कृतकत्वं नास्ति, कृतकत्वभावत्वयोरुभयोरभावात्। तत्र भावत्वे सति अनित्यत्वमपि नास्ति, सत्यप्यनित्यत्वे भावत्वाभावात्। न च भावत्वे सति चेद् अनित्यत्वं साध्यम्, एतावता भावत्वे सति कृतकत्वादित्यत्र भावत्वे सतीति विशेषणस्य साध्याविशिष्टाभावत्वस्य स्वरूपेणासाध्यत्वात् विशिष्टस्य साध्यता। उभयसाध्यत्वेऽन्यतरसाध्ये चोभयसाध्यत्वे यथा शब्दोऽनित्यत्वे सति कृतकः सामान्यवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वात् घटवत्। अन्यतरसाध्यं यथा विवादाध्यासितानि भूतानि कार्याणि परमाण्वनित्यत्वे सति कम्पवत्त्वाद्, घटादिवदिति। अत्र भूतानि सिद्धान्येव कार्यत्वं चासिद्धमिति। अत्रापि प्रकृते भावत्वं सिद्धमेव, अनित्यत्वं त्वसिद्धमिति विशिष्टस्यासिद्धिः।

**[५] एतदपि न,** सिद्धस्य भावत्वस्य साध्यानित्यत्वविशेषणत्वेन निःप्रयोजनतया अनुपादानात्। भावत्वे सति अनित्यत्वस्य विपर्ययेण भावत्वे सति कृतकत्वस्याव्याप्तविपर्ययत्वाच्च। तथा हि– कृतकत्वविपर्ययेणैव भावत्वे सत्यनित्यत्वस्य विपर्ययः सिद्ध्यति, न तु भावत्वविशिष्टकृतकत्वविपर्ययेण, भावत्वविशिष्टकृतकत्वविपर्ययस्यासमर्थविशेषणत्वात्। तथा हि– यन्न कृतकं तद्भावत्वे सति नित्यं न भवतीति वाच्ये यद्भावत्वे सति कृतकत्वं न भवति तद्भावत्वे सति नानित्यमित्युच्यमाने भावत्वे सतीति विशेषणस्य निःप्रयोजनता स्यात्। तस्मात्कृतकत्वमेव यथोक्तं पूर्वमुपाधित्वेन मा प्रसाङ्क्षीदित्युच्यते **मिथः सम्बन्धशून्ययोरिति** [१] । अस्यार्थः-**मिथः=** अन्योन्यं **सम्बन्धशून्ययोः=** व्याप्तिशून्ययोर्मध्ये **यदत्ययः साध्याभावाविनाभावी स** उपाधिः इति सम्बन्धः।

**[६] ननु** यदा मीमांसकेन क्षित्यादीनामकर्तृकत्वे शरीराजन्यत्वादिति हेतुरुपादीयते तदा नैयायिकैरकार्यत्वमुपाधिरभिधीयते। न च शरीराजन्यत्वाकार्यत्वयोर्मिथः सम्बन्धो नास्ति। तथा हि– यदकार्यं तच्छरीराजन्यम्, यथा व्योमादि। भट्टैश्च शरीरजन्यत्वमुपाधिरभिधीयते कार्यत्वहेतौ तदपि कार्यत्वेन व्याप्तमेव। तथा हि– यच्छरीरजन्यं तत्कार्यम्, यथा घटादिरिति। तत्कथमुच्यते-**मिथः सम्बन्धशून्ययोः? इत्यत्र ब्रूमः**, मिथःसम्बन्धशून्ययोरित्यस्यायमर्थः-मिथोऽन्योन्यसम्बन्धः। स च व्याप्यव्यापकभावः। यथाकथञ्चित्सम्बन्धेन शून्यत्वाभावात्। व्याप्यव्यापकभावः चोपाधित्वाभिमतव्यापकत्वेतरहेतुव्याप्यत्वाभ्यां तेन शून्ययोरिति।

**[७]** न च कार्यत्वं शरीरजन्यत्वव्याप्तम्, क्षित्याद्यादावेव व्यभिचारात्। नापि शरीराजन्यत्वमकार्यत्वव्याप्तम्, ततोऽयुक्तमेवोपाधित्वेनाभिधानमनयोः। सामान्यवत्त्वे सत्यस्मदादिबाह्यप्रत्यक्षत्वेनानित्यत्वे साध्ये शाकाद्याहारपरिणतिपूर्वकत्वम् एवोपाधिः स्यात्। न हि तेन सामान्यवत्त्वे सत्यस्मदादिबाह्यप्रत्यक्षत्वं व्याप्यते, गौरपुरुषादिषु व्यभिचारात्। **(शं)** अस्ति च तत्र क्वचित् साध्यश्यामत्वविपर्ययव्याप्तविपर्ययत्वम्, **इत्यपि न,** साध्यपदेन यथासम्भवं प्रकृतसाध्यस्यापेक्षितत्वात्। एकसाध्याविनाभावे एतत्स्वरूपसङ्कीर्तनम्,न तु लक्षणं व्यावर्त्याभावात्। अस्यार्थः-परेण हेतूकृतस्य यत्साध्यं तेनैकेन साध्येन सह उपाधित्वाभिप्रेतस्य यद्यविनाभावः स्यात् तस्मिन् सति स उपाधिरिति योजना, न तु द्वयोरविनाभावे। यतोऽनौपाधिकसम्बन्धोऽविनाभावः। न च मैत्रतनयत्वादीनां सोऽस्ति तादृशः।

**[८]** तदयमर्थः सङ्क्षेपेणोच्यते। उपाधिः स यः साधनाव्यापकः साध्यविपर्यय इति। यद्वा साधनाव्यापकत्वे सति साध्यव्यापकः। साध्यव्यापक एव तत्साध्यविपर्ययाव्यभिचारिविपर्ययो भवति।

---

[१] एकसाध्याऽविनाभावे मिथःसम्बन्धशून्ययोः। साध्याभावाविनाभावी स उपाधिर्यदत्ययः।

साध्यपदेन च प्रकृतसाध्यविशेष एवापेक्षितः। ततश्च यत्किञ्चित्साध्यविपर्ययाव्यभिचारिविपर्ययेन सामान्यवत्त्वे सत्यस्मदादिबाह्यप्रत्यक्षत्वादौ शाकाद्याहारपरिणतिपूर्वकत्वादिति नोपाधित्वेन उद्भावनीयम्, छलप्रसङ्गात्। साधनपदेन च प्रकृतसाधनान्तरम्। एतावता सामान्यवत्त्वादिहेतुनानित्यत्वे साध्ये रसवत्त्वादिसाधनाव्यापकत्वेन कृतकत्वमुपाधित्वेन नोद्भावनीयम्, कृतकत्वेनानित्यत्वे साध्ये कृतकत्वमेव साध्यव्यापकतया साधनीभूतस्वाव्यापकतयोपाधिः स्यादिति अन्तरशब्दव्यावर्त्यम्। श्लोके तु **मिथःसम्बन्धशून्ययो**रिति द्विवचनेन निराकृतम्।

**[९] ननु** एतत्सर्वलक्षणं शाकाद्याहारपरिणतिपूर्वकत्वमेव नास्ति, तस्य मैत्रतनयत्वव्यापकत्वात्, तत्कथं तस्योपाधित्वम्?। तथा हि– यो मैत्रतनयः स शाकाद्याहारपरिणतिपूर्वकः, यथा परिदृश्यमानः। **न च** देशान्तरवर्तिनि **संशयः**, परिदृश्यमाने मैत्रतनयस्तोमे व्याप्तौ गृहीतायां तत्रापि शाकाद्याहारपरिणतिपूर्वकत्वानुमानात्, **अत्रापि ब्रूमहे**, भवेदेवं यदि मैत्रतनयत्वशाकाद्याहारपरिणतिपूर्वकत्वयोर्व्याप्तिः स्यात्, सैव तु नास्तीति। तथा हि– अनौपाधिकः सम्बन्धो व्याप्तिः। मैत्रतनयत्वशाकाद्याहारपरिणतिजत्वसम्बन्धे च श्यामत्वमेवोपाधिरस्तीति।

**ननु** श्यामत्वे उपाधिलक्षणमेव नास्ति। तथा हि– साध्यव्यापकः साधनाव्यापकश्चोपाधिः, न चास्य साध्ये व्यापकता विद्यते। एवं हि सा स्यात्- यदि यच्छाकाद्याहारपरिणतियोगि तत् श्यामत्वयोगि भवेत्। न चैवं श्यामतायाः, कार्यत्वात्। शाकाद्याहारपरिणतेः कारणत्वात्। एकस्मिन् क्षणे श्यामत्वमन्तरेणैव तदवस्थानात्, **न**, कार्यस्यापि व्यापकत्वदर्शनात्। तथा हि– कार्यमन्तरेणाप्येकस्मिन् क्षणेऽवतिष्ठमाना कारणसामग्री कार्येण व्याप्यते।

**[१०] ननु** तथापि श्यामत्वस्य साधनाव्यापकत्वं कथम्? मैत्रतनयत्वेन श्यामत्वसम्बन्धे शाकाद्याहार-परिणतेरेवोपाधित्वादिति, **चेत्,** हेतौ इतरेतराश्रयता तर्हि दुर्निवारैव। तथा हि– श्यामत्वस्य मैत्रतनयत्वाव्यापकत्वेन मैत्रतनयत्वशाकाद्याहारपरिणतिजत्वसम्बन्धोपाधित्वे मैत्रतनयत्वाव्यापकत्वेन शाकाद्याहारपरिणतिजत्वम् उपाधिः, मैत्रतनयत्वश्यामत्वसम्बन्धे सति च तदुपाधित्वे श्यामत्वं मैत्रतनयत्वाव्यापकत्वेन मैत्रतनयत्व शाकाद्याहारपरिणतिजत्वसम्बन्धोपाधिरिति। न हि वयं शाकाद्याहारपरिणतेरुपाधित्वं ब्रूमः, अपि तर्हि निराकर्तुं न शक्यत इति ब्रूमहे। तथा हि– मैत्रतनयत्वं यदा श्यामत्वव्याप्तं स्यात् तदा श्यामत्वस्य व्यापकत्वात् शाकाद्याहारपरिणतिजत्वमैत्रतनयत्वयोः सम्बन्धेऽनुपाधित्वम्। सति च तस्मिन् मैत्रतनयत्वव्यापकत्वात् शाकाद्याहारपरिणतेरनुपाधित्वे श्यामत्वस्य व्यापकत्वमिति। एतावतैव चाग्रहणं व्याप्तेरिति।

**[११] ननु** एवं सति सामान्यवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वेनानित्यत्वे साध्ये कृतकत्वमुपाधिर्भवत्येव तस्यापि साधनाव्यापकत्वात्। तथा हि– कृतकत्वेन सह सामान्यवत्त्वादिहेतोः सम्बन्धेऽनित्यत्वमुपाधिः। अनित्यत्वेन च तत्सम्बन्धे कृतकत्वमिति, **न**, कृतकत्वस्याव्यापकत्वाभिधाने दोषप्रसक्तेः। तथा हि– यदि कृतकत्वमव्यापकं स्यात् कृतकत्वानुमानमुच्छिद्य(द्ये)त। तथा च न वणिग्वीथीवर्तमानघटादिषु कृतकत्वं निश्चीयते। न च प्रत्यक्षेण प्राग् सतः सत्तासमवायस्य कृतकत्वस्य निश्चयः, प्रागभावस्यासत्वात्। न च विशेषणतया प्रतिभासने प्रागप्रतीतत्वादिति।

**[१२] (शं)** तज्जातीये प्रतीत इति चेत्, न, तस्याविशिष्टप्रतीत्यनङ्गत्वात्। सुरभिचन्दनमित्यत्रापि यस्मिन्नेव चन्दनशकले गन्धप्रतीतः(तिः) तदेव गन्धविशिष्टतया चक्षुषा गृह्यते। अन्यथा चेत्, तस्य

पूर्वकालसम्बन्धितयानुभवे तज्जातीये पुरुषान्तरेऽपि प्रत्यभिज्ञानं स्यात्। तस्मात्कृतकत्वे साध्ये नानित्यत्वमुपाधिरिति।

**ननु** तथापि शाकाद्याहारपरिणतिपूर्वकत्वं नोपाधिः साधनव्यापकत्वात्। तथा हि– यो मैत्रतनयः स श्यामत्वे सति शाकादिपरिणतिपूर्वकः, यथा परिदृश्यमान इति सुकरमेव व्याप्तिग्रहणं, **न**, अन्योन्यमुपाधित्वात्। शाकाद्याहारपरिणत्यङ्गे श्यामत्वस्योपाधित्वं श्यामत्वाङ्गे च शाकाद्याहारपरिणतेरिति। **न च** साध्यस्यानुपाधिता, अनुमानमात्रोच्छेदप्रसङ्गादिति **वाच्यम्**। उभयोः साध्यत्वे परस्परं व्यापकत्वसम्भवात्। सर्वत्र च तथाभावाभावात्।

**[१३] ननु** साधनव्यापकत्वे सति साध्यव्यापक इति लक्षणम्, उपाधिश्च लक्ष्योऽत्र। न च लक्षणप्रतीतिमन्तरेण लक्ष्यप्रतीतिः। लक्षणं चैतन्निश्चेतुं न शक्यम् इतरेतराश्रयदोषात्। तथा हि–हेतोः साध्यव्यापकं साध्यस्य तेन हेतुना व्याप्तिः। व्याप्तिश्च उपाध्यभाववान् सम्बन्धस्तस्मिन् प्रतीतः(तिः) उपाधिप्रतीतिः। उपाधिप्रतीतौ चोपाध्यभावप्रतीतिः, अभावस्य प्रतियोगिनिरूपणाधीनिरूपणत्वादिति।

आत्माश्रयोऽपि स्यात्। उपाधिनिश्चये सति साध्यव्यापकत्वादिप्रतीतिः।[१] साध्यव्यापकत्वादिति प्रतीतिः स्यात्। न चैवं शाकाद्याहारपरिणतिर्व्या(व्या)पकत्वं श्यामतां प्रति प्रतीयत एव उपाधित्वप्रतीतिमन्तरेणापि यतः। तथा हि– **यद्यप्युपाध्यभाववान्** सम्बन्धो व्याप्तिः **तथापि** न तस्योपाध्यभाववत्तया प्रतीतिमुपयोगिनीमङ्गीकुर्महे, अपि तर्हि आर्द्रेन्धनस्थानीयव्यभिचारशङ्काजनककिञ्चिदभाववत्तया। तथा च नात्माश्रयदोषोऽपि। न ह्युपाधित्वप्रतीत्यधीना व्यापकत्वप्रतीतिः। अपि तर्हि सम्बन्धिद्वयगतव्यभिचारशङ्काजनककिञ्चित्प्रतीत्यधीना। व्यभिचारशङ्काजनकश्चार्द्रेन्धनस्थानीयः, तत्स्थानीयता चाविनाभूतसाध्यत्वे सति विनाभूतसाधनत्वं तद्विरहितश्च सम्बन्धो व्याप्तिरित्यपि निर्वक्तव्यम्। स च कोष्टगत्या उपाधिरिति **न च वाच्यम्।** साधनाव्यापकत्वे सति साध्यव्यापकत्वमेवोपाधित्वम्। तथा चाभेदात्किं कस्य साध्यं साधनं वा? इति, व्यवहारस्य साध्यत्वात्। तथा हि– विवादाध्यासितमुपाधिरिति व्यवहर्तव्यम्, साधनाव्यापकत्वे सति साध्यव्यापकत्वात्। न यदेवं न तदेवं, यथा धूमवत्त्वमालोकवत्त्वे, तथा चेदं, तस्मात्तथा। यद्वा प्रसिद्धत्वाप्रसिद्धत्वाभ्यां भेदोऽनैकान्तिकः सव्यभिचार इतिवत्प्रसिद्धं साधनाव्यापकत्वे साध्यव्यापकत्वम्, अप्रसिद्धं चोपाधित्वमिति। सोऽयमस्य श्लोकस्यार्थः-

**एकसाध्याविनाभावे मिथःसम्बन्धशून्ययोः। साध्याभावाविनाभावी स उपाधिर्यदत्यय इति॥**
**समासमाविनाभावावेकत्र स्तो यदा तदा। समेन यदि नो व्याप्तस्तयोर्हीनोऽप्रयोजकः॥**

**[१४] समासमावि[ना]भावावि**ति। समश्चासमश्च समासमौ समासमावविनाभावौ ययोः तौ समासमाविनाभावौ। एकस्य समो विनाभावोऽन्यस्यासमः साध्येन श्यामत्वादिना। समत्वं च यत्र साध्यं श्यामत्वादि तत्र शाकाद्याहारपरिणत्यादिः। यत्र शाकाद्याहारपरिणत्यादि तत्र श्यामत्वादीति। समाविनाभावं शाकाद्याहारपरिणत्यादि। असमत्वं च यत्र मैत्रतनयत्वादि तत्र श्यामत्वादि, यत्र श्यामत्वादि न तत्र नियमेन मैत्रतनयत्वादि, मैत्रतनयत्वादिकमन्तरेणापि चैत्रतनयादौ श्यामत्वस्य दर्शनात्। अविनाभावश्च प्रमीयमाणव्यभिचाराभावः। न हि मैत्रतनयत्वम् अविनाभूतं श्यामत्वेन, अनौपाधिकसम्बन्धस्याविनाभावस्य मैत्रतनयत्वेऽभावात्। शाकाद्याहारपरिणतेरेवोपाधित्वात्। व्यभिचाराज्ञानं च नास्ति, उपाधिदर्शनेन व्यभिचारशङ्कया जातत्वात्। शङ्का च संशयः, स च ज्ञानमेवेति प्रशब्दोच्चारणम्, तौ समासमाविनाभावौ **यदैकत्र स्तो** भवतस्तिष्ठत इति यावत्। एकत्रेति दृष्टान्ते

---

[१] अत्रत्यः कश्चित् पाठः भ्रष्टः प्रतिभाति।

परिदृश्यमानमैत्रतनयस्तोमादौ **तयो**र्मध्ये **हीनो**ऽसमाविनाभावो मैत्रतनयत्वादि**रप्रयोजको** न साध्यं साधयतीत्यर्थः। **असमाविनाभाव**_इति। येन विनापि साध्यं श्यामत्वाद्यवतिष्ठते। अस्ति च मैत्रतनयत्वं विनापि चैत्रतनये श्यामत्वम्।

**[१५] ननु** शब्दोऽनित्यः सामान्यवत्त्वे सत्यस्मदादिबाह्यप्रत्यक्षत्वात् घटवदित्यत्र घटो दृष्टान्तः। तत्र विशिष्टकृतकत्वं चास्ति सामान्यवत्त्वे सत्यस्मदादिबाह्यप्रत्यक्षत्वं च। त(य)त्र विशिष्टकृतकत्वं तत्रानित्यत्वम्। स्वविनाशोपलक्षितसत्ताविशिष्टत्वं च कृतकत्वस्य भावत्वे सतीति विशेषणाद्वा प्रागसतः सत्तायोगित्वरूपेण वा। न च सामान्यवत्त्वे सत्यमस्मदादिबाह्यप्रत्यक्षत्वं समाविनाभावम्। तथा हि– **यद्यपि** यत् सामान्यवत्त्वे सत्यमस्मदादिबाह्यप्रत्यक्षं तदनित्यं **तथापि** यदनित्यं तत् सामान्यवत्त्वे सत्यमस्मदादिबाह्यप्रत्यक्षमिति नियमो नास्ति, द्व्यणुके व्यभिचारात्, द्व्यणुकमनित्यं भवत्येव न सामान्यवत्त्वे सत्यमस्मदादिबाह्यप्रत्यक्षम्। तथा च सामान्यवत्त्वे सत्यस्मदादिबाह्यप्रत्यक्षत्वप्रयोजकः स्याद् इत्यत उक्तम्- **समेन यदि नो व्याप्त** इति। **समेन** समाविनाभावेन साध्यश्यामत्वादिव्यापकेन साध्यश्यामत्वादिव्याप्येन च यदि न व्याप्तः। मैत्रतनयत्वं च न समाविनाभावेन शाकाद्याहारपरिणतिपूर्वकत्वेन व्याप्यते। तच्चोक्तमेव। सामान्यवत्त्वे सत्यस्मदादिबाह्यप्रत्यक्षत्वं च समाविनाभावेन कृतकत्वेन व्याप्यत एव। तथा हि– यत्तदविशिष्टं तद्विशिष्टकृतकत्वयोगि यथा घटः। तस्मात्सामान्यवत्त्वे सत्यस्मदादि बाह्यप्रत्यक्षत्वं नाप्रयोजकम् इति श्लोकार्थः।

**[१६]** एतच्चैवंरूपशाल्यप्यप्रयोजकम्, नन्वे(न त्वे)वंरूपशाल्येव, तथा सति शरीराजन्यत्वमप्रयोजकं न स्यात्, तस्यासमाविनाभावत्वाभावात्। तथा हि– यच्छरीराजन्यं तदकर्तृकं यथा व्योम। यदकर्तृकं तच्छरीराजन्यं यथा व्योमैव। तस्मात्परमार्थतो विद्यमानोपाधिकमप्रयोजकम्। तच्च सर्वव्यापकम्। श्यामत्वे साध्ये शाकाद्याहारपरिणतिरुपाधिरिति पुरुषत्वैकार्थसमवायिनि श्यामत्वे शाकाद्याहारपरिणतिर्हि न श्यामतामात्रव्यापिका, घटश्यामत्वस्यातथाभावात्।

**[१७] यच्च** साधनाव्यापकत्वे सति साध्यकारणत्वमुपाधित्वम्, **तन्न**, श्रुत्यन्तःपातिनी हिंसाधर्मो हिंसात्वाद् ब्राह्मणहिंसावदित्यत्र निषिद्धत्वमुपाधिः। न च निषिद्धत्वेनाधर्मत्वं क्रियते, अपि तु ज्ञाप्यते। तथा चानुपाधित्वं स्यात्। तथा ह्यधर्मत्वमधर्मसाधनत्वम्, तच्चाधर्मोपलक्षितं स्वरूपमेव। निषिद्धत्वं चाकरणीयताप्रतिपादकवेदवाक्यजनितप्रतिपत्तिविषयत्वम्, न च तेन हिंसा क्रियते। नाप्युपलक्षणमधर्मः क्रियत इत्यलमतिविस्तरेण॥

**॥इति पण्डिताचार्यश्रीउदयनस्योपाधिप्रकरणं सम्पूर्णम्॥**

४

बाढेश्वरकृतम्

# ॥उपाधिप्रकरणविडम्बनम्॥

[१] प्रणम्य शिरसा रामं उपाधिजनकाच्युतम्। उपाधेर्लक्षणं वक्ष्ये न्यायशास्त्रानुसारतः॥१॥

**ननु** उपाधेः किं लक्षणम्? न तावत् साध्यव्यापकत्वे सति साधनाव्यापकत्वम्, आत्माश्रयात्। साध्यव्यापकत्वं हि साध्येन सहानौपाधिकः सम्बन्धः, स चोपाधिज्ञानाधीनज्ञानः। किञ्च, साध्यपदेन सकलसाध्याभिधानं व्यक्तिविशेषस्य वा? नाद्यः, साधनस्यापि क्वचित् साध्यत्वेन तद्व्यापकत्वातद्व्यापकत्वाभ्यां विरोधात्। नापि द्वितीयः, अननुगमात्। किञ्च, सदनुमाने तदभावस्यापि निर्णेतुमशक्यत्वात् तत्साध्यव्यापक-तत्साधनाव्यापकधर्मसद्भावेनासद्भावेन च प्रतिषेधानर्हत्वात्, **अत्रोच्यते**, उपाधिसामान्यलक्षणे प्रश्नो विशेषो(षे) वा? तत्र सामान्यलक्षणं तावदत्यन्ताभावप्रतियोगित्वम्। प्रतियोगित्वमात्रस्य प्रमेयत्वादिसाधारण्यात् तेषां सकलधर्मव्यापकतया साधनव्यापकत्वेनानुपाधित्वात्।

[२] **ननु** कथं प्रमेयत्वादीनां सकलधर्मव्यापकत्वम्? तेषां स्वस्वप्रवृत्तिज्ञेयत्वाद्यव्यापकत्वात्। व्यापकत्वं हि तदा स्याद् यदि यत्र यत्र ज्ञेयत्वं तत्र तत्र प्रमेयत्वं वर्तते। ज्ञेयत्वं हि प्रमेयत्वेऽपि वर्तते, न च तत्र प्रमेयत्वमिति, **तन्न,** प्रमेयत्वस्यापि प्रमेयवृत्तित्वात्। **(शं)** तथा सत्यात्माश्रयः स्यादिति चेन्न, तस्यादोषत्वात्, उत्पत्ति-ज्ञप्तिप्रतिबन्ध एव तस्य दूषणत्वात्, अन्यथा केवलान्वयिनो भङ्गप्रसङ्गात्, तत्राप्यात्माश्रयभयेन साध्यस्यैव विपक्षत्वस्वीकारान्मेयत्वं मेयत्वाक्रान्तम् अभिधेयत्वादिति प्रमाणसम्भवाच्चेति।

[३] विशेषलक्षणं तु साध्यसमव्यापकत्वे साधनाव्यापकत्वमित्यपरे। साध्यव्यापकत्वे साधनाव्यापकत्वमित्यन्ये। न च पूर्वोक्तमात्माश्रयत्वम्, साध्यव्यापकत्वस्य साध्यवन्निष्ठात्यन्ताभावाप्रतियोगित्वेन निर्वचनात्।

[४] यदपि दूषणमुक्तं **साध्यपदेन** इत्यादि तदपि न युक्तम्, साध्यपदेन व्यक्तिविशेषस्यैवापेक्षितत्वात्। न चाननुगमो विशेषलक्षणात्वादस्य। नापि सदनुमाने उपाधेरभावो निर्णेतुमशक्यः, यावन्तः साध्यव्यापकाः धर्माः ते सर्वेऽपि साधनव्यापकाः यावन्तो वा साधनाव्यापकास्ते सर्वेऽपि साध्याव्यापका इत्यादिना आकारेण तस्य निरूपयितुं शक्यत्वात्।

[५] वस्तुतस्तु इदमपि न विशेषलक्षणं युक्तम्, विषमव्याप्तिकाव्यापनात्, समपदवैयर्थ्याच्च। विषमव्याप्तिकस्यापि प्रयोजकत्वात्। तथा हि–व्यभिचारोन्नायकत्वेन वा व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिज्ञापनेन वा यथा समव्याप्तिकस्य दूषणत्वं तथा विषमव्याप्तिकस्यापि प्रयोजकत्वात्।

[६] **न च** यदि विषमव्याप्तिकः स्यादुपाधिः तदा पक्षेतरत्वमुपाधिः स्यात्, विषमव्याप्तिकानुपाधित्वे हि विषमव्याप्तिकत्वेन पक्षेतरत्वस्यापि निरासः सम्भवतीति **वाच्यम्**। यतः शब्दोऽभिधेय इत्यादौ

अशब्दत्वादेः पक्षेतरस्य तथा सत्यनिरासप्रसङ्गात्, तस्य विषमव्याप्तित्वकार्याभावात्। पर्वतेतरवह्निमत्त्वादेश्च तत्रापि सदुपाधित्वप्रसङ्गात्। **(शं)** पर्वतेतरवह्निमत्त्वादेः व्यर्थविशेषणत्वात् नोपाधित्वमिति **चेन्न**, व्यर्थत्वं हि निःप्रयोजनत्वं वा स्यात् व्यभिचारावारकत्वं वा। तत्र निःप्रयोजकत्वमसिद्धं, साधनव्याप्तिपरिहारस्यैव प्रयोजनत्वात्।

**[७] [न च]** व्यभिचारावारकविशेषणरहितव्याप्येनैव सह व्यापकस्य व्याप्तिसम्भवादिति **वाच्यम्**। यतः सम्भवादिति कोऽर्थः? किं व्यभिचारावारकविशेषणवतापि सह व्याप्तेः शक्यज्ञानत्वात्। किञ्च, इदमनित्यं देवदत्तकृतकत्वादित्यत्र व्यभिचारावारकविशेषणवतापि व्याप्येन सह व्याप्तिरस्ति, गृह्यते च। न हि सम्भवति सामान्यं कृतकत्वमव्यभिचारि विशेषस्तु देवदत्तकृतकत्वं व्यभिचारीति।

[८] साध्यव्यापकत्वे साधनाव्यापकत्वमपि न विशेषलक्षणं युक्तम्, समवायादेः सम्बन्धत्वादिना समवेतत्वादौ साध्ये कार्यत्वादिसाध्यसाधनसम्बन्धव्यापकोपाध्यव्यापकत्वात्। तथा हि–व्यभिचारोन्नये तावदुपाधित्वमभिमतम्, साध्यसाधनसम्बन्ध-व्यापकस्य पक्षे सत्त्वाद् व्याप्यस्य साध्यसाधनसम्बन्धस्याभावोऽवसीयते। साध्यसाधनसम्बन्धाभावश्च पक्षे साध्याभावेन वा स्यात्, साधनाभावेन वा? तत्र साधनं पक्षे उभयवादिसिद्धम्। अतः तत्सम्बन्धिनः साध्यस्याभावोऽवसीयते।

[९] **यत्पुनरिहैव कैश्चिदभिहितम्**-साध्यसाधनसम्बन्धव्यापकोपाधिनिवृत्तौ साध्यसाधनसम्बन्धनिवृत्तिः तदा पक्षे स्याद् यदि पक्षे साध्याभावः साधनभावो वा निर्णीयते। तत्र यदि साध्याभावः, तदानैकान्तिकत्वमुपजायते। अथ साधनाभावस्तदासिद्धिरिति, **तदसङ्गतम्,** यदि पक्षे साधनस्य निवृत्तिस्तदा कथं साध्यसाधनसम्बन्धव्यापकस्योपाधित्वम्? व्यभिचारोन्नायकत्वेनोपाधित्वस्य सम्मतत्वात्। एतस्य च भवदुक्तप्रकारेणासिद्ध्युन्नायकत्वात्, तस्मादेतस्यापि साधनाव्यापकत्वात् साधनवद् व्यावृत्तत्वं वक्तव्यम्। तच्च तदा स्याद्यदि साध्यं विहाय साधनमन्यत्र स्यात्। यदि साध्यवन्मात्रवृत्त्येव साधनं तदा साध्यसाधनसम्बन्धव्याप्नुवन् उपाधिसाधनमपि व्याप्नुयात् तदा कथमयं साधनाव्यापक? इति समव्याप्तिकोपाधिवन्नेयः। तस्मात् साध्यसाधनसम्बन्धव्यापकः साधनाव्यापक उपाधिरिति लक्षणमुन्नेयम्।

**[१०] न च** विरुद्धोपाध्यसङ्ग्रहः, तत्र साध्यसाधनसम्बन्ध एव नास्ति कुतस्तद्व्यापकत्वमुपाधेः? इति **वाच्यम्**। यस्मात्प्रतिसाध्यमेतस्याननुगतस्य विशेषलक्षणस्याभिधानविरुद्धसाध्यव्यापकसाधनाव्यापकमेव लक्षणम्, तत्र तावन्मात्रस्यैव समस्तोपाधिव्यापकत्वात्। **(शं)** पक्षेतरे उपाधिलक्षणमिदमतिव्यापकमिति **चेन्न,** यदि वस्तुतस्तत्र पक्षे साध्यमस्ति, तदा साध्याव्यापकत्वादेव नास्योपाधिता, अथ नास्ति तदोपाधिरेवेति। एवं च तदतिव्यापकतापरिहृता।

**[११] यद्यनु(दप्य)**सदनुमाने कृते पक्षेतरो वादिना **उद्भाव्यते** तदानुमानमात्रोच्छेदकत्वेनैव प्रथमत एव समयः कर्तव्यः। पक्षेतरत्वं तु यदि पक्षमात्रव्यावर्तकत्वं तदा पर्वतेतरवह्निमत्त्वादेः पक्षेतरस्य न स्यात्पक्षेतरत्वम्। अथ पक्षमात्रव्यावर्तकविशेषणत्वं तदा च पर्वतेतराव्यावर्तकस्य पर्वतेतरत्वादेर्न पक्षेतरत्वं स्यात्। न स्याच्च साधनव्याप्तिपरिहारमात्रप्रयोजनविशेषवतः शरीरजन्यत्वादेः।

[१२] **अथ** शरीरजन्यत्वादि(दिः) न पक्षेतरस्तस्य सर्वसदनुमानासाधारणत्वात्। पर्वतेतरवह्निमत्त्वादिस्तु सर्वसाधारणत्वेन पक्षेतरः स्वीक्रियते इति, **मैवम्**, पर्वतेतरवृत्तिवह्निमत्त्वादेः साधनव्याप्तिपरिहारमात्रप्रयोजनविशेषणवतः सर्वत्र वक्तुं सुकरत्वात्।

[१३] **अथ** साधनव्याप्तिपरिहारप्रयोजनविशेषणवत् तत्, **तदा(द)पि न**, पक्षमात्रव्यावर्तकस्य पर्वतेतरत्वादेरसङ्ग्रहात्।

[१४] **न च** पर्वतेतरत्वादावपीतरत्वमात्रेणासिद्धिः साध्यसाधनद्वये.पर्वतविशेषणं साधनव्याप्तिपरिहारेणैव प्रयोजनवदिति हेतुव्याप्तिव्यावृत्तिमात्रप्रयोजनविशेषणवदिति **वाच्यम्**। यतः सदुपाधौ श्रावणेतरत्वादावपीतरत्वमात्रेणैव साध्यव्याप्तौ सिद्धायां इतरवदस्य साधनाव्याप्तिपरिहारमात्रं प्रयोजनमिति तस्य न स्यादुपाधित्वम्। किञ्च, यत्रेतरत्वादि विशेषणमस्ति तस्य भवतु यथा कथञ्चिदपि पक्षेतरत्वम्, यत्र पुनरभावोऽभिधेयः प्रमेयत्वादिति साध्यते तदा पक्षे पक्षेतरत्वं न स्यात्, तत्र सर्वथापि साधनव्याप्तिपरिहारमात्रप्रयोजकविशेषणत्वाभावात्। तस्मात् संसर्गाभावप्रतियोगिनः साधनव्याप्तिपरिहारार्थं विशेषणम्। तद्वत् पक्षमात्रव्यावर्तकयोरन्यतरः पक्षेतर इति यथाकथञ्चित्॥

**॥इति बाढेश्वरकृतोपाधिप्रकरणविडम्बनं सम्पूर्णम्॥**

५

## ॥उपाधिखण्डनम्॥

**[१]** अनौपाधिकः सम्बन्धो व्याप्तिरिति यः प्राह स प्रष्टव्यस्तथा ह्युपाधेरेव तावत् किं लक्षणम्? साध्यव्यापकत्वे सति साधनाव्यापक उपाधिरिति। शब्दोऽनित्यः कृतकत्वात् घटवदिति। अत्र सावयत्वोपाधिनिषेधाय प्रथमं पदम्। पृथिवी अनित्या सावयवत्वादित्यत्र कृतकत्वोपाधिं निषेद्धुं द्वितीयपदम्। तथा चाह-

*एकसाध्याविनाभावे मिथः सम्बन्धशून्ययोः। साध्याभावाविनाभावि स उपाधिर्यदत्ययः॥१॥*

**(उदयनाचार्य)**

[२] स द्विधा - निश्चितः शङ्कितश्च। यदाहुः-

*यावच्चाव्यतिरेकित्वं शतांशेनापि शक्यते। विपक्षस्य कुतस्तावद् हेतोर्गमनिकाबलम्॥२॥*

**[३]** उपाधिधर्मभूता व्याप्तिर्जपाकुसुमरक्तते च स्फटिके साधनाभिमते चकास्तीत्युपाधिरसावुच्यते। तदाहुः

*अन्ये पर[प्र]युक्तानां व्याप्तीनामुपजीवकाः। तैर्दृष्टैरपि नेष्टव्या व्यापकांशावधारणा॥३॥* इति।

**[४]** तदसुन्दरम्, लक्षणस्यातिव्यापकत्वात्। क्षित्यादिकं सकर्तृकं कार्यत्वाद् घटवदित्यत्र हि पक्षेतरत्वं साध्यव्यापकं भवति, सकर्तृकघटादौ सर्वत्र भावात्। साधनाव्यापकं च पक्ष एव, कार्यत्वे सति पक्षेतरत्वाभावाद् इति तत्रातिव्याप्तिः।

**[५] ननु** न पक्षेतरोपाधेः साध्यव्यापकत्वं निश्चितम् पक्षे साध्यसन्देहेऽप्युपाध्यभावस्य निश्चितत्वेन साध्यं प्रति व्यतिरेकान्वयव्याप्त्यभावात्,**मैवम्**, तथा सति पक्षे साध्यसद्भावसन्देहेऽपि साधनसद्भावनिश्चयेन हेतोः शङ्कितव्यभिचारत्वात् सर्वानुमानोच्छेदापत्तेः। तस्माद्यथा पक्षादन्यत्र हेतोर्व्यतिरेकनिश्चयोऽनुमानोच्छेदभयाद् अवश्यमेष्टव्यस्तथा पक्षेतरोपाधेरपीति सिद्धं साध्यव्यापकत्वम्।

**[६] (शं)** तर्हि पक्षेतरोपाधि व्युदासाय साध्यसमव्याप्तिरिति समपदं गृह्णिमो। न हि यत् पक्षेतरत् तत् सकर्तृकमिति व्याप्तिरस्ति,व्योमादौ व्यभिचारात्, **(स)** इति मा वादीः, तथापि तत्रैवातिव्याप्तेः। शब्दोऽभिधेयः प्रमेयत्वादित्यत्र पक्षेतरोपाधेरपि समव्याप्तिसद्भावात्।

**[७] (शं)** पक्षेतरत्वव्यतिरिक्तत्वे सतीति विशिष्मः, **(स)** इति चेन्न। तेजोद्रव्यमनुष्णं रूपित्वात् घटवदित्यत्र पक्षे साध्याभावस्य प्रत्यक्षतया हेतोः प्रत्यक्षविरुद्धत्वम्। त(य?)त्र रूपित्वादनुष्णत्वसम्बन्धेऽतेजस्त्वं पक्षेतररूप एवोपाधिर्बाधिनोन्नीयते तत्राव्याप्तिः, पक्षेतरव्यतिरिक्तत्वे सतीति विशेषणाभावात्। **न च** पक्षेतरत्वान्नायं सदुपाधिरिति **वाच्यम्**। प्रत्यक्षसद्भावेन उपाधिना अवश्यभाव्यत्वात्। यदि हि रूपित्वानुष्णत्वयोः सम्बन्धो ति(नि)रुपाधिरेव स्यात् तदा बाधोऽसम्भाव्य एव स्यादिति।

[८] **(शं)** अथ अनन्यगतिकतया बाधानुन्नीतपक्षेतरत्वव्यतिरिक्तत्वे सतीति विशिष्यते **(स)** तदा व्याप्तिसिद्धौ साध्यव्यापकत्वसिद्धिस्तत्सिद्धौ चोपाधिसिद्धिस्तत्सिद्धौ च निरुपाधिसम्बन्धव्याप्तिसिद्धिरिति चक्रकापत्तिर्दुर्वारा। एवं साधनाव्यापकत्वेऽपि चक्रकं वाच्यम्।

अपि च, प्रध्वंसाभावकृतकत्वे सत्यपि शब्दस्य नित्यत्वमस्तु इत्यभिप्रायेण कश्चिदनुमानयति यथा- वर्णात्मकः शब्दो नित्यो ध्वन्यन्यत्वे सति श्रावणत्वात्, शब्दत्ववद् इत्यत्राकृतकत्वमुपाधिरित्यादिषु केषुचित् साधनाव्यापकत्वं निश्चेतुं शक्यताम्, न तु सर्वत्र तन्निश्चेतुं शक्यम्। देशान्तरगतो मैत्रपुत्रः श्यामः, मैत्रपुत्रत्वात्, दृष्टमैत्रपुत्रवदित्यत्र शाकाद्याहारपरिणामवत्त्वोपाधेः देशान्तर्गतमैत्रपुत्रे सदसत्त्वानिश्चयात्।

[९] **ननु** तर्ह्येतादृशस्थले शङ्कितोपाधित्वमस्तु। उक्तं हि प्रागपि–***स द्विधा निश्चितः शङ्कितश्चेति।*** यत्र तु साधनाव्यापकत्वादिलक्षणं निश्चितं तत्र निश्चितोपाधित्वम्, यथा वेदविहिता हिंसा अधर्मसाधनं हिंसात्वात्, ब्राह्मणहिंसावदित्यत्र निषिद्धत्वमुपाधिः। तथा वज्रादिर्लोहलेख्यः पार्थिवत्वात् काष्टवदित्यत्र शिथिलावयवत्वमुपाधिरित्यादि, **मैवम्,** (१) न तावत् शङ्कितोपाधिर्घटते, साधनव्याप्तेरेव निश्चयात्। तथा हि- देशान्तरगतो मैत्रपुत्रः शाकाद्याहारपरिणामवान् मैत्रपुत्रत्वात् सम्प्रतिपन्नवदिति हेतुनैव साधनव्यापकत्वनिश्चयात् शङ्काया एवानुदय इति। (२) नापि निश्चितोपाधिर्घटते। तथा हि– वज्रादिर्लोहलेख्यः पार्थिवत्वात् काष्टवदित्यत्र शिथिलावयवत्वं तव मते निश्चितोपाधिः। अयं चोपाधिरतीन्द्रियो लोहलेख्यत्वेनानुमेयत्वात्। अस्य च साधनव्यापकत्वपरिहाराय उपाध्यभाव इत्थं पक्षे साधनीयः-वज्रादिर्न शिथिलावयवोऽलोहलेख्यत्वात् व्योमवदिति। तत्र वज्रादिः शिथिलावयवः पार्थिवत्वात् काष्टवदित्यनेन सप्रतिपक्षत्वात्। साधनव्यापकत्वाभावो दुरवधारणः।

[१०] **(शं)** एवं तर्ह्यतीन्द्रियोपाधिः सर्वोऽपि शङ्कित एवास्तु इति चेन्न, अपसिद्धान्तापत्तेः। निषिद्धत्वशिथिलावयवत्वाद्युपाधीनां त्वया निश्चितत्वेन स्वीकृतत्वात्। किञ्च, साधनाव्यापकत्वे सति साध्यव्यापक इति लक्षणे शाकाद्याहारपरिणितित्वमुपाधिः श्यामत्वं साध्यं न व्याप्नोति, इन्द्रनीलादौ व्यभिचाराद् इत्यव्यापकतादोषः।

[११] **न[नु]** मैत्रपुत्रहेतोः पुरुषधर्मताबलात् पुरुषश्यामत्वमेव पर्यवसितं साध्यम्, तच्चोपाधिना व्याप्तमेवेति **चेत्**, सत्यम्, उपाधेर्व्याप्तिभञ्जकत्वेन व्याप्तौ वक्तव्यत्वाद् व्याप्तिर्विचारणीया। सा च यो मैत्रपुत्रः स श्याम इत्येव, न तु यो मैत्रपुत्रः स पुरुषः श्याम इति, पुरुषविशेषेण(विशेषणे?) वैयर्थ्यात्।

[१२] **अथ** साध्यव्यापकत्वशब्देन यत्र साध्यं तत्रोपाधिरित्येवंविधव्याप्तिर्न विवक्ष्यते, किन्तु यत्र साध्यसाधनसम्बन्धः तत्रोपाधिरिति। तथा च नेन्द्रनीले व्याप्तिभङ्गः इति **चेत्**, मैवम्, तथा सति चक्षुस्तैजसं रूपादीनां मध्ये रूपस्यैवाभिव्यञ्जकत्वात् दीपवदित्यत्र उद्भूतरूपित्वमुपाधिः स्यात्। यत्रोक्तसाध्यसाधनयोः सम्बन्धस्तत्रोद्भूतरूपित्वमिति साध्यव्याप्तिसद्भावात्। साध्यमात्रव्याप्तौ तु नैवम्, तेजोद्व्यणुकेन व्यभिचारात्।

किञ्च, जीवच्छरीरमनेकात्मयुक्तं प्राणादिमत्त्वाद् व्यतिरेके व्योमवदित्यादौ केवलव्यतिरेक्याभासे व्याप्तिभङ्गायावश्यं कश्चिदुपाधिरेष्टव्यः अन्यथा निरुपाधिसम्बन्धस्य आभासत्वासम्भवात्। तथा च सत्यस्मिन्ननुमानेऽन्वयव्याप्तावुपाधिरिष्यते व्यतिरेकव्याप्तौ वा ? नाद्यः, अन्वयव्याप्तेरेवाभावात्। अथ द्वितीयस्तदा हि यदनेकात्मयुक्तं न भवति तत् प्राणादिमन्न भवतीति व्यतिरेकव्याप्तौ अभोगायतनत्वमुपाधिरित्युच्यते। एवं चान्वयव्याप्त्युपाधिवैपरीत्येन व्यतिरेकव्याप्त्युपाधौ लक्षणं योज्यम्। तथा च सति व्यतिरेके यद् व्याप्यमनेकात्मयुक्तत्वाभावस्तस्य व्याप्यमुपाधिर्मन्तव्यः। अन्वयव्याप्त्युपाधौ तस्य व्यापकत्वेनेष्टत्वात्। ततश्च यत्राभोगायतनत्वं तत्रानेकात्मयुक्तं नास्तीति साध्यव्याप्तिः सम्भवति, ननु(न तु) साधनाव्याप्तिः, यत्राभोगायतनत्वं तत्र प्राणादिमत्त्वं नास्तीत्यपि व्याप्तेर्विद्यमानत्वात्।

**[१३]** अथ साधनव्यापकत्वभयाद् व्यतिरेकव्याप्त्युपाधेः अन्वयव्याप्त्युपाधिसकाशाद् वैपरीत्यं नेष्यते, किन्तु तत्समानलक्षणत्वम्। तथा च उपाधिर्व्यापकः व्यतिरेकसाध्यं च व्याप्यमित्येवायातम्। **(शं)** एवं च यत्प्राणादिमन्न भवति तद्भोगायतनमिति साधनव्याप्तिः यद्यपि मृतशरीरेण व्यभिचारान्नास्ति, **(स)** तथापि यदनेकात्मकं नास्ति तदभोगायतनमिति साध्यव्याप्तिरपि नास्ति, मृतशरीरेणैव व्यभिचारादिति इतो व्याघ्र इतस्तटी इति न्यायेन दुष्करं ते समागात्।

अपि चोपाधिस्तावद् व्यतिरेकव्याप्तिरवश्यमेष्टव्या। सा च व्यापकाभावे व्याप्याभाव इतिरूपा। इह चान्वयव्याप्त्युपाधिसकाशाद् व्यतिरेकव्याप्त्युपाधेः वैपरीत्येन दर्शनीयत्वाद् व्यापकस्य साध्यस्याभावे व्याप्यस्योपाधेरभावो वाच्यः। यत्रानेकात्मयुक्तत्वाभावरूपं व्यतिरेकव्याप्तिसाध्यं नास्ति तत्राभोगायतनत्वोपाधिः नास्ति। इह चानेकात्मयुक्तत्वाभावो व्याप्यं जात उपाध्यभावश्च व्यापकम्। व्यापकं च व्याप्यसद्भावेऽपि स्याद्व्याप्याभावेऽपि च स्यात्।

***व्यापकं तदतन्निष्ठव्याप्यं तन्निष्ठमेव हि*** इति(    ) तल्लक्षणात्।

तथा च सति अनेकात्मयुक्तत्वाभावरूपस्य व्यतिरेकसाध्यस्य अभावोऽवश्यं बलादङ्गीकृत इति सिद्धम् अनेका{न्ता}त्मयुक्तत्वमिति॥

**॥इति श्रीमदुपाधिखण्डनं सम्पूर्णम्॥**

## ६

## ॥अनुमानदूषणानि॥

**[१]** असिद्धविरुद्धानैकान्तिककालात्ययापदिष्टप्रकरणसमाः पञ्च हेत्वाभासाः।

तत्र पक्षे धर्मत्वं नास्ति सोऽसिद्धः। अनित्यः शब्दश्चाक्षुषत्वात् घटवदिति॥१॥

विपक्षे सन्सपक्षे चासन् विरुद्धः। नित्यः शब्दः कार्यत्वाद् व्योमवदिति॥२॥

पक्षादित्रयवृत्तिरनैकान्तिकः। अनित्यः शब्दः प्रमेयत्वादिति। प्रमेयत्वं हि यथा शब्दे पक्षेऽस्ति तथा सपक्षे घटे विपक्षे व्योम्न्यप्यस्ति॥३॥

प्रत्यक्षागमविरुद्धे पक्षे वर्तमानो हेतुः कालात्ययापदिष्टः। अनुष्णोऽग्निः द्रव्यत्वात्। ब्राह्मणेन सुरा पे{क्ष}या द्रवद्रव्यत्वादिति॥४॥

स्वपक्षसिद्धावपि त्रिरूपो हेतुः प्रकरणसमः पक्षसपक्षयोरन्यतरत्वात् सपक्षवत्। नित्यः शब्दः पक्षसपक्षयोरन्यतरत्वात् सपक्षवदिति॥५॥

अथवा अबाधितपक्षपरिग्रहो हि हेतुप्रयोगकालः तमतीत्यासावपदिष्ट कालात्ययापदिष्ट इति। अनित्यः शब्दोऽनित्यधर्मानुपलब्धेराकाशवदिति॥

पक्षेऽवर्तमानो हेतुरसिद्धः॥१॥

पक्षविपक्षयोर्वर्तमानो विरुद्धः॥२॥

पक्षे सपक्षे विपक्षे च वर्तमानो हेतुरनैकान्तिकः॥३॥

प्रत्यक्षादिप्रमाणबाधितपक्षानन्तरं निदर्श्यमानो हेतुः कालात्ययापदिष्टः॥४॥

विपर्ययसाधकप्रत्यनुमानबाधितो हेतुः प्रकरणसमः॥५॥

**॥इत्यनुमानदूषणानि॥**

## ७

## ॥दशावयवानुमानम्॥

[१] अग्निमानयं पर्वतः इति पक्षः प्रतिज्ञा इत्यैकार्थौ। ***साध्यधर्मविशिष्टो धर्मी पक्ष*** इति पक्षलक्षणत्वात्()॥१॥

धूमवत्त्वादित्ययं हेतुः साधनं लिङ्गमित्येकार्थानि। ***निश्चितान्यथानुपपत्त्येकलक्षणो हेतुः*** इति (प्र.न.त. ३.११) हेतुस्वरूपनिरूपणात्॥२॥

यो यो धूमवान् स स वह्निमान् यथा महानसं एषोऽन्वयदृष्टान्तः साधर्म्यापरपर्यायः। ***यत्र साधनधर्मसत्तायामवश्यं साध्यधर्मसत्ता प्रकाश्यते स साधर्म्यदृष्टान्तः*** इति (प्र.न.त.३.४५) लक्षणस्पष्टीकरणात्। यो यो वह्निमान्न भवति स स धूमवान्न भवति यथा जलाशय इतिवैधर्म्यदृष्टान्तो व्यतिरेकापरनामा। ***साध्याभावे साधनस्याप्यवश्यमभावः प्रदर्श्यते स वैधर्म्यदृष्टान्त*** इति(प्र.न.त.३.४७) वचनात्॥३॥

धूमवाँश्चायं एष उपनयः। ***हेतोः साध्यधर्मिण्युपसंहरणमुपनयः*** इति (प्र.न.त.३.४९)प्रणीतत्वात्।

तस्माद्वह्निमानयं पर्वत इति निगमनम्। ***साध्यधर्मस्य साध्यधर्मिण्युपसंहरणं निगमनम्*** इति (प्र.न.त.३.५१) लक्ष[ण]स्य विचक्षणानां निगदसिद्धत्वात्।

**॥इति पञ्चावयवमनुमानम्॥**

[२] पञ्चावयवानां दूषणसमर्थनेन दशावयवं मन्यन्ते। न चात्र पक्षो दूषणदुष्टस्तस्य हि त्रीणि दूषणानि। तथा हि–प्रतीतसाध्यधर्मविशेषणः पक्षाभासः॥१॥ अनभीप्सितसाध्यधर्मविशेषणः पक्षाभासः॥२॥ निराकृतसाध्यधर्मविशेषणः पक्षाभास इति॥३॥

[३] तत्र नाद्यं दूषणमुद्घोषणीयम्, साध्यधर्मस्याग्निमत्त्वस्याप्रतीतत्वात्। न द्वितीयम्, साध्यस्यानभीप्सितत्वात्। नापि तृतीयम्, अग्नेः प्रत्यक्षादिप्रमाणलोकव्यवहारस्ववचनाभिमतत्वात्।

हेतोरपि नासिद्धत्वं साधनीयम्, ***यस्यान्यथानुपपत्तिः प्रमाणेन न प्रतीयतेऽसावसिद्धः*** इति(प्र.न.त.६.४८) असिद्धतालक्षणम्। सा च द्विधाभिधीयते धीधनैः-अन्यतरासिद्धिरुभयासिद्धिश्चेति। अस्य चाग्नित्वस्य धूमवत्त्वस्य साधनस्याविद्धदङ्गनं प्रतीतत्वात्।

नापि विरुद्धताबन्धकीसम्बन्धविधुरं साधनमिदम्, विरुद्धार्थसाधकत्वाद्विरुद्धत्वं भवति। न च भवति, यदि च स्यात्तदा प्रमाणान्वेषणं विशीर्यते। प्रमाणं हि यथावस्थितवस्तुव्यवस्थितये समाश्रीयते। न च विरुद्धोऽर्थो जलादिः साध्यमानोऽस्ति येन विरुद्धत्वं स्यादिति।

नाप्यनैकान्तिकतोद्भावनीया, जलादेर्विपक्षादत्यन्तं व्यावृत्तत्वात्। अतो दूषणकणाधर्षणीयादतो हेतोः कथं न साध्यं सिद्धिसौधमधिवसति?

**॥इति दशावयवानुमानम्॥**

८

## ॥परहेतुतमोभास्करनामस्थलम्॥

**[१]** इह हि सकलतार्किकचक्रचूडामणितयात्मानं मन्यमानाः, सर्वदापि प्रसभं पोषितस्वाभिमाना गुणवत्सु विद्वत्सु मत्सरं विदधाना, मुग्धजनसमाजेऽत्युर्जितस्फूर्जितमभिदधानाः, स्पष्टोद्भवेन स्वानुभवेन समस्तवस्तुस्तोमगतमभ्रान्तमनेकान्तमनुभवन्तो, स्वयं च युक्त्यानेकान्तमेव वदन्तोऽपि प्रकटं वचनमात्रेणैवानेकान्तमनिच्छन्तो, यथास्थितं वस्तुस्वरूपमपश्यन्तो निजमतानुरागमेव पुष्णन्तो विद्वत्समीपे च कदाचित्सम्यग्हेतुस्वरूपमपृच्छन्तो निजबुद्ध्या वा तदनवगच्छन्तो भवन्तो यत्स्वसाध्यसाधनाय साधनमधुनाभ्यधुः। तत्रापि साध्यसिद्धिनिबन्धनं हेतुः। अतोऽनेकान्तव्यवस्थापनार्थं यथास्थितं वस्तुस्वरूपं दर्शयद्भिः सद्भिरस्माभिः प्रथमं हेतोरेव स्वरूपं सम्यगनेकान्तरूपं प्रकाश्यते। तावद्दत्तावधाना निरस्तस्वपक्षाभिमानाः क्षणं माध्यस्थं भजन्तः शृण्वन्तु भवन्तः।

तथा हि–युष्मदुपन्यस्तेन हेतुना किमन्वयिना स्वसाध्यं साध्येत? व्यतिरेकिणा वा? अन्वयव्यतिरेकिणा वा? यदि तावदन्वयिना तदा तत्पुत्रत्वादेरपि गमकत्वं स्यात्, अन्वयमात्रस्य तत्रापि भावात्। नापि व्यतिरेकिणा तत्पुत्रत्वादेरेव गमकत्वप्रसङ्गात्, श्यामत्वाभावे इत्यत्र गौरपुरुषे विपक्षे तत्पुत्रत्वादेरभावात्। अन्वयव्यतिरेकिणा चेत्तदापि तत्पुत्रत्वादेरेव साध्यसिद्धिप्रसक्तिः।

**न चास्य** त्रैरूप्यलक्षणयोगिनो हेत्वाभासता **शङ्कनीया**, अनित्यत्वसाधने कृतकत्वादेरपि तत्प्रसङ्गात्। अस्ति च--(भवदभि)प्रायेण त्रैरूप्यं तत्पुत्रत्वादिति। **अथ** भवत्वयं दोषो येषां पक्षधर्मत्वसपक्षसत्त्वविपक्षासत्त्वरूपे त्रैरूप्येऽविनाभावपरिसमाप्तिः नास्माकं पञ्चलक्षणहेतुवादिनाम्, अस्माभिरसत्प्रतिपक्षत्वप्रत्यक्षागमाबाधितविषयत्वयोरपि लक्षणयोरभ्युपगमादिति **चेत्**, तर्हि केवलान्वयकेवलव्यतिरेकानुमानयोः पञ्चलक्षणत्वासम्भवेनागमकत्वप्रसङ्गः। न च तयोरगमकत्वं यौगैरिष्टम्। तस्मात् प्रतिबन्धनिश्चायकप्रमाणासम्भवेन अन्यथानुपपत्तेरनिश्चय एव तत्पुत्रत्वादेरगमकत्वनिबन्धनमस्तु, न तु त्रैलक्षण्याद्यभावः।

**अथात्र** विपक्षेऽसत्त्वं निश्चितं नास्ति, न हि शा(श्या)मत्वाभावे तत्पुत्रत्वेनावश्यं निवर्तनीयमित्यत्र प्रमाणमस्तीति सौगतः। यौगस्तु गर्जति-शाकाद्याहारपरिणामः श्यामत्वेन समव्याप्तिको, न तु तत्पुत्रत्वेनेत्युपाधिसद्भावान्न तत्पुत्रत्वे विपक्षासत्त्वसम्भव इति। तौ ह्येवं निश्चितान्यथानुपपत्तिमेव शब्दान्तरेण शरणीकुरुत इति सैव हेतोर्लक्षणमस्तु।

अपि च, अस्ति नभश्चन्द्रो जलचन्द्रात्, उदेष्यति श्वः सविता अद्यतनादित्योदयादित्यादिषु पक्षधर्मत्वाभावेऽपि, मन्माता इयम् एवंविधस्वरान्यथानुपपत्तेः, सर्वं क्षणिकमक्षणिकं वा सत्त्वादित्यादिषु च सपक्षस्याभावेऽपि हेतूनां गमकत्वदर्शनात् किं त्रैरूप्यादिना? निश्चितान्यथानुपपत्तिरेवैकं लिङ्गं(लिङ्ग-)लक्षणमक्षूण(क्षूण्ण)म्। **(शं)** तत्त्वमेतदेव प्रपञ्चः पुनरयमिति **चेत्**, तर्हि सौगतेन अबाधितविषयत्वमसत्प्रतिपक्षत्वं ज्ञातत्वं च, यौगेन च ज्ञातत्वं लक्षणमाख्यानीयम्।

**अथ** विपक्षान्निश्चितव्यावृत्तिमात्रेणाबाधितविषयत्वमसत्प्रतिपक्षत्वं ज्ञापकहेत्वधिकारात् ज्ञातत्वं च लब्धमेवेति **चेत्**, तर्हि गमकहेत्वधिकारादशेषमपि लब्धमेवेति किं विशेषेणापि प्रपञ्चेनेति? अत एव नान्वयमात्राद् हेतुर्गमकोऽपि तु आक्षिप्तव्यतिरेकाद् अन्वयमविशेषात्। नापि व्यतिरेकमात्रात् किन्त्वङ्गीकृतान्वयाद् व्यतिरेकवशात्। न चाप(पि)परस्परानुविद्धतदुभयमात्रादपि तु परस्परस्वरूपां <u>ज---न्वय[१]</u>व्यतिरेकवत्त्वात्। निश्चितान्यथानुपपत्त्यैकलक्षणस्य हि हेतोर्यथाप्रदर्शितान्वयव्यतिरेकरूपत्त्वात्। न च जैनानां <u>हेतोरेकलक्षण---नानैकान्तस्य[२]</u> विघातकमिति वक्तव्यम्। ***'प्रयोगनियम एवैकलक्षणो हेतुः'*** इत्यभिधानात्()।

ननु स्वभावनियमे एव नियतैकस्वभावस्य शशशृङ्गादेरिव निःस्वभावत्वादिति कथं न हेतोरनैकान्तात्मकता? तथा ननु भोः! सकर्णाः! प्रतिप्राणिप्रसिद्धप्रमाणप्रतिष्ठितानेकान्तविरुद्धबुद्धिभिर्भवद्भिरन्यैश्च कणभक्षाक्षपादबुद्धादिशिष्यकैरुपन्यस्यमानाः सर्वहेतवो विवक्षयासिद्धविरुद्धानैकान्तिकतां स्वीकुर्वन्तीत्यवगन्तव्यम्। तथा हि–पूर्वं तावत्तेषां विरुद्धताभिधीयते। यदि ह्येकस्यैव हेतोस्त्रीणि पञ्च वा रूपाणि वास्तवान्यभ्युपगम्यन्ते तदासो(सौ)अनेकधर्मात्मकमेव वस्तु साधयतीति कथं न विपर्ययसिद्धिः? एकस्य हेतोरनेकधर्मात्मकस्याभ्युपगमात्। **न च** यदेव पक्षधर्मस्य सपक्ष एव सत्त्वं तदेव विपक्षात्सर्वतो व्यावृत्तत्वमिति **वाच्यम्**। अन्वयव्यतिरेकयोर्भावाभावरूपयोः सर्वथा तादात्म्यायोगात्। तत्त्वे वा केवलान्वयी केवलव्यतिरेकी वा सर्वो हेतुः स्यात् ननु(न तु)त्रिरूपः पञ्चरूपो वा। तथा च साधनाभासोऽपि गमकः स्यात्। **अथ** न विपक्षासत्त्वं निश्चीयते किं तु साध्यसद्भावेऽस्तित्वमेव साध्याभावे नास्तित्वमभिधीयते, न तु ततस्तद् भिन्नमिति **चेत्**, तदसत्, एवं हि विपक्षासत्त्वस्य तात्त्विकस्याभावाद् हेतोस्त्रैरूप्यादि न स्यात्। **अथ** तदन्यधर्मान्तरम्, **तर्हि**, एकरूपस्यानेकात्मकस्य हेतोस्तथाभूतसाध्याविनाभूतत्वेन निश्चितस्यानेकान्तवस्तुप्रसाधनात् कथं परोपन्यस्तहेतूनां सर्वेषां न विरुद्धता? एकान्तविरुद्धेनानैकान्तेन व्याप्तत्वात्।

**[२]** असिद्धा[ता]पि सर्वसाधनमुन्नेया। यतो हेतुः सामान्यं वा भवेद्विशेषो वा तदुभयं वानुभयं वा? न तावत्सामान्यं हेतुः, तद्धि सकलव्यापि सकलस्वाश्रयव्यापि वा हेतुत्वेनोपादीयमानं प्रत्यक्षसिद्धं वा स्यादनुमानसिद्धं वा। न तावत्प्रत्यक्षसिद्धं, प्रत्यक्षं ह्यक्षानुसारितया प्रवर्तते। अक्षं च नियतदेशादिनैव निकृष्यते। अतोऽक्षानुसारिज्ञानं नियतदेशे प्रवर्तितुमुत्सहते, न सकलकालदेशव्यापिनि। **अथ** नियतदेशस्वरूपाव्यतिरेकात् तन्निश्चेय(निश्चये)तस्यापि निश्चय इति **चेत्**, न, नियतदेशस्वरूपाव्यतिरेके नियतदेशतैव स्यात्, न व्यापिता, तन्न व्यापिसामान्यरूपो हेतुः प्रत्यक्षसिद्धः।

अनुमानसिद्धतायामनवस्थाराक्षसी दुर्निवारा। अनुमानेन हि लिङ्गग्रहणपूर्वकमेव प्रवर्तमानेन सामान्यं साध्यते। लिङ्गं च न विशेषरूपमिष्यते। अनुमानगमात् सामान्यरूपं तु लिङ्गमवगतं वानवगतं वा भवेत्। न तावदनवगतम् अनिष्टत्वाद् अतिप्रसङ्गाच्च। अवगतं चेत्तदा तस्यावगमः प्रत्यक्षेणानुमानेन वा?। न

---

[१] अत्र कश्चित् पाठो भ्रष्टः।

[२] अत्र कश्चित् पाठो भ्रष्टः।

प्रत्यक्षेण, सन्निकृष्टग्राहित्वात्तस्य। नाप्यनुमानेन तस्याप्यनुमानान्तरेण लिङ्गग्रहणे तदेवावर्तते। तथा च यदि अनुमानात्मानं(अनुमानादनुमानं)स्याद् तदा युगसहस्रैरपि एकलिङ्गग्रहणं न भवेत्। अपि च, अशेषव्यक्त्याधेयस्वरूपं सामान्यं प्रत्यक्षानुमानाभ्यां निश्चीयमानं स्वाधारनिश्चयमुत्पादयेत्, स्वाधारनिश्चयोऽपि निजाधारनिश्चयमिति सकलो जनः सर्वज्ञः प्रसज्यते। किञ्च, स्वाश्रयेन्द्रियसंयोगात् प्राक् स्वज्ञानमजनयत् सामान्यं पश्चादपि न तज्जनयेत्, अविचलित--(रूप)त्त्वात्[१]। परैरनो(ना)धेयातिशयत्वाच्च विचलितत्वे आधेयातिशयत्वे च क्षणिकतापत्तिः।

अन्यच्च, तत्सामान्यं व्यक्तिभ्यो भिन्नमभिन्नं वा हेतुर्भवेत्?। न तावद्भिन्नं व्यक्तिभ्यः पृथगनुपलम्भात्। **(शं)**समवायेन व्यक्तिभिः सह सामान्यस्य सम्बन्धितत्वात् पृथगनुपलभ(म्भ)इति **चेत्**, न, समवायस्येहत्वं गीयते। इहेदमिति बुद्धिश्च भेदग्रहणमन्तरेण न भवेत्। किञ्चात अश्वत्वादिसामान्यं स्वाश्रयसर्वगतं वा सर्वसर्वगतं वेष्यते। यदि स्वाश्रयसर्वगतं तदा कर्कादिव्यक्तिशून्ये देशे प्रथमतरमुपजायमानाया व्यक्तेः अश्वत्वादिसामान्येन योगो न भवति। व्यक्तिशून्ये देशे सामान्यस्यान[व]स्थानात्, व्यक्त्यन्तरादनागमनाच्च। अथ सर्वसर्वगतं तत्स्वीक्रियते तदा कर्कादिभिरिव शाबलेयादिभिरपि तदभिव्यज्येत। **न च** कर्काद्यानामेव तदभिव्यक्तौ सामर्थ्यं न शाबलेयादीनामिति **वाच्यम्**, यतः किं रूपं तत्कर्काद्यानां सामर्थ्यम्? साधारणरूपत्वमिति चेत्, न, स्वतश्चेत् साधारणरूपा व्यक्तयस्तदा स्वत एवात अश्वोऽश्व इत्यनुवृत्तं प्रत्ययं जनय(यि)ष्यन्तीति किंद्भि(किं भि)न्नसामान्यपरिकल्पनया? यदि स्वतोऽसाधारणरूपा व्यक्तयस्तदापरसामान्ययोगादपि न साधारणा भवेयुः, स्वतोऽसाधारणरूपत्वादिति, व्यक्तिभिन्नस्य सामान्यस्याभावात् सिद्धस्तल्लक्षणो हेतु ततः कथं साध्यसिद्धिर्भवेत्?

**[३] अथ** व्यक्त्यभिन्नं सामान्यं हेतुः, **तदप्ययुक्तम्**, व्यक्त्यभिन्नस्य व्यक्तिस्वरूपवत् व्यक्त्यन्तराननुगमात् सामान्यरूपतानुपपत्तेर्व्यक्त्यभिन्नस्य सामान्यस्य व्यक्तिस्वरूपतायाश्च मिथो विरोधात्। **अथ** भिन्नाभिन्नमिति **चेत्**, न, विरोधात्। **अथ** केनाप्यंशेन भिन्नं केनाप्यभिन्नमिति, **तदपि न युक्तम्**, सामान्यस्य निरंशत्वात्। तन्नैकान्तसामान्यरूपो हेतुः साकल्येन सिद्धः।

**[४]** नापि विशेषरूपः तस्यासाधारणत्वयोगेन गमकत्वायोगात्, साधारणत्व एव गमकत्वयोगात्, अन्वेव(अन्वय)योगात् अन्वयोत्पत्तेः। नापि सामान्यविशेषोभयं परस्परराननुविद्धं हेतुरुभयदोषप्रसङ्गात्। नाप्यनुभयम् अन्योन्यव्यवच्छेदरूपाणामेकाभावे द्वितीयविधानात्। उभयस्यासत्त्वेन हेतुत्वायोगात्। बुद्धिप्रकल्पितं च सामान्यमवस्तुरूपत्वात् साध्येनाप्रतिबद्धत्वादसिद्धत्वाच्च हेतुर्न।

तदेवं सामान्यादीनामसिद्धत्वे तल्लक्षणाः सर्वेऽपि हेतवोऽसिद्धा एव। तथा प्रतिबन्धविकलाः समस्ता अपि परोपन्यस्ता हेतवोऽनैकान्तिका अवगन्तव्याः। न च एकान्तेन सामान्यविशेषयोर्वा साध्यसाधनयोः प्रतिबन्ध उपपद्यन्ते(पद्यते)। तथा हि–सामान्ययोरेकान्तेन नित्ययोः परस्परमनुपकार्योपकारकभूतयोः कः प्रतिबन्धः? मिथः कार्यकारणादिभावेनोपकार्योपकारकत्वे त्वनित्यत्वापत्तेः। विशेषयोस्तु नियतदेशकालयोः

---

[१] अत्र कश्चित् पाठो भ्रष्टः।

प्रतिबन्धग्रहेऽपि तत्रैव तयोर्ध्वंसात्। साध्यधर्मिण्यगृहीतप्रतिबन्ध एव नान्यो विशेषो हेतुत्वेनोप(पा)दीयमानः कथं नानैकान्तिकः?

[५] किञ्च, प्रतिबन्धः पक्षधर्मत्वादिके लिङ्गलक्षणे सति सम्भवी। न च साध्यसाधनयोः परस्परतो धर्मिणश्चैकान्तेन भेदेऽभेदे वा पक्षधर्मयोगो लिङ्गस्योपपत्तिमान् सम्बन्धासिद्धेः। सम्बन्धो हि साध्यसाधनयोर्धर्मिणः किं समवायः, संयोगो, विरोधो, विशेषणविशेष्यभावो, तादात्म्यं, तदुत्पत्तिर्वा भवेत्?। न तावत्समवायस्तस्य धर्मधर्मिद्वयातिरिक्तस्य प्रमाणेनाप्रतीयमानत्वात्। 'इह तन्तुषु पटः' इत्यादेस्तत्साधकस्य प्रत्ययस्यालौकिकत्वात्। पांशुलपादानामपि 'इह पटे तन्तवः' इत्येव प्रतीतिदर्शनात्, 'इह भूतले घटाभावः' इत्यत्रापि समवायप्रसङ्गात्। सत्त्वे वा समवायस्य स्वत एव धर्मधर्म्यादिषु वृत्त्युपगमे तद्वत्साध्यादिधर्माणामपि स्वत एव धर्मिणि प्रवृत्तिरस्तु, किं व्यर्थया समवायपरिकल्पनया? समवायस्य समवायान्तरेण वृत्त्यभ्युपगमे तु तत्रापि अपरसमवायकल्पनेन अनवस्थानदी दुस्तरा। अस्तु वा समवायस्य स्वतः परतो वा वृत्तिः। तथापि तस्य प्रतिनियतानामेव सम्बन्धिनां सम्बन्धकत्वं न स्यात्। अपि त्वन्येषामपि व्यापकत्वेन तस्य सर्वत्र तुल्यत्वादेकस्वभावत्वाच्च।

[६] नापि संयोगः। स हि साध्यसाधनादीनां भवन् किं ततो भिन्नो वा स्यादभिन्नो वा? प्राचि पक्षे कथं विवक्षितानामेवैष, किं नान्येषामपि? भेदाविशेषात्। न च समवायोऽत्र नियामकस्तस्य सर्वत्र सदृशत्वात्। द्वितीये तु साध्यादीन्येव स्युर्न कश्चित् संयोगो। कथञ्चिद् अभिन्नसंयोगाङ्गीकारे तु परवादाश्रयणं भवेत्।

[७] नापि विरुद्धोऽभिधातव्यः। तस्याप्येकान्तमतेऽसम्भवात्। स हि सहानवस्थानं परस्परपरिहारो वा भवेत्। तत्राद्यः किं कदाचिदप्येकत्रानवस्थानं उत कियत्कालं स्थित्वा पश्चादनवस्थानम्? आद्ये पक्षेऽहिनकुलादीनाम् न विरोधः, अन्यथा त्रैलोक्येऽपि उरगादीनाम् अभावः। द्वितीये तु नरवनितादेरपि विरोधः स्यात्, तयोरपि किञ्चित्कालं एकत्र स्थित्वापगमात्। किञ्च, वडवानलजलधिजलयोर्विद्युदम्भोदाम्भसोश्च चिरतरमेकत्रावस्थानतः कथमयं विरोधो? परस्परपरिहारस्तु सर्वभावानामविशिष्टः कथमसौ प्रतिनियतानामेव भवेत्?

[८] नापि विशेषणविशेष्यभावो घटामियर्ति, तस्य संयोग्य{सं}भावेऽभावात्, तस्य तु प्रागेव निरासात्। नापि साध्यसाधनयोः तादात्म्यं घटते, साध्यसाधनयोरसिद्धसिद्धयोर्भेदाभ्युपगमेन तादात्म्यायोगात्। तादात्म्ये च साध्यं साधनं वैकतरमेव भवेन्न द्वयम्। कथञ्चित्तादात्म्ये तु जैनमतानुप्रवेशः स्यात्। तदुत्पत्तिस्तु कार्यकारणभावे सम्भविनी। कार्यकारणभावश्चार्थक्रियासिद्धौ सिद्ध्येत्, अर्थक्रिया च नित्यस्य क्रमाक्रमाभ्यां सहकारिषु सत्सु च जनकस्वभावद्वयानभ्युपगमेन नोपपद्यते। अनित्यस्य सतोऽसतो वा सा न घटते, सतः समसमयवर्तिनि व्यापारायोगात्, व्यापारे वा स्वस्वकारणकाल एव जातानामुत्तरोत्तरक्षणानामेकक्षणवर्तित्वप्रसङ्गात्, सकलभावानां मिथः कार्यकारणभावप्रसक्तेश्च। असतश्च

सकलशक्तिविकलत्वेन कार्यकारणासम्भवात्, अन्यथा शशविषाणादेरपि तत्प्रसङ्गात्। तदित्थं साध्यादीनां सम्बन्धानुपपत्तेरेकान्तमते पक्षधर्मत्वादि हेतुलक्षणमसङ्गतमेव स्यात्।

**[९]** तथा च प्रतिबन्धे ग्रहणमपि न जाघटीति, अविचलितस्वरूपे आत्मनि पौर्वापर्याभावात् प्रतिक्षणध्वंसिन्यपि कार्यकारणाद्युभयग्रहणाननुवृत्तिश्चैकचैतन्याभावात्। **न च** कार्याद्यनुमानं वानन्तरभाविना स्मरणेन कार्यकारणभावादिप्रतिबन्धेऽनुसन्धीयत इति **वक्तव्यम्**। अनुभूत एव स्मरणप्रादुर्भावात्। न च प्रतिबन्धः केनचिदनुभूतस्य उभयनिष्ठत्वादुभयस्य च पूर्वापरकालभाविन एकेनाग्रहणाद् इति न प्रतिबन्धनिश्चयः। तदेवमेकान्तपक्षे परैरुच्चार्यमाणः सर्वोऽपि हेतुः प्रतिबन्धस्याभावादनिश्चयाच्चानैकान्तिक एव भवेत्। एवं च केवलस्य सामान्यस्य विशेषस्य च द्वयोरपि च परस्परविविक्तयोस्तयोः हेतुत्वाघटनात्। अनुवृत्तव्यावृत्तप्रत्ययनिबन्धनपरस्परसंवलितसामान्यविशेषात्मनो हेतोरनेकान्तात्मनि साध्ये गमकत्वमभ्युगन्तव्यम्।

**[१०] न च** यदेव रूपं रूपान्तराद् व्यावर्तते तदेव कथमनुवृत्तिमासादयति? यच्चानुवर्तते तत् कथं व्यावृत्तिमाश्रयति? इति **वक्तव्यम्**, अनुवृत्तव्यावृत्तरूपतयाध्यक्षतः प्रतीयमाने वस्तुरूपे विरोधासिद्धेः, सामान्यविशेषवच्चित्रज्ञानवत् चित्रपटस्य एकचित्रचित्ररूपवच्च(एकचित्ररूपवत्त्वाच्च)।

**[११]** किञ्च, एकान्तवाद्युपन्यस्तहेतोः साध्यं किं सामान्यं, आहोश्विद्विशेषः, उतोभयं परस्परविव(वि)क्तम्, उदश्विदनुभयं परस्परविविक्तम्? इति विकल्पाः। न तावत्सामान्यम्, केवलस्य तस्यासम्भवात्, अर्थक्रियाकारित्वविकलत्वाच्च। नापि विशेषः, तस्याननुयायित्वेन साधयितुमशक्यत्वात्। नाप्युभयम् उभयदोषानतिवृत्तेः। नाप्यनुभयं तस्यासतोऽव्यापकत्वेन साध्यत्वायोगात्। तस्माद् विवादास्पदीभूतसामान्यविशेषोभयात्मकसाध्यधर्मस्य साध्यधर्मिणि साधनया(नाय)न्योन्यानुविद्धान्वयव्यतिरेकस्वभाव द्वयात्मकैकहेतोः प्रदर्शने लेशतोऽपि नैकान्तपक्षोक्तदूषणावकाशः सम्भवी। अतोऽनेकान्तात्मकं हेतुस्वरूपमवश्यमङ्गीकर्तव्यम्। अन्यथा सकलानुमानेषु साध्यसाधनानामुक्तन्यायत उच्छेदो भवेत्। तस्माद् भो! एकान्तवादिनो निजपक्षाभिमानत्यागेऽप्यविषादिनोऽक्षिणी निमील्य बुद्धिदृशमुन्मील्य मध्यस्थवृत्त्या युक्त्यनुसारैकप्रवृत्त्या तत्त्वं जिज्ञासन्तो भवन्तोऽनेकान्तं विचारयन्तु प्रमाणैकमूलसकलयुक्तियुक्तं प्रागुक्तमखिलदोषविप्रमुक्तं तत्तत्त्वं वाधिगच्छन्तु॥

**॥इति परहेतुतमोभास्करनामस्थलम्॥**

## ॥सर्वानुमानोत्थापनस्थलम्॥

[१] ननु भोः! कोविदकुलावचूलानिरवद्यहृद्यविद्यावैशारद्यवल्लिमूलनिस्तुषनिजोपन्यासमहाबलदूरोत्क्षिप्तसमस्त-प्रामाणिकार्कतूल ! **यदेतद**नुमानं शुभवता भवता निस्समप्रतिभावता सकलमहीतलविख्यातसङ्ख्यावन्मुख्यलख्य(लक्ष)सञ्जातशोभायां सभायाम् उपन्यस्तमास्ते तदस्माभिश्चतुरनरनिकरान्तःकरणस्फारचमत्कारकारिमनोहारियुक्तिभिर्विचार्यते किञ्चित्। इह जगति अनुमानं क्वचिद्दशावयवं, क्वचित्पञ्चावयवं, क्वचिद् द्वावयवं, क्वचिदेकावयवं च भवति। तेषु सर्वेषु मुख्यो हेतुरेव विदुषां वाच्यो। ***हेतुरेव केवल*** इति वचनात् ()। अतो हेतोरेव च किञ्चित्स्वरूपं निरूप्यते। स च निश्चिताविनाभावसम्बन्धशुद्ध एव भवति। सम्बन्धस्तु द्वयोः साक्षात्परिज्ञाने सति सम्भवति।

[२] ***द्विष्ठसम्बन्धसंवित्तिर्नैकरूपप्रवेदनाद्*** इति वचनात् ()।

द्वयोः साध्यसाधनयोः सम्बन्धग्रहणं प्रत्यक्षादनुमानाद्वेति विकल्पयुगली कलहंसयुगलीवावतरति। तत्र प्रत्यक्षत इति पक्षो दक्षैः कक्षीक्रियते तदा तत्प्रत्यक्षमैन्द्रियमतीन्द्रियं वेति विकल्पौ सूर्याचन्द्रमसाविव केनाप्यप्रतिहतसञ्चारौ सञ्चरतः। अथ प्रथमो विकल्पः संश्रीयतेः तर्हि तद् भवदीयं परकीयं वेति वाच्यम्। यदि परकीयं तदा भवतः किमायातम्? न ह्यन्याधिगतमन्यः पर्यवस्यति, अतिप्रसङ्गात्। न हि विश्वामित्रभोजने विशिष्टः(वशिष्ठः) सन्तुष्टो भवति। नापि द्वितीयं भवदिन्द्रियजप्रत्यक्षस्य सद् रूपिवस्तुग्राहकत्वाद् अरूपि साध्यसाधनोभयस्थसम्बन्धग्रहणानुपपत्तेः। नाप्यतीन्द्रियं तस्याप्यसम्भवराक्षसकटाक्षितत्वेन निःशङ्कप्रवृत्यनुपपत्तेः। तत्र प्रत्यक्षतस्तत्राविनाभावसम्बन्धग्रहणं सम्भवति। नाप्यनुमानात् प्रत्यक्षाप्रवृत्त्याप्रवृत्त्या तत्र तत्प्रवृत्तेर्नितरामसम्भावनीयत्वात्। प्रवृत्तौ च तदनुमानं साध्यसाधनयोरविनाभावग्रहणपूर्वकं सम्भवति। ततश्च सम्बन्धग्रहणं प्रत्यक्षादनुमानाद्वेति सर्वमावर्तते इति अनवस्था प्रवर्तते इति न भवत्साध्यसाधनाय सावधानमेतत् साधनम्। किञ्च,इदं साधनं सामान्यरूपं स्याद्विशेषरूपं वा? न तावत्सामान्यरूपम्, यतस्तत्सामान्यरूपं सत् सामान्यरूपं साध्यं साधयेद्विशेषरूपं चेति विकल्पौ दुष्टदन्दशूकाविव भवत्पृष्ठमनुधावतः। न तावत्सामान्यरूपं, सामान्यस्य जगत्प्रतीतत्वेन साध्यत्वस्य सर्वथाप्यध्यात(प्यसाध्य)त्वात्।

[३] ***अप्रतीतमनिराकृतमनभिप्सितं साध्यम्*** इति(प्र.न.त.३.१४) वचनात्। नापि विशेषरूपं साध्यं साधयेत् सामान्यरूपहेतोः विशेषरूपसाध्यसाधनस्य दुस्सम्भवत्वात्। सम्भवे वा सर्वव्यक्तिव्यापकसामान्यस्यैव व्यक्तौ वृत्त्यभावात्। अपक्षधर्मत्वाद् हेतोः हेत्वाभासतोत्पत्तेर्न भवत्साध्यसिद्धिः। नापि विशेषरूपं साधनं यतस्तत्साध्यं सामान्यरूपं विशेषरूपं वा साधयेत्। न तावत्सामान्यरूपं विशेषरूपसाधनस्य सकलव्यक्तिव्यापकस्य सामान्यस्य साधनायोगात्। नापि विशेषरूपं साध्यं गमयेत् दृष्टान्तस्य साध्यविकलतोत्पत्तेः। तन्न सामान्यरूपं विशेषरूपं वा साधनं स्वसाध्यसाधनायालङ्कर्मीणतां दधाति।

[४] किञ्च, भवत्साधनं धूमादिवत्कार्यरूपं वा स्यात् सत्त्वादिवत्स्वभावरूपं वा? तत्र यदि प्रथमः पक्षः प्रमाणीक्रियते प्रामाणिकशिरोमणिना तदा स कार्यकारणसम्बन्धः प्रत्यक्षादनुमानाद्वाधिगतः। तत्र यद्याद्यः पक्षस्तन्न यतः स कार्यकारणद्वयावस्थितारूपिकार्यकारणभावसम्बन्धस्य प्रत्यक्षेण द्रष्ट(दर्श)यितुमशक्यत्वात्, सद्रूपिगोचरत्वात्प्रत्यक्षस्य। नापि द्वितीयोऽनवस्थाप्रसङ्गात्। तथा हि–तत्रापि हेतुना कार्यरूपेण स्वभावरूपेण वा भाव्यम्, गत्यन्तराभावात् तयोरुभयोरपि सम्बन्धग्रहणं प्रत्यक्षादनुमानाद्वेति विकल्पौ। अनुमानपक्षाङ्गीकारादपरानुमानेन तत्रापि पुनस्तदेवावर्तते इत्यनवस्था। नापि स्वभावरूपं यतः स ज्ञातः सन् हेतुतयोपन्यस्येत अज्ञातो वा। ज्ञातश्चेत्प्रत्यक्षादनुमानाद्वेति वाच्यम्। न तावत्प्रत्यक्षेण तस्यारूपित्वेनाप्रत्यक्षग्राह्यत्वात्। नाप्यनुमानात् प्रत्यक्षाप्रवृत्तेरनुमानप्रवृत्तेर्दूरापास्तत्वादिति न कथमपि भवतः साधनं साध्यसाधनाय अलङ्कर्मीणतां दधाति।

**॥इति सर्वानुमानोत्थापनस्थलम्॥**

## १०

## ॥ज्ञानस्य स्वप्रकाशकत्वसाधनम्॥

[१] यत्प्रकाशते तज्ज्ञानम्, जडस्य प्रकाशायोगात्। न चायमसिद्धो हेतुः,तथा हि–स्यादस्य हेतोरसिद्धत्वं यद्यप्रकाशरूपमपि विज्ञानं स्यात्। यावता न खलु केनापि वादिना ज्ञानस्याप्रकाशरूपत्वमिष्टम्, सर्ववादि[भिः] ज्ञानस्य प्रकाशरूपत्वेन अभ्युपगमात्। नाप्यनैकान्तिकः, विपक्षे प्रकाशस्यासम्भवात्। नापि विरुद्धः, विरुद्धसाधनाभावादेव। तथा हि–विरुद्धो जडोऽर्थः, स च प्रकाशमानः किं स्वयं प्रकाशते परतो वा? न तावत्स्वयं जडत्वादेव। अथ परतस्तदानीं किं ज्ञानादज्ञानाद्वा? यदि ज्ञानात्तदानीं किं व्यतिरिक्तादव्यतिरिक्ताद्वा? यद्यव्यतिरिक्तात् तदागतमर्थेन ज्ञानाद् ज्ञानमित्याद्यतः सिद्धं नः समीहितम्।

[२] अथ व्यतिरिक्तात् तदा किं तज्जन्याद्वा [अतज्जन्याद्वा]? यदि तज्जन्यात् तदा किं ज्ञानरूपाद् अज्ञानरूपाद्वा? यदि ज्ञानरूपात् तदा ज्ञानाद्वैतमेतत्। अथाज्ञानरूपात् तदसङ्गतम्, न ह्यज्ञानात् ज्ञानं भवितुमर्हति। अन्यथा यदि विलक्षणादपि कारणाद्विलक्षणं कार्यं समुत्पद्येत तदा गोधूमादेरपि शाल्यङ्कुरादयः समुत्पद्येरन्। ततश्च सर्वमसमञ्जसं समापनीपद्येत, न चैवम्।

[३] **अथाभिधीयते**– विलक्षणादपि गोमयाद्विलक्षणः सालूको जन्यते [तद्]दर्शनादत्राप्येवं भविष्यति, **तदप्ययुक्तम्,** यतो न हि तत्र वैलक्षण्यं कारणाभावनिबन्धनत्वेन वक्तुं शक्यम्। अन्वयव्यतिरेकाभ्यां केवलादपि गोमयाच्छालूकोत्पत्तेर्दर्शनात्, न च तथा केवलादर्थाज्ज्ञानं केनाप्युत्पत्तिमद् दृश्यत इष्यते वा। अथातज्जन्यात् तदप्यचारु, अन्यज्जन्यादपि ज्ञानार्थो यदि प्रकाशते तदानीं यदा पुरोवर्तिनः पदार्थाः प्रकाशन्ते तथा कालान्तरदेशान्तरवर्तिनोऽपि प्रकाशेरन्, अतज्जन्यत्वाविशेषात्। **अथ** अर्थमन्तरेण अर्थकलाकलनविकलमपि ज्ञानं स्यात्, **तदप्ययुक्तम्**, यतः स्वांशग्रहणे ह्यन्तःसंवेदनं व्याप्रियमाणमनुभूयते तथा बहिरप्यर्थमन्तरेण स्वप्नदशायां नानाप्रकारं विज्ञानं सञ्जायमानमनुभूयते एव। **न च** अनुभूयमानस्यापि वस्तुनोऽसद्भावः शक्यते वक्तुम्, नीलादिज्ञाने नीलाद्याकारस्य वेद्यमानत्वात् **तदप्यसङ्गतम्**, यतो वेद्यवेदकाकारविकलस्य सकलविकल्पगोचरातीतस्य निर्विकल्पकसंवेदनस्यैव संवेद्यमानत्वात्। ग्राह्यग्राहकाकारस्य पुनरनादिका{ला}लीन वासनाबलेनोत्पन्नत्वात्। तथा चोक्तम्– ***सर्वमालम्बने भ्रान्तम्।***

[४] किञ्च, बहिः प्रकाशस्य प्रेतवद् बाह्यार्थे विचाराक्षमतयोपप्लुतरूपत्वात्। तथा हि–अर्थोऽवयविरूपोऽवयवरूपो वा भवेत्, गत्यन्तराभावात्। न तावदवयवरूपो विचारं क्षमते, अवयवविरहे अवयवित्वायोगात्, तेषु तद्वृत्तिविकल्पानुपपत्तेश्च। तथा हि–अवयविष्ववयवो वर्तमानः किमेकदेशेन वर्तते सामस्त्येन वा? न ताव[देक]देशेन, तस्य स्वयं निरवयवत्वात्। अवयववृत्तिनिमित्तम् अंशान्तरकल्पने

अंशान्तरवृत्तावपि अंशान्तरप्रसङ्गः, तथा चानवस्था। न च सामस्त्येन, प्रत्यवयवं परिसमाप्तरूपतया अवस्थितावयविबहुत्वप्रसङ्गात्। **(शं)** भेदपक्षे दोषोऽयमभेदे नास्तीति **चेन्न**, तत्राप्यवयविमात्रम् अवयवमात्रं वा स्यात्। इतरेतराव्यतिरिक्तत्वाद् इतरेतरस्य(स्व?)रूपत्वात्।

**[५]** किञ्च, समस्ता अवयवव्यापिनोऽवयविनोऽभ्युपगमे पटादिरेकदेशरागारागकम्पादीनि दुर्निवाराणि स्युः, एकस्य रागारागादिविरुद्धधर्माध्यासायोगात्। नापि अवयवरूपोऽर्थो विचारगोचरचारी, करचरणशिरोरुग्रीवादीनामवयवानां स्वावयवापेक्षयावयविरूपतया तद्दूषणेनैवापास्तत्वात्।

**[६] अथ** परमाणूनां निरंशतयावयवत्वमुपपद्यत इति **चेत्**, तदयुक्तम्, तेषामपि दिक् ष(पक्ष?) सम्बन्धेन खण्डसत्तापत्तेः, अन्यथावस्थानाभावात्। ततश्चार्थविरहात्तदुन्मुखो ग्राह्याकारोऽलीकः, तदलीकतायां ग्राहकाकारोऽप्यलीक एव, ग्राह्याभावे ग्राहकायोगात्। तदपेक्षयैव तत्समुपस्थितेरि--व ग्राह्यग्राहकाकाराभावे ज्ञानाद्वैतमेवावशिष्यते, तस्य सर्वत्रापि विरतरूपत्वात्। तस्मात्तदेव पारमार्थिकमिति स्थितम्॥

**॥इति ज्ञानस्य स्वप्रकाशकत्वसाधनम्॥**

द्वितीयः खण्डः

# ईश्वरवादः

## ११

# ॥ईश्वरवादः॥

॥श्रीगणेशाय नमः॥ आराध्यदेवतायै नमः॥

[१] क्षितिः सकर्तृका कार्यत्वात् घटवदित्यत्र क्षितित्वस्य पक्षतावच्छेदकत्वे जलादौ सन्दिग्धानैकान्तिकत्वप्रसङ्गः। सामानाधिकरण्येनानुमितेरुद्देश्यत्वे घटादौ सिद्धसाधनम्। क्षितित्वावच्छेदेनानुमितेरुद्देश्यत्वे बाधः। जन्यक्षितित्वस्य पक्षतावच्छेदकत्वे त्वन्मते व्यावर्त्याप्रसिद्धेः, अजन्यक्षितेरप्रसिद्धेः, प्राचीनमते अवच्छेदकावच्छेदेनानुमितावपि सामानाधिकरण्येन सिद्धेः प्रतिबन्धकत्वात्। **(शं) न च** जन्यकृत्यजन्यं जन्यं पक्षः, **(स)** गुरुमते जन्यत्वविशेषणव्यावर्त्याप्रसिद्धेः, अदृष्टद्वारा जन्यमात्रस्यैव जन्यकृतिजन्यत्वेन आश्रयासिद्धेः। **(शं) न च** अदृष्टाजनककृत्यजन्यत्वं पक्षतावच्छेदकम्, **(स)** यत्रैकयैव कृत्या घटो गङ्गाजलसंयोगश्च जनितस्तयोः पक्षत्वे सिद्धसाधनम्। तस्मात् स्वजनकादृष्टाजनककृतिजन्यं यद् यत् स्वं तावद्भेदकूटविशिष्टजन्यत्वं पक्षतावच्छेदकम्। कृतिजन्यत्वं च न साध्यम्, अदृष्टद्वारास्मदादिकृतिजन्यत्वेन सिद्धसाधनमर्थान्तरं च।**(शं) न च** उपादानविषयककृतिजन्यत्वम्, **(स)** हविर्गोचरकृतेः अदृष्टद्वारा क्षितिजनकत्वेन तद्दोषतादवस्थ्यम्। **(शं) न च** विषयतावच्छिन्नजनकतानिरूपितसमवायावच्छिन्नकृतिजन्यत्वं साध्यम्, **(स)** ध्वंसस्य पक्षत्वे बाधापत्तेः। **(शं) न च** पक्षे सत्त्वमपि विशेषणम्, **(स)** तथापि हेतोस्तत्र सत्त्वेन व्यभिचारः। न च प्रागभावप्रतियोगित्वे सति सत्त्वमेव हेतुः। तथा सति ध्वंसस्येश्वरकर्तृकत्वानुपपत्तेः। तस्माद्विषयत्वावच्छिन्नजनकतानिरूपितकृतिजन्यत्वं साध्यम्।

[२] कार्यत्वं च न कृतिजन्यत्वम्, साध्याविशेषात्, किन्तु प्रागभावप्रतियोगित्वविशिष्टसत्त्वम्। **(शं) न च** अप्रयोजकम्, **(स)** प्रागभावप्रतियोगित्वविशिष्टसत्त्वावच्छिन्नं प्रति कृतित्वेन कारणत्वात्। न तु कृतिजन्यतावच्छेदकं घटत्वादिकं गौरवादिति प्राचीनाः। नवीनास्तु जन्यकृतित्वावच्छेदेन पक्षता विषयतावच्छिन्नजनकतानिरूपितसमवायावच्छिन्नकृतिजन्यत्वं साध्यम्। पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरवच्छेदकावच्छेदेनानुमितावप्रतिबन्धकत्वात्।

**(शं) न च** जले सन्दिग्धानैकान्तिकत्वम्, **(स)** साध्याभाववति हेतुसन्देहस्य सन्दिग्धानैकान्तिकत्वात्। वस्तुतोऽनुकूलतर्कानवतारदशायां व्याप्तिग्रहप्रतिबन्धस्य तत्रेष्टत्वात्। **न च** घटत्वादेरवश्यं कृतिजन्यतावच्छेदकत्वे कार्यत्वस्य तदवच्छेदकत्वे **मानाभावः**, तथापीश्वरसिद्धेरप्रत्यूहत्वात्। तथाहि- कृतिजन्यतावच्छेदकघटत्वाश्रयखण्डघटस्य कृतिं विनानुपपद्यमानस्य जनिकास्मदादिकृतिभिन्ना कृतिः। सा च गुणत्वेन द्रव्याश्रितत्वादीश्वरसमवेता सिद्ध्यति।

**[३]** पक्षोऽपि घट एव। हेतुरपि घटत्वादिकं दृष्टान्तश्च घट एव। एवं ज्ञानेच्छाजन्यत्वमपि साध्यम्। **(शं) न च** घटत्वावच्छिन्नं प्रति कृतेर्विषयतया हेतुत्वे मानाभावः,चेष्टाद्वारैव कृतेः कारणत्वात्, अन्यथाचेष्टस्य घटकर्तृत्वापत्तेः। एवं चेष्टादेरनुत्पत्तौ संयोगाद्यभावेन घटादेरनुत्पत्त्यापत्तेश्चेति **वाच्यम्**, विषयतया कार्यकारणभावस्यान्वयव्यतिरेकसहकृतप्रमाणसिद्धत्वात्। **न च** ईश्वरज्ञानादेः सर्वविषयकत्वे मानाभाव इति **वाच्यम्।** अनादिद्व्यणुकप्रवाहस्य पक्षत्वे सर्वविषयकत्वसिद्धेः। **न च** गुणादिविषयकत्वे जात्यादिविषयकत्वे मानाभावः, एवमभावादिविषयकत्वे परमाणुपरिमाणादिविषयकत्वे मानाभाव इति **वाच्यम्,** ज्ञानादेः नियतविषयता च कारणाधीना, कारणाभावेन नियतविषयत्वाभावः सिद्ध्यति। **(शं) न च** निर्विषयकत्वमेवास्ताम्, **(स)** कार्यकारणभावबलेन घटादिविषयत्वसिद्धेः उत्पादविनाशकल्पने गौरवप्रसङ्गेनानित्यत्वबाधे नित्यत्वसिद्धेः।

**[४] न च** ईश्वरस्य तदीयज्ञानादेश्चैकत्वे मानाभाव इति **वाच्यम्**,लाघवसहकृतनिरुक्तप्रमाणत एव तत्सिद्धेः। तथाहि– क्षितिकर्तुरेकत्वे लाघवमनेकत्वे गौरवमित्याकारकं लाघवज्ञानं सहकारि। एकत्वं च प्रति योग्यवृत्तिनित्यज्ञानवन्निष्ठभेदाप्रतियोगित्वं स्वभिन्नवृत्तिज्ञानादिध्वंसप्रतियोगित्वाश्रयज्ञानसमवायित्वम्। तस्य तदीयज्ञानादेश्चैकत्वं च स्वभिन्नज्ञानावृत्तिध्वंसप्रतियोगित्वाभावाश्रयज्ञानत्वादिकं स्वाधिकरणावृत्तिस्वभिन्नज्ञानकत्वम्, आत्मानात्मवृत्तिभिन्नदुःख्यवृत्तिद्वित्वशून्यत्वं वा। ईश्वरघटवृत्तिद्वित्वस्य वारणाय भिन्नान्तम्, जीवात्मपरमात्मवृत्तिद्वित्ववारणाय अवृत्तिपर्यन्तम्। एतादृशं चैकत्वं लाघवज्ञानोपनीतं तस्मिन् तदीयज्ञानादौ भासते। **न च** तादृशज्ञानादित्रयं जीवात्मन्येवास्तामिति **वाच्यम्,** तथा सति भ्रमसंशयौ न स्याताम्, विरोधिनिर्णयस्य सदा सत्त्वात्। एवं भिन्नविषये सर्वदानुमितिः स्यात्। एवं प्रत्यक्षेच्छायाः सर्वदा सत्त्वात् सर्वदैव प्रत्यक्षमेव स्यात्। एवमन्यदप्यूह्यम्।

**[५] यद्यपि** सर्वत्रैव चैत्रीयत्वादिकं प्रतिबन्धकतावच्छेदके निवेश्यम्। चैत्रीयत्वं चावच्छेदकसम्बन्धेन चैत्रवृत्तित्वम्, नित्यज्ञानस्य व्याप्यवृत्तित्वात्,**तथापि** विनिगमनाविरहेणानन्तात्मनि त्रयाणां सम्बन्धकल्पना{म}पेक्षतया(या तदा)श्रयत्वेनैक एव कल्प्यते। इदमत्रावधेयम्– तादृशघटादिजनकतया ज्ञानादित्रयं सिद्ध्यतु तेषामाश्रये किं प्रमाणं? ज्ञानादिकं द्रव्याश्रितं गुणत्वादित्यप्रयोजकम्, तत्र गुणत्वे मानाभावाच्च। **अत एव** तादृशज्ञानादित्रयं द्रव्याश्रितं गुणत्वात् जीवात्मवृत्तिज्ञानवदिति **अपास्तम्।**

**अत्र वदन्ति**–घटत्वावच्छिन्नं प्रति कृतित्वेन जनकतायां मानाभावः। आद्यघटवृत्तितद्व्यक्तित्वावच्छिन्नं प्रति तादृशघटमात्र-वृत्तिवैजात्यावच्छिन्नं प्रति वा कृतित्वेन कारणतास्तु। किञ्च, चेष्टादाववश्यं कारणत्वे विषयत्वे विषयतया कारणत्वे मानाभावः। वस्तुतो विजातीयसंयोगजन्यतावच्छेदकमेव घटत्वादिकम्, विजातीयसंयोगे चेष्टा कारणम्, चेष्टायां कृतिः कारणम्।

**[६] यत्तु** चेष्टात्वावच्छिन्नं प्रति कृतिः कारणम्। यत्र चेष्टा समवायेन तत्रावच्छेदकतासम्बन्धेन कृतिः। तथा च मीनशरीरादिचेष्टाजनकतया कृतिः सिद्ध्यति। सा च नित्यैव, उत्पादविनाशकल्पनायां मानाभावात् गौरवाच्च। कार्यकारणभावबलेन व्याप्यवृत्तेरवच्छेदकं कल्प्यते। इतीश्व[र]सि[द्धि]रिति, **तन्न**, तथा सति

मीनादिशरीरचेष्टायां तारतम्यं न स्यात्, तदीयकृतेरेकत्वात्। तथा च कृतिजन्यतावच्छेदकं चेष्टात्वव्याप्यवैजात्यम्, तच्च मीनादिशरीरादिचेष्टावृत्ति न भवति। तच्चेष्टोत्पत्तौ अदृष्टवदात्मसंयोगो नियामकः। वस्तुतस्तु मीनादिशरीरक्रियायां चेष्टात्वे मानाभावः। कदाचिच्चेष्टते इति प्रतीतिस्तु भ्रान्ता।

**[७] (शं) न च** श्रुतित एव तत्सिद्धिः **(स)** श्रुतिस्तावत् शाब्दबोधजनकतया प्रमाणम्। शाब्दबोधं प्रति पदार्थोपस्थितिस्तत्र शक्तिग्रहो हेतुः, तच्चानुमित्यात्मकम्, अनुमानं चाप्रयोजकम्। किञ्च, विजातीयघटत्वावच्छिन्नं प्रति विजातीयकृतित्वेन कारणता एवं विजातीयपटत्वावच्छिन्नं प्रति विजातीयकृतित्वेन कारणता, एवमन्यत्र। तथा चेश्व[र]कृतेः सर्वेषामेव जनकत्वे सर्वजातीनां ईश्वरकृतौ समावेशे साङ्कर्यम्। तथाहि कुलालकृतौ घटजनकतावच्छेदकम्, तत्र न पटजनकतावच्छेदकम्। पटजनकतावच्छेदकं कुविन्दकृतौ, तत्र न घटजनकतावच्छेदकम्। एकस्यामेव चेश्वरस्य कृतौ द्वयोः समावेश इति। **(शं) न च** जनकतावच्छेदकं कृतित्वम्, **(स)** मानाभावात्, किन्तु विजातीयसंयोगत्वमेव। कृतिस्तु चेष्टां प्रति प्रति जनिका।

**[८] एतेन** वैशेषिकनये पाकाद् घटादिद्व्यणुकपर्यन् नाशे पुनः घटान्तरमुत्पद्यते। कृतित्वेन घटत्वेन कार्यकारणभावबलेन पाकघटजनकतयेश्व[र]सिद्धिरिति **अपास्तम्**, विजातीयसंयोगत्वेन घटत्वेन कार्यकारणभावः। तत्र तादृशसंयोगत्वव्याप्यजातिद्वयम्। एकवैजात्यावच्छिन्नं प्रति चेष्टादिद्वारा कृतिः कारणम्। अपरवैजात्यावच्छिन्नं प्रत्यदृष्टवदात्मसंयोगः। पूर्वोत्पन्नघटादिनाशोऽपि विशेषसामग्रीति न किञ्चिदेतत्।

**तस्मात्** श्रुतेर्नेश्वरसिद्धौ कारणत्वमिति अपास्तम्। अनुमानादिना ईश्वरपदशक्तिग्रहे शाब्दबोधमुत्पाद्य श्रुतिः प्रमाणम्,अनुमानं चानुकूलतर्कविरहेणाप्रयोजकमिति सङ्क्षेपः॥

**॥इति ईश्वरवादः समाप्तः॥**

॥शुभं भूयात्॥

## १२

## ॥ईश्वरनिराकरणवादः॥

**[१]** इह हि न्यायमतविततवासानावासितान्तःकरणैर्नैयायिकादिभिः समस्तवस्तुविस्तारनिर्माणनिपुणत्वमीश्वरस्य अभ्युपगम्यते। तन्निराकरणार्थं बौद्धराद्धान्तनिबद्धविशुद्धबुद्धिभिः सौगतैः प्रमाणमभीधीयते। तद्यथा यद्यत्सूक्तविव(वि)क्तयुक्तयुक्ति-विचारगोचरचारितां नाचरति न तत् सद्व्यवहृतिपथमवतरति। यथा तुरङ्गशृङ्गम्, सूक्तयुक्तयुक्तिविचारगोचरातीतश्चेश्वरः। तस्मान्न व्यवहारपथम् अवतातरीति। यश्च न व्यवहारपथमवतेतीर्यते नासावविद्यमानाद् विशिष्यते।

**[२]** न चायमसिद्धो हेतुः। तथा हि–ईश्वरेण चेतनवता अचेतनस्याधिष्ठानं किं तद्धेतुकत्वं किं वा तदिच्छानुविधायकत्वम्? न तावत्तद्धेतुकत्वम्, व्यतिरिक्तकरणजन्यत्वाभ्युपगमात्। नापि तदिच्छानुविधायकत्वं तस्याप्यनुपपत्तेः। तथा हि–कर्म सचेतनं वा स्यादचेतनं वा? यदि सचेतनं किमेतेन प्रयोजनम्? अथाचेतनं तदा कथं तदिच्छामनुवर्तते?

**[३]** किञ्च, ईश्वरस्य भूभूधरादिक्रियायां सप्रयोजना प्रवृत्तिर्निःप्रयोजना वा?। यदि सप्रयोजना तदा तस्य कृतकृत्यता हीयते। **अथ** निःप्रयोजना **तदप्ययुक्तम्,** प्रेक्षावत्ताक्षतेः। न हि प्रेक्षापूर्वकारी प्रयोजनमनुद्दिश्य प्रवर्तते। **अथ** प्रयोजनमन्तरेणापि प्राणिकृपालुतया प्रवृत्तिः, **तदप्यचारु,** तस्य दुःखदायित्वानुपपत्तेः। न हि दुष्टोऽपि करुणया प्रवर्तमानो दुःखदायी भवति। किञ्च, छागादीनां पुरीषादेर्वर्तुलीकरणे का करुणा? **अथ** क्रीडया तत्र प्रवृत्तिः **तदपि न विद्वज्जनमनांसि रञ्जयति**, तस्यात्यन्तविशुद्धात्मनः अनार्यजनोचितायां क्रीडायां प्रवृत्तेरेवासम्भवात्। **अथ** कृपापरीतचेतसोऽपि कर्मपारतन्त्र्येण फलप्रदानात् न दुःखदायित्वानुपपत्तिः, **तदप्यसङ्गतम्**, तस्यानीश्वरताप्राप्तेः। तथा हि–कर्मणां करणे अस्य सामर्थ्यं विद्यते न वा? यदि विद्यते कृपायुक्तः शुभमेव कारयेत्। अथ न विद्यते कर्मणामीशता प्राप्ता किमीश्वरेण कर्तव्यम्?

**[४] अथ** एवं सङ्गिरते वाग्मिनः-यथानुरूपं फलं भृत्येषु राज्ञः प्रयच्छतो नासामर्थ्यं न च फलस्यैकत्वमुपलभते तद्वदीश्वरेऽपि, **तदप्यसमीचीनम्,** दत्तोत्तरत्वात्। तथा हि–समर्थो वा स्यादसमर्थो वा यदि समर्थः कर्मभिः शुभङ्कारयतां सदा अथासमर्थः कर्मणामीशता प्राप्ता इति।

**[५] अथ** कोऽत्र पर्युनुयुज्यते, ईदृश एव ईश्वरस्य स्वभावो यदुत-कर्मपारतन्त्र्येण सुखदुःखदायी भगवानिति **चेत्,** अत्रोच्यते, स स्वभावो विधिविषये नित्यो वा स्यात् अनित्यो वा स्यात्? यदि नित्यस्तदा संहारकर्तृत्वं नोपपद्यते। **अथ** अनित्यः **तदा** स हेतुर्वा स्यादहेतुर्वा स्याद् अनेककल्पना। यद्यहेतु उदासस्वभावः

सर्वस्य प्रसज्येत, नियामकहेतोरभावात्। **अथ** सहेतुः **तदा** स एव हेतुरन्यो वा? **यदि** अन्यः **तदा** विधातरि स्वभावस्य कर्तृत्व[म]सिद्धम्। **अथ** स एव हेतुः **तदा** नित्यादिविकल्पस्य पुनरावृत्तिप्रसङ्गः।

**[६]** किञ्च, एककर्तृपूर्वकत्वं जगतः साध्यते अनेककर्तृपूर्वकत्वं वा? न तावदेककर्तृपूर्वकत्वम्, प्रासादादिषु अनेककर्तृपूर्वकस्य दर्शनात्। **अथ** एकेन सूत्रितमनेके कुर्वन्तीति चेत्, **तदप्ययुक्तम्,** स्वातन्त्र्येणैककार्ये प्रवृत्तिदर्शनात्। अथ द्वितीयः तदा सिद्धसाध्यता, अनेकात्मपूर्वकस्याभ्युपगमात्। तदेवं नास्य हेतोरसिद्धविरुद्धानैकान्तिकदोषोद्भावनं कर्तुर्गम्यतेतरामिति स्थितम्।

**॥इति ईश्वरवादनिराकरणम्॥**

१३

## ॥ईश्वरवादस्थलम्॥

[१] किं पुनरीश्वरसद्भावे प्रमाणम्? आगमस्तावद्। अनुमानं च महाभूतचतुष्टयमुपलब्धिमत्पूर्वकं कार्यत्वात् घटवत्। कार्यं च महाभूतचतुष्टयम्, तस्मादेतदप्युपलब्धिमत्पूर्वकम्। **(शं)** प्रमाणेन पूर्वकोट्यनुपलब्धेरसिद्धं पृथिव्यादिषु कार्यत्वमिति **चेत्**, तदयुक्तम्, सावयवत्वात्। द्रव्यत्वे सति अवयवसमवायः सावयवत्वम्। यत्सावयवं तत्कार्यं यथा घटः। सावयवं च पृथिव्यादि। तस्मादेतदपि कार्यमेव।

[२] **ननु** व्याप्तिग्रहणादनुमानस्य प्रवृत्तिः। कार्यत्वं बुद्धिमत्पूर्वकत्वयोश्च व्याप्तिग्रहणमशक्यम्। घटादिषु कर्तृपूर्वककार्यत्व-प्रतीतिकाल एवाङ्कुरादिषूत्पद्यमानेषु तदभावप्रतीतेः। **न** चाङ्कुरादीनां पक्षत्वमिति **न्याय्यम्**, गृहीतायां व्याप्तावनुमानप्रवृत्तिकाले प्रतिवाद्यपेक्षया पक्षादिप्रविभागः। इह तु सर्वदैव प्रतिपक्षप्रतीत्याक्रान्तत्वाद् व्याप्तिग्रहणमेव न सिद्ध्यतीत्युक्तम्।

**अत्र प्रतिविधीयते**-घटादिषु पूर्वकर्तृककार्यत्वप्रतीतिरस्ति नाङ्कुरादिष्वित्येवं द्वैतोपलम्भेऽपि व्याप्तिग्रहणसम्भवे पृथिव्यादिषु उपलब्धिमत्पूर्वककार्यत्वानुमानं प्रवर्तते। यदि चैवं द्वैतोपलम्भाद् व्याप्तिग्रहणाभावः तदानीं मीमांसाभाष्यकृदभिमतं सामान्यतोदृष्टम् आदित्यगत्यनुमानमपि न सिद्ध्यति। तत्रापि देवदत्ते गतिपूर्वकदेशान्तरप्राप्तिग्रहणकाल एव नक्षत्रादिषु केवलदेशान्तरप्राप्तिमात्रोपलम्भात्। **अथ** तेषु देशविप्रकर्षेणापि गतेरनुपलब्धौ सम्भवत्या न तया व्याप्तिग्रहणहेतोर्निरुपाधिप्रवृत्तस्य भूयोदर्शनस्य प्रतिरोधस्तुल्यकक्षत्वाभावात्, **एवं चेद्**, अत्राप्यशरीरित्वेनाभ्युपेतस्य कर्तुः स्वरूपविप्रकर्षेणाङ्कुरादिष्वनुपलम्भसम्भवात् न तेन निरुपाधिप्रवृत्तस्य भूयोदर्शनस्य सामर्थ्यमुपहन्यते इति समानम्।

[३] अपि भोः! किमनुमानेन कर्तृमात्रं साध्यते पृथिव्यादिविनिर्माणसमर्थो वा कर्ता? कर्तृमात्रप्रसाधने तावदभिप्रेतस्यासिद्धिः। न ह्यस्मदादिसदृशः कर्ताभिप्रेतो भवताम्। न च तेनेदं पृथिव्यादिकार्यमर्वाग्दृशां शक्यनिर्माणम्। पृथिव्यादि विनिर्माणसमर्थस्तु कर्ता न सिद्ध्यत्यनन्वयात्। अन्वयबलेन हि दृष्टान्तो दृष्टकर्तृसदृशः सिद्ध्यति। **(शं) नायं प्रसङ्गः** कर्तृविशेषस्याप्रसाधनात् व्याप्तिसामर्थ्याद् बुद्धिमत्पूर्वकत्वसामान्ये साध्यमाने पृथिव्यादिविनिर्माणसामर्थ्यलक्षणोऽपि विशेषः प्रसिद्ध्यति। निर्विशेषस्य सामान्यस्य सिद्ध्यभावात् मा सिद्ध्यतु सामान्यमिति, **चेत्**, न, कार्यत्वेन सह तद्व्याप्तेरप्रतिक्षेपार्हत्वात्। पक्षधर्मताबलेन चाभिप्रेतो विशेषस्तत्र व्याप्तिसामर्थ्यात् सामान्यं सिद्ध्यति। यदि हि व्याप्तमपि सामान्यं न सिद्ध्यति धूमादप्यग्निसामान्यं न सिद्ध्येत् अग्निविशेषस्य अनन्वितस्यासिद्धेः। निर्विशेषस्य च सामान्यस्यानवस्थानात्।

[४] **अथेदमुच्यते**-द्वयमनुमानस्य रूपं व्याप्तिः पक्षधर्मता च। तत्र व्याप्तिसामर्थ्यात्सामान्यं सिद्ध्यति। पक्षधर्मताबलेन चाभिप्रेतो विशेषः। पर्वतावच्छिन्नवह्निस्वलक्षणात्मा सिद्ध्यति। अन्यथा पक्षधर्मतायाः क्वोपयोगः? क्व चानुमानस्य गृहितग्राहिणः प्रामाण्यम्? **एवं चेद्,** ईश्वरानुमानेऽपि तुल्यम् अन्यत्राभिनिवेशात्।

[५] **अथ मतम्,** सिद्ध्यत्यनुमाने विशेषोऽपि यत्र प्रमाणविरोधो नास्ति। तथा हि–धूमात्पर्वतनितम्बवर्तिवह्निविशेषसिद्धौ का नामानुपपत्तिः? दृष्टो हि देशकालादिभेदः स्वलक्षणानाम्। ईश्वरानुमाने विशेषो न सिद्ध्यति, प्रमाणविरोधात्। तथा हि–नात्र शरीरिपूर्वकत्वं साधनीयम्। शरीरे सत्यवश्यमिन्द्रियप्राप्तौ अतीन्द्रियोपादानोपकरणादिकारकशक्तिपरिज्ञानासम्भवे कर्तृत्वासम्भवात्। अशरीरिपूर्वकत्वं चाशक्यसाधनम्। सर्वो हि कर्ता कारकस्वरूपमवधारयति, तत इच्छति-इदमहमनेन निवर्तयामीति, ततः प्रयतते, तदनु कार्यं व्यापारयति, ततः कारणान्यधितिष्ठति, ततः करोति। अनवधारयन् अनिच्छन् अप्रयतमानः कायमव्यापारयन् कारणान्य[न]धितिष्ठन् न करोतीत्यन्वयव्यतिरेकाभ्याम् बुद्धिवत् शरीरमपि कार्योत्पत्तावुपायभूतं निखिलोपाधिप्रहाणेन व्याप्तिग्राहकप्रमाणाद् एवावधारितसामर्थ्यं न शक्यते प्रहातुं वह्नेरिवेन्धनविकारसामर्थ्यं धूमानुमाने। तत्परित्यागे च बुद्धिरपि त्यज्यताम्।**(शं)** प्रभावातिशरीरवदबुद्धिमानेव करिष्यति, उपादानोपकरणादिस्वरूपानभिज्ञो न शक्नोतीति **चेत्,** कुत एतत्? **(शं)** तथानुपलम्भादिति **चेत्,** फलितं ममापि मनोरथद्रुमेण, न तथा तावदिच्छाप्रयत्नव्यवहिता बुद्धिः कार्योत्पत्तावुपयुज्यते यथेदमव्यवहितव्यापारं शरीरम्। एवं तर्हि का गतिरत्र बुद्धिमत्पूर्वकत्वसामान्यस्यागतिरेव, उभयोरपि शरीरित्वाशरीरित्वविशेषयोरनुपपत्तेः। निर्विशेषस्य सामान्यस्य सिद्ध्यभावात् किमनुमानस्य दूषणम्? न किञ्चित्। पुरुष एवायं विशेषाभावात् शशविषाणाय मानसामान्ये साधनानर्हे साधनं प्रयुञ्जानो निगृह्यते। यथा कश्चिन्निशितं कृपाणम् अच्छेद्यमाकाशं प्रति व्यापारयन्।

**अथ** अनुमानदूषणं विना न तुष्यति भवान् **तदानीम्** इदम् अशरीरिपूर्वकत्वानुमानं व्याप्तिग्राहकप्रमाणबाधितत्वात् कालात्ययापदिष्टम्, व्याप्तिबलेन चाभिप्रेतमशरीरित्वविशेषं विरुन्धद् विशेषविरुद्धम्। तच्च विरुद्धावान्तरप्रभेद एवेति पूर्वपक्षसङ्क्षेपः।

अत्र प्रतिसमाधिः। किं शरीरित्वमेव कर्तृत्वमुत परिदृष्टसामर्थ्यकारकप्रयोक्तृत्वम्? न तावच्छरीरित्वमेव कर्तृत्वम्, सुषुप्तस्योदासीनस्य च कर्तृत्वप्रसङ्गात्। किं तु परिदृष्टसामर्थ्यकारकप्रयोक्तृत्वम्। तस्मिन् सति कार्योत्पत्तेः। तच्चाशरीरस्यापि निर्वहति। यथा स्वशरीरप्रेरणायामात्मनः। **(शं)** अस्ति तत्राप्यस्य स्वकर्मोपार्जितं तदेव शरीरमिति **चेत्,** सत्यमस्ति परं प्रेरणाया यो न भ(भा?)ति, स्वात्मनि क्रियाविरोधात्। **(शं)** प्रेर्यतयास्तीति **चेत्,** ईश्वरस्यापि प्रेर्यः परमाणुरस्ति। शरीरप्रेरणाया इच्छाप्रयत्नाभ्यामुत्पत्तेरिच्छाप्रयत्नयोश्च सति शरीरभावाद् असति अभावात्। **(शं)** अस्ति तस्य स्वप्रेरणायाम् इच्छाप्रयत्नजननद्वारेण उपायत्वमिति **चेत्,** न, तस्येच्छाप्रयत्नयोरुपजननं प्रति कारणत्वात्। लब्धात्मकयोरिच्छाप्रयत्नयोः प्रेरणाकरणकाले तु तदनुपायभूतमेव कर्मत्वादिति व्यभिचारः। अनपेक्षितशरीरव्यापारस्येच्छाप्रयत्नमात्रसचिवस्यैव चेतनस्य कदाचिदचेतनव्यापारं प्रति सामर्थ्यदर्शनात्। बुद्धिमदव्यभिचारि तु कार्यत्वमितीश्वरसिद्धिः।

**(शं)** इच्छाप्रयत्नयोरुत्पन्नावपि शरीरमपेक्षणीयमिति चेत्, अपेक्ष्यतां यत्रानयोरागन्तुकत्वम्। यत्र पुनरिमौ स्वाभाविकौ आसाते तत्रास्यापेक्षणं व्यर्थम्। न च बुद्धीच्छाप्रयत्नानां नित्यत्वे कश्चिद्विरोधः। दृष्टा हि रूपादीनां गुणानामाश्रयभेदेन द्वयी गतिः नित्यता चानित्यता च। तथा बुद्ध्यादीनामपि भविष्यति। सेयमीश्वरवादे वादिप्रतिवादिनोः पराकाष्ठा।

**[६] (शं)** अतः परं प्रपञ्चः आत्माधिष्ठाता परमाणवः प्रवर्तिष्यन्त इति **चेत्,** न, तेषां स्वकर्मोपार्जितेन्द्रियगणाधीनसंविदां शरीरोत्पत्तेः पूर्वविषयावबोधविरहात्। **(शं)** अस्त्यात्मनामपि सर्वविषयव्यापिसहजं चैतन्यमिति **चेत्**, शरीरसम्बन्धभाजां तत्केन विलुप्तं येनेदं सर्वत्रापूर्ववदवभासयति? **(शं)** शरीरावरणतिरोधानत्वादात्मन्येव समाधीयते न बहिमुर्खं भवतीति **चेत्**, व्यापकत्वेन तस्य विषयसम्बन्धानुच्छेदे नित्यत्वेन च विषयप्रकाशस्वभावस्यानिवृत्तौ का तिरोधाने वाचो युक्तिः? **(शं)** वृत्तिप्रतिबन्धश्चैतन्यस्य तिरोधानमिति **चेत्,** कथं तर्हि शरीरिणां विषयग्रहणम्? **(शं)** क्वचिदस्य वृत्तयो न निरुध्यन्त इति **चेत्,** कुतोऽयं विशेषः? इन्द्रियप्रत्यासत्तिविशेषात्। यद्येवमिन्द्रियाधीनश्चैतन्यस्य विषयेषु वृत्तिलाभो न सन्निधिमात्रनिबन्धनः। सत्यपि व्यापकतत्वे सर्वार्थेषु वृत्त्यभावाद् इन्द्रियवैयर्थ्यप्रसङ्गाच्चेति साधूक्तमशरीरिणामात्मनां न विषयावबोध इति। तथा चेके पठन्ति-

***पराञ्चि खानि व्यागृणत्स्वयम्भूस्तस्मात्परान्पश्यति नान्तरात्मेति।*** (कठोपनिषद्)

अनवबोधे च तेषां नाधिष्टातार इति तेभ्यः परः सर्वार्थदर्शी सहजज्ञानमयः कर्तृस्वभावः कोऽप्यधिष्ठाता कल्पनीयः। चेतनव्यापारमन्तरेणाचेतनानां प्रवृत्त्यभावात्।

[७] किमेकोऽनेको वा? एक इति वदामः। बहूनामसर्वज्ञत्वेऽस्मदादिवदसामर्थ्यात्। सर्वज्ञत्वे त्वेकस्यैव सामर्थ्यादपरेषाम् अनुपयोगित्वात्। न च समप्रधानानां भूयसां सर्वदैकमत्ये हेतुरस्तीति कदाचिदनुत्पत्तिरपि कार्यस्य स्यात्। एकाभिप्रायानुरोधेन च सर्वेषां प्रवृत्तावेकस्येश्वरत्वं नापरेषां परिषदामि[ति] कार्योत्पत्त्यनुरोधेन सर्वेषामविरोधात्प्रत्येकमनीश्वरत्वम्।

तदेवं कार्यविशेषेण सिद्धस्य कर्तृविशेषस्य सर्वज्ञत्वान्न कुत्रचिद् वस्तुनि विधेयानुपलम्भोऽस्ति। अतो न तन्निबन्धनं मिथ्याज्ञानम्, मिथ्याज्ञानाभावे च न तन्मूलौ रागद्वेषौ, तयोरभावान्न तत्पूर्विका प्रवृत्तिः, प्रवृत्यभावे च न तत्साध्यौ धर्माधर्मौ, तयोश्चाभावात्तज्जयोरपि सुखदुःखयोरभावः। सर्वदैव चानुभवसद्भावात्स्मृतिसंस्कारावपि नासाते इत्यष्टगुणाधिकरणो भगवानीश्वर इति केचित्।

अन्ये तु बुद्धिरेव तस्याव्याहता क्रियाशक्तिरित्येवं वदन्त इच्छाप्रयत्नावप्यनङ्गीकुर्वाणाः षड्गुणाधिकरणोऽयमित्याहुः।

[८] स किं बद्धो मुक्तो वा? न तावद्बद्धो बन्धनसमाम्नातस्य दुःखहेतोः क्लेशादेरसम्भवात्। मुक्तोऽपि न भवति। बन्धविच्छेदपर्यायित्वान्मुक्तेः। नित्यमुक्तस्तु स्यात्। यथाह-तत्र भगवान् पतञ्जलिः–***क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर*** (योगसूत्र १.२४)इति॥

॥इति ईश्वरवादस्थलम्॥

## ॥ईश्वरजगत्कर्तृत्वनिराकरणवादः॥

[१] इह केचिदित्थं प्रमाणयन्ति- उर्वीपर्वततर्वादिकं सर्वं बुद्धिमत्कर्तृकं कार्यत्वात्। यद्यत्कार्यं तत्तद् बुद्धिमत्कर्तृकम्, यथा घटः तथा चेदम्, तस्मात्तथा, व्यतिरेके गगनम्। यश्च बुद्धिमांस्तत्कर्ता स भगवानीश्वर एवेति। न चायमसिद्धो हेतुर्यतो भूभूधरादीनां स्वकारणकलापजन्यतयावयवितया वा कार्यत्वं सर्ववादीनां प्रतीतमेव। नाप्यनैकान्तिको विरुद्धो वा विपक्षादत्यन्तव्यावृत्तत्वात्। नापि कालात्ययापदिष्टः प्रत्यक्षानुमानागमाबाधितधर्मधर्म्यनन्तरं प्रतिपादितत्वात्। नापि प्रकरणसमः, तत्प्रतिपन्थिधर्मोपपादनसमर्थप्रत्यनुमानाभावात्।

[२] **न च** वाच्यम् ईश्वरः पृथ्वी-पृथ्वीधरादेर्विधाता न भवति, अशरीरत्वात्, निवृत्तात्मवदिति प्रत्यनुमानं तद्बाधकमिति **(स)** यतोऽत्रेश्वररूपो धर्मी प्रतीतोऽप्रतीतो वा प्ररूपितः? न तावदप्रतीतो हेतोराश्रयासिद्धिप्रसङ्गात्। प्रतीतश्चेत्, येन प्रमाणेन प्रतीतस्तेनैव किं स्वयमुत्पादिततनुर्न प्रतीयते? इत्यतः कथमशरीरत्वं? तस्मान्निरवद्य एवायं हेतुरिति।

स चैक एव। बहूनां हि विश्वविधातृत्वस्वीकार(रे) परस्परं विमतिसम्भवनाया अनिवार्यत्वात्। एकैकस्य वस्तुनोऽन्योन्यरूपतया निर्माणे सर्वमसमञ्जसमापनीपद्येत।

[३] तथा सर्वगः, सर्वत्र गच्छतीति सर्वगः = सर्वव्यापी। तस्य हि प्रतिनिय[त]देशवर्तित्वेऽनियतदेशवृत्तीनां विश्वत्रयान्तर्वर्तिपदार्थसार्थानां यथावन्निर्माणानुपपत्तिः, कुम्भकारादिषु तथादर्शनात्। अथवा सर्वं गच्छति इति सर्वगः = सर्वज्ञः ***सर्वे गत्यर्था ज्ञानार्था ()*** इति वचनात्। सर्वज्ञत्वाभावे हि यथोचितोपादानकारणाद्यनभिज्ञत्वादनुरूपकार्योत्पत्तिर्न स्यात्।

[४] तथा स्ववशः = स्वतन्त्रः सकलप्राणिनां स्वेच्छया सुखदुःखयोरनुभावनसमर्थत्वात्। तथा चोक्तम्-

***ईश्वरप्रेरितो गच्छेत्, स्वर्गं वा श्वभ्रमेव वा। अन्यो(ज्ञो) जन्तुरनीशोऽयमात्मनः सुखदुःखयोः॥*** इति

पारतन्त्र्ये तु तस्य परमुखप्रेक्षितया सुख(मुख्य)कर्तृत्वव्याघातादनीश्वरत्वापत्तिः।

तथा स नित्यः अप्रच्युतानुत्पन्नस्थिरैकरूपः। तस्य ह्यनित्यत्वे परोत्पाद्यतया कृतकत्वप्राप्तिः। अपेक्षितपरव्यापारो हि भावः स्वभावनिष्पत्तौ कृतक इत्युच्यते। यश्चापरः तत्कर्ता कल्प्यते स नित्योऽनित्यो वा? नित्यश्चेदधिकृतेश्वरेण किमपराद्धम्?। अनित्यश्चेत् तस्याप्युत्पादकान्तरेण भाव्यम्, तस्यापि नित्यानित्यकल्पनायामनवस्थादौस्थ्यमिति। तदेवमेकत्वादि विशेषणविशिष्टे(ष्टो) भगवानीश्वरस्त्रिजगत्कर्तेति प्रयोगः प्रमाणनामारूढः।

**[५]** अत्र प्रतिविधीयते। **यत्तावदुक्तं** परैः–क्षित्यादयो बुद्धिमत्कर्तृकाः कार्यत्वाद्, घटवदिति, **तदयुक्तं**, व्याप्तेरग्रहणात्। साधनं हि सर्वत्र व्याप्तौ प्रमाणेन सिद्धायां साध्यं गमयेदिति सर्ववादिसंवादः। स चायं जगन्ति(ति) सृजन् सशरीरोऽशरीरो वा स्यात्। सशरीरोऽपि किमस्मदादिवद् दृश्यशरीरविशिष्ट उत पिशाचादिवददृश्यशरीरविशिष्टः?। प्रथमपक्षे प्रत्यक्षबाधः, तमन्तरेणापि च जायमाने तृणतरुपुरन्दरधनुरभ्रादौ कार्यत्वस्य दर्शनात्, प्रमेयत्वादि च साधारणानैकान्तिको हेतुः। द्वितीयविकल्पे पुनरदृश्यशरीरत्वे तस्य माहात्म्यविशेषः कारणमाहोस्विदस्मदाद्यदृष्टवैगुण्यम्? प्रथमप्रकारः कोशपानप्रत्यायनीयः, तत्सिद्धौ प्रमाणाभावात्, इतरेतराश्रयदोषापत्तेश्च। सिद्धे हि माहात्म्यविशेषे तस्यादृश्यशरीरत्वं प्रत्येतव्यम्, तत्सिद्धौ च माहात्म्यविशेषसिद्धिरिति। द्वैतीयिकस्तु प्रकारो न सञ्चरत्येव, विचारगोचरे संशयानतिवृत्तेः। किं तस्यासत्त्वाद् अदृश्यशरीरत्वं प्रति वान्ध्येयादिवत् किं वा अस्मदाद्यदृष्टवैगुण्यात् पिशाचादिवद्? इति निश्चयाभावात्। अशरीरश्चेत्, तदा दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यम्, घटादयो हि कार्यरूपाः सशरीरकर्तृका दृष्टाः, अशरीरस्य च सतः तस्य कार्यप्रवृत्तौ कुतः सामर्थ्यम्? आकाशादिवत्। तस्मात् सशरीराशरीरलक्षणे पक्षद्वयेऽपि कार्यत्वहेत्वोर्व्याप्त्यसिद्धिः। किञ्च, त्वन्मते न कालात्ययापदिष्टोऽप्ययं हेतुः, धर्म्येकदेशस्य तरुविद्युदभ्रादेरिदानीमप्युत्पद्यमानस्य विधातुरनुपलभ्यमानत्वेन प्रत्यक्षबाधितधर्म्यनन्तरहेतुभणनात्।

**[६]** तदेवं न कश्चिज्जगतः कर्ता। एकत्वादीनि तु जगत्कर्तृत्वव्यवस्थापनायानीयमानानि तद्विशेषणानि षण्ढं प्रति कामिन्या रूपसम्पन्निरूपणप्रायाण्येव। तथापि तेषां विचारासहत्वख्यापनार्थं किञ्चिदुच्यते। तत्रैकत्वचर्चस्तावद् बहूनामेककार्यकरणे वैमत्यसम्भावनेति नायमेकान्तः। अनेककीटिकाशतनिष्पाद्यत्वेऽपि शक्रमूर्ध्नः, अनेकशिल्पिकल्पितत्वेऽपि प्रासादादीनाम्, नैकसरघा[1] निर्वर्तितत्वेऽपि मधुच्छत्रादीनां चैकरूपतयाविगानेनोपलम्भात्।

**[७] अथ** एतेष्वेप्येक एवेश्वरः कर्तेति ब्रूषे, **एवं चेद्** भवतो भवानीपतिं प्रति निष्प्रतिमवासना ! तर्हि कुविन्दकुम्भकारादीनां तिरस्कारेण घटपटादीनामपि कर्ता स एव किं न कल्प्यते? **अथ** तेषां प्रत्यक्षसिद्धं कर्तृत्वं कथमपह्नोतुं शक्यम्? **तर्हि** कीटिकादिभिः किं तव विराद्धं? यत्तेषामसदृश(शा)नीदृशप्रयाससाध्यं कर्तृत्वमेकहेलयैवापलप्यते? तस्माद्वैमत्यभयात् महेशितुरेकत्वकल्पना भोजनादिव्ययभयात् कृपणस्योत्पन्नवल्लभपुत्रकलत्रादिपरित्यजनेन शून्यारण्यानीसेवनमिव।

**[८]** तथा सर्वगतत्वमपि तस्य नोपपन्नम्। तद्धिशरीरात्मना ज्ञानात्मना वा स्यात्। प्रथमपक्षे तदीयेनैव देहेन जगत्त्रयस्य व्याप्तत्वाद् इतरनिर्मेयपदार्थानामाश्रयानवकाशः। द्वितीयपक्षे तु सिद्धसाध्यता, अस्माभिरपि साध्यनिरतिशयज्ञानात्मना परमपुरुषस्य जगत्त्रयक्रोडीकरणाभ्युपगमात्। यदि परमेवं भवत्प्रमाणीकृतेन वेदेन न विरोधः। तत्र हि शरीरात्मना सर्वगतत्वमुक्तम्-

---

[1] सरघा मधुमक्षिका। अभि.चि.-१२१३

*विश्वतश्चक्षुरुत विश्वतोमुखो, विश्वतःपाणिरुत विश्वतत्पाद* इत्यादि श्रुतेः।

**[९] यच्चोक्तम्-** तस्य प्रतिनियतदेशवर्तित्वे त्रिभुवनगतपदार्थानामनियतदेशवृत्तीनां यथावन्निर्माणानुपपत्तिः इति, **तत्रेदं परिपृच्छ्यते-**स जगत्त्रयं निर्मिमाणः साक्षादिवत् साक्षाद्देहव्यापारेण निर्मिमीते, यदि वा सङ्कल्पमात्रेण? आद्ये पक्षे एकस्यैव भूभूधरादेर्विधानेऽक्षोदीयसः कालक्षेपस्य सम्भवाद् बहीयसाप्यनेहसा न परिसमाप्तिः। द्वितीयपक्षे सङ्कल्पमात्रेणैव कार्यकल्पनायां निय[त]देशस्थायित्वेऽपि न किञ्चिद् दूषणमुत्पश्यामः, नियतदेशस्थायिनां सामान्यदेवानामपि सङ्कल्पमात्रेणैव तत्तत्कार्यसम्पादनप्रतिपत्तेः। किञ्च, तस्य सर्वगतत्वेऽङ्गीक्रियमाणेऽशुचिषु निरन्तरसन्तमसेषु नरकादिषु स्थानेष्वपि तस्य वृत्तिः प्रसज्येत, तथा चानिष्टापत्तिः। **अथ** युष्मत्पक्षेऽपि यदा ज्ञानात्मना सर्वजगत्त्रयं व्याप्नोतीत्युच्यते, तदाशुचिरसास्वादादीनाम् अप्युपलम्भसम्भावनात् नरकादिदुःखस्वरूपसंवेदनात्मकतया दुःखानुभवप्रसङ्गाच्च अनिष्टापत्तिस्तुल्यैवेति **चेत्**, तवै(दे)तदुपपत्तिभिः प्रतिकर्तुमशक्यस्य धूलिभिरिवावकरणम्। यतो ज्ञानमप्राप्यकारि स्वस्थानस्थमेव विषयं परिच्छिनत्ति,न पुनस्तत्र गत्वा, तत्कुतो भवदुपालम्भः समीचीनः? तर्हि भवतोऽप्यशुचिज्ञानमात्रेण तद्रसास्वादानुभूतिस्तद्भावे हि स्रक्चन्दनऽङ्गनारसवत्यादिचिन्तनमात्रेण तृप्तिसिद्धौ तत्प्राप्तिप्रयत्नवैफल्यप्रसक्तिरिति।

**[१०] यत्तु** ज्ञानात्मना सर्वगतत्वे सिद्धसाधनं **प्रागुक्तं** तच्छक्तिमात्रमपेक्ष्य मन्तव्यम्। तथा च वक्तारो भवन्ति "अस्य मतिः सर्वशास्त्रेषु प्रसरति" इति। **(शं)** न च ज्ञानं प्राप्यकारि, **(स)** तस्यात्मधर्मत्वेन बहिर्निर्गमाभावात्, बहिर्निर्गमे वात्मनोऽचैतन्यापत्त्या अजीवत्वप्रसङ्गः। न हि धर्मी धर्मिणमतिरिच्य क्वचन केवलो विलोकितं(तः)। **यच्च परे दृष्टान्तयन्ति**, यथा-सूर्यस्य किरणाः सूर्यान्निष्कस्य भुवनं भासयन्ति एवं ज्ञानमप्यात्मनः सकाशाद् बहिर्निर्गत्य प्रमेयं परिच्छिनत्तीति **तत्रेदमुत्तरम्,** किरणानां गुणत्वमसिद्धं, तेषां प्रकाशात्मा गुणः स तेभ्यो न जातु पृथग् भवति इति। तथा च धर्मसङ्ग्रहण्यां श्रीहरिभद्राचार्यपादाः-

[१२] ***किरणा गुणा न दव्वं, तेसि पयासो गुणो न या दव्वो। जं नाणं आयगुणो, कहमद्दवो स अन्नत्थ॥***
***गंतुं ण परिछिंदइ, नाणं नेयं तयम्मि देसम्मि। आयत्थं चिय नवरं, अचिंतसत्तीउ विन्नेयं॥***
***लोहोवलस्स सत्ती, आयत्था चेव भिन्नदेसंमि[१]। लोहं आगरिसंती, दीसइ इह कज्जपच्चक्खा॥***
***एवमिह नाणसत्ती, आयत्था चेव हंदि लोगंतं। जइ परिछिंदइ सम्मं, को णु विरोहो भवे तत्थ ?॥*** इत्यादि।
(धर्मसङ्ग्रहणी -३७०-३७३)

**[१३]** अथ सर्वगः सर्वज्ञः इति व्याख्यानम्, तत्रापि प्रतिविधीयते। ननु तस्य सार्वज्ञ्यं केन प्रमाणेन गृहीतम्, प्रत्यक्षेण परोक्षेण वा? न तावत्प्रत्यक्षेण तस्येन्द्रियार्थसन्निकर्षोत्पन्नतया

---

[१] देसंपि इति मुद्रितम्। (शा.सं.मा.१)

अती[न्द्रि]यग्रहणासामर्थ्यात्, नापि परोक्षेण, तद्धि अनुमानं शाब्दं वा स्यात्। न तावदनुमानम्, तस्य लिङ्गग्रहणेन लिङ्गिलिङ्गसम्बन्धस्मरणे(ण)पूर्वकत्वात्, न च तस्य सर्वज्ञत्वेऽनुमेये किञ्चिदव्यभिचारि लिङ्गं पश्यामः, तस्यात्यन्तं विप्रकृष्टत्वेन तत्प्रतिबद्धलिङ्गग्रहणाभावात्।

[१४] **अथ** तस्य सर्वज्ञत्वं विना जगद्वैचित्र्यमनुपपद्यमानं सर्वज्ञत्वमर्थादापादयतीति **चेन्न**, अविनाभावाभावात्। न हि जगद्वैचित्री तत्सार्वज्ञ्यं विनान्यथा नोपपन्ना। द्विविधं हि जगत् स्थावरजङ्गमभेदात्। तत्र जङ्गमानां स्वोपात्तशुभाशुभकर्मपरिपाक-वशेनैव, स्थावराणां तु सचेतनानामियमेव गतिरचेतनानां पुनरुपभोगयोग्यतयानादिकालसिद्धमेव वैचित्र्यमिति।

[१५] नाप्यागमस्तत्साधकः, स हि तत्कृतोऽन्यकृतो वा स्यात्। तत्कृत एव चेत्तस्य सर्वज्ञतां साधयति तदा तस्य महत्त्वक्षतिः, स्वयमेव स्वगुणोत्कीर्त[न]स्य महतामनधिकृतत्वात्। अन्यच(च्च) तस्य शास्त्रकर्तृत्वमपि न युज्यते, शास्त्रं हि वर्णात्मकम्, ते च ताल्वादिव्यापारजन्याः, स च शरीर एव सम्भवी, शरीराभ्युपगमे च तस्य पूर्वोक्ता एव दोषाः। अन्यकृतः चेत् सोऽन्यः सर्वज्ञोऽसर्वज्ञो वा? सर्वज्ञत्वे तस्य द्वैतापत्त्या प्रागुक्ततदेकत्वाभ्युपगमबाधः तत्साधकप्रमाणचर्चायाम[न]वस्थापातश्च। असर्वज्ञः चेत् कस्तस्य वचसि विश्वासः? अपरं च भवदभीष्टागमः प्रत्युत तत्प्रणेतुरसर्वज्ञत्वमेव साधयति, पूर्वापरविरुद्धार्थवचनोपेतत्वात्। तथा हि–

***न हिंस्यात्सर्वभूतानि*** इति प्रथममुक्त्वा पश्चात् तत्रैव पठितम्-

***षट् शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि। अश्वमेधस्य वचनान्न्यूनानि पशुभिस्त्रिभिः॥***

[१६] तथा-***अग्निषोमीयं पशुमालभेत। सप्तदश प्राजापत्यान्पशूनालभेत।*** इत्यादिवचनानि कथमिव पूर्वापरविरोधमनुरुध्यन्ते?

तथानृतभाषणं प्रथमं निषिध्य पश्चाद् ***ब्राह्मणार्थेऽनृतं ब्रूयाद्*** इत्यादि। तथा-

[१७] ***न मर्मयुक्तं वचनं हिनस्ति, न स्त्रीषु राजन् ! न विवाहकाले।***

***प्राणात्यये सेर्वधनापहारे, पञ्चामृ(नृ)तान्याहुरपातकानि॥***

[१८] तथा-अदत्तादानमनेकधा निरस्य पश्चादुक्तम्-***यद्यपि ब्राह्मणो हठेन परकीयमादत्ते बलेन वा तथापि तस्य नादत्तादानम्, यतः सर्वमिदं ब्राह्मणेभ्यो दत्तम्, ब्राह्मणानां तु दौर्बल्याद् <u>वृषला परिभुञ्जते</u>। तस्मादपहरन् ब्राह्मणः स्वमादत्ते स्वमेव ब्राह्मणो भुङ्क्ते स्वं वास्ते स्वं ददाति*** इति।

[१९] तथा-***अपुत्रस्य गतिर्नास्ति*** इति लपित्वा

***अनेकानि सहस्राणि कुमारब्रह्मचारिणाम्। दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम्॥***

इत्यादि कियन्तो दधिमाषभोजनात् कृष्टा विवेच्यन्ते ? तदेवमागमोऽपि न तस्य सर्वज्ञतां वक्ति।

[२०] किञ्च, सर्वज्ञः सन्नसौ चराचरं चेद् विरचयति तदा जगदुपप्लवकरणस्वैरिणः पश्चाद् अपि कर्तव्यनिग्रहान् सुरवैरिण एतदधिक्षेपकारिणश्चास्मदादीन् किमर्थं सृजति इति? तन्नायं सर्वज्ञः।

[२१] तथा स्ववशत्वं स्वातन्त्र्यम्, तदपि तस्य न क्षोदक्षमम्। स हि यदि नाम स्वाधीनः सन् विश्वं विधत्ते परमकारुणिकश्च त्वया वर्ण्यते तत्कथं सुखितदुःखिताद्यवस्थाभेद वृन्दस्थपुटितं घटयति भुवनमेकान्तशर्मसम्पत्कान्तमेव तु किन्न निर्मिमीते? **अथ** जन्मान्तरोपार्जिततत्तदीयशुभाशुभकर्मप्रेरितः संस्तथा करोतीति **(स)** दत्तस्तर्हि स्ववशत्वाय जलाञ्जलिः। कर्मजन्ये च त्रिभुवनवैचित्र्ये शिपि(?)विष्टहेतुकविष्टपसृष्टिकल्पनायाः कष्टैकफलत्वाद् अस्मन्मतमेवाङ्गीकृतं प्रेक्षावता। तथा चायातोऽयं घट्टकुट्यां प्रभातम् इति न्यायः।

[२२] किञ्च, प्राणिनां धर्माधर्मावपेक्षमाणः चेदयं सृजति, प्राप्तं तर्हि यदयमपेक्षते तन्न करोतीति। न हि कुलालो दण्डादि करोति। एवं कर्मापेक्षश्चेदीश्वरो जगत्कारणं स्यात्तर्हि कर्मणीश्वरोनीश्वरः स्याद् इति।

[२३] तथा नित्यत्वमपि तस्य स्वगृह एव प्रणिगद्यमानं हृद्यम्। स खलु नित्यत्वेनैकरूपः सन् त्रिभुवनसर्गस्वभावोऽतत्स्वभावो वा? प्रथमविधायां जगन्निर्माणात् कदाचिदपि नोपरमेत्, तदुपरमे च तत्स्वभावत्वहानेः। एवं च सर्गक्रियाया अपर्यवसानादेकस्यापि कार्यस्य न सृष्टिः। घटो हि स्वारम्भक्षणादारभ्य आपरिसमाप्तेरुपान्त्यक्षणं यावन्निश्चयनयाभिप्रायेण न घटव्यपदेशमश्नुते जलाहरणाद्यर्थक्रियायामसाधकत्वात्। अतत्स्वभावपक्षे तु न जातु जगन्ति सृजेत् तत्स्वभावायोगात् गगनवद्।

[२४] अपि च तस्यैकान्तनित्यस्वरूपत्वे सृष्टिरिव संहारो न घटते नानारूपकार्यकरणेऽनित्यत्वापत्तेः। स हि येनैव स्वभावेन जगन्ति सृजेत्तेनैव तानि संहरेत् स्वभावान्तरेण वा? तेनैव चेत् सृष्टिसंहारयोर्यौगपद्यप्रसङ्गः। तत्स्वभावाभेदे वा एकस्वभावात् कारणादनेककार्योत्पत्तिविरोधात्। स्वभावान्तरेण चेत्, नित्यत्वहानिः। स्वभावभेद एव हि लक्षणमनित्यतायाः। यथा पार्थिवशरीरस्याहारपरमाणुसहकृतस्य प्रत्यहमपूर्वापूर्वोत्पादेन स्वभावभेदादनित्यत्वम्। इष्टश्च भवतां सृष्टिसंहारयोः स्वभावभेदः। रजोगुणात्मकतया सृष्टौ तमोगुणात्मकतया संहरणे सात्त्विकतया स्थितौ तस्य व्यापारस्वीकारात्, एवं चावस्थाभेदः, तद्भेदे चावस्थावतोऽपि भेदान्नित्यत्वक्षतिः।

[२५] अथ अस्तु नित्यस्तवा(था)पि कथं सततमेव सृष्टौ न चेष्टते ? **(शं)** इच्छावशात् **चेत्**, ननु ता अपीच्छाः_स्वसत्तामात्रनिबन्धनात्मलाभाः स एव किं न प्रवर्तयतीति स एवोपालस्तः(म्भः)। तथा शम्भोरष्टगुणाधिकरणत्वे कार्यभेदानुमेयानां तदित्वानामपि विषसरूपत्वात् नित्यत्वहानिः केन वार्यते इति ?

[२६] किञ्च, प्रेक्षावतां प्रवृत्तिः स्वार्थकरुणाभ्यां व्याप्ता, अतश्चायं जगत्सर्गे व्याप्रियते स्वार्थात्कारुण्याद्वा? न तावत्स्वार्थात्तस्य कृतकत्वात्। न च कारुण्यात् परदुःखप्रहाणेच्छादि कारुण्यम्। ततः प्राक् सर्गाज्जीवानाम् इन्द्रियशरीरविषयानुपपत्तौ दुःखाभावेन कस्य प्रहाणेच्छाकारुण्यम् ? सर्गोत्तरकालं तु दुःखिनोऽवलोक्य कारुण्याभ्युपगमे दुत्त(स्त)रमितरेतराश्रयम्, कारुण्येन सृष्टिः सृष्ट्या च कारुण्यमिति नास्य

कर्तृत्वं जगतः कथमपि सिद्ध्यति। तदेवमेवंविधपुरुषविशेषे दोषकलुषिते यत्तेषां सेवाहेवाकः स खलु केवलं बलवन्मोहविडम्बनापरिपाक इति॥

**॥इति ईश्वरस्य जगत्कर्तृत्वनिरासः॥**

तृतीयः खण्डः

# सर्वज्ञवादः

१५

## ॥सर्वज्ञवादस्थलम्॥

[१] सकलप्रत्यक्षं[१] लक्षयन्ति। सकलं तु सामग्रीविशेषसमुद्भूतसमस्तावरणक्षयापेक्षनिखिलद्रव्यपर्यायसाक्षात्कारिस्वरूपं केवलज्ञानमिति। सामग्री सम्यग्दर्शनादिलक्षणा अन्तरङ्गा, बहिरङ्गा तु जिनकालिकमनुष्यभवादिलक्षणा। ततः सामग्रीविशेषात् प्रकर्षप्राप्तसामग्रीतः समुद्भूतो यः समस्तावरणक्षयः सकलघातिसङ्घातविघातस्तदपेक्षं सकलवस्तुप्रकाशस्वभावं केवलज्ञानं ज्ञातव्यम्।

[२] यस्तु नैतदमंस्त मीमांसको मीमांसनीया तन्मनीषा। तथा हि–बोधकभावात्साधकाभावाद् वा सकलप्रत्यक्षप्रतिक्षेपः ख्याप्येत? आद्यपक्षे प्रत्यक्षमप्रत्यक्षं चाबाधकमभिदध्याः। प्रत्यक्षं चेत् पारमार्थिकं सांव्यवहारिकं वा? पारमार्थिकमपि विकलं सकलं वा? विकलमप्यवधिलक्षणं मनःपर्यायरूपं वा? नैतत्प्रत्यक्षद्वयमपि क्षेमाय, द्वयस्यास्य क्रमेण रूपं द्रव्य(रूपिद्रव्य)मनोवर्गणागोचरत्वेन तद् बाधनविधावधीरत्वात्। सकलं चेद्, अहो! शुचिविचारचातुरी, यत्केवलमेव केवलप्रत्यक्षस्यापि भावं विभावयतीति वक्षि। वन्ध्यापि प्रसूयतामिदानीं स्तनन्धयान्, साम्प्रतं वान्ध्येयोऽपि च विधत्तामुत्तंसान्। सांव्यवहारिकमप्यनिन्द्रियोद्भवम् इन्द्रियोद्भवं वा? न तावत् प्रथमम्,अस्य प्रातिभातिरिक्तस्य स्वात्माविष्वग्भूतसुखादिमात्रगोचरत्वात्। प्रातिभं तु तद्बाधकं नानुभूयत एव। ऐन्द्रियं तु स्वकीयं परकीयं वा? स्वकीयमपीदानीमत्र तद्बाधेत सर्वत्र सर्वदा? प्राचि पक्षे पिष्टं पिनष्टि भवान्, तथा तदभावस्यास्माभिरप्यभीष्टे। द्वितीये तु सर्वदेशकालानाकलय्येदं तदभावमुद्भासय(येत् त)दितरथा वा? आकलय्य चेद्, अकालं नन्दनाद्भवान् भवत्येव सकलकालकलापाशेषदेशविशेषवेदिनिवेदनस्य तादृशः प्रसिद्धेः। अनाकलय्य चेत्, कथं सकलदेशकालानाकलने सर्वत्र सर्वदा वेदनं तादृग् नास्तीति प्रतीतिः उल्लसेत्? परकीयमपीदानीमत्र तद्भावं बाधेत सर्वत्र सर्वदा वा? इत्यादि विकल्पजालजर्जरीभूतं न तद्बाधनधुरां धारयितुं धीरतां दधाति। कथं ता(?) परगृहरहस्याभिज्ञो भवानेवमभूत्? तादृक्षप्रत्यक्षप्रतिक्षेपदक्षप्रावर्तिष्ट ममेति तेन कथञ्चेत्(कथनं चेत्)। यदि कथिते प्रत्ययस्तर्हि तादृक्षाध्यक्षप्रतिक्षेपि प्रत्यक्षं नास्त्येवेत्युत्तम्भितहस्ता वयं व्याकुर्महे। इति किं न तथानुमन्यसे?

[३] अथ न यौष्माकीणः प्रमाणप्रवीणः समुल्लापः परकीयः कथम्? इति वाच्यम्। न खल्वयं स्वपक्षत्वात् प्रत्यक्षं कर्तुं शक्नोति। वचसा तु यथासौ कथयति तथा वयमपि। **अथ** तदुपदर्शितेऽर्थे संवादात्तद्वचः प्रमाणम्, **(स)** नन्वेवं प्रत्यक्षमप्रत्यक्षं वा संवादकं स्यादित्यादि पूर्वोक्तावर्तनेनानवस्थावल्लिरुल्लसन्ती कथं

---

१.इस प्रकरणका प्रारम्भिक अंश त्रुटित लगता है।

कर्तनीया? किञ्च, संविदाम् इन्द्रियगोचरत्वाद् इन्द्रियमध्यक्षं सकलप्रत्यक्षस्य विधौ प्रतिषेधे वा मूकमेव वराकम्। न च त्वत्मतेनाभावः प्रत्यक्षेण प्रेक्ष्यते, तथात्वे हि किमिदानीमपहतसर्वस्वेन तपस्विना? अभावप्रमाणं न कर्तव्यम्। तन्न प्रत्यक्षं तद्बाधविधानसंविधानोद्धुरम्। अप्रत्यक्षमपि प्रत्यक्षाभावमात्रमपरप्रमाणरूपं वा प्रणिगद्येत? आद्यं चेत्तर्हि निद्राणदशायामम्भःस्तम्भ-कुम्भाम्भोरुहाम्भोधरादिगोचरप्रत्यक्षाभावात् तेषामभावो भवेत्। द्वितीयं चेद् भावस्वभावं वा? भावस्वभावमप्यनुमानं शाब्दमर्थापत्तिरुपमानं वा? अनुमानं चेत्कस्तत्र धर्मी सकलप्रत्यक्षं पुरुषो वा कश्चित्? सकलप्रत्यक्षं चेत्तत्रोपादीयमानः समस्तो हेतुराश्रयासिद्धतामाश्रयेत्, भवतस्तस्याप्रसिद्धेः। पुरुषोऽपि सर्वज्ञस्तदन्यो वा धर्मी वर्ण्येत? सर्वज्ञश्चेत् किं सर्वज्ञत्वेन निर्णीतः पराभ्युपगतो वा? निर्णीतश्चेत्कथं तत्र तादृक्षप्रत्यक्षप्रतिक्षेपः प्रेक्षाकारिणः कर्तुमुचितः?, तन्निर्णायकप्रमाणेनैव तद्बाधनात्। अथ सर्वज्ञत्वेन परैरभ्युपगतः पुमान् वर्धमानादि धर्मी तर्हि किं तत्र साध्यम्? नास्तित्वमसर्ववित्त्वं वा? न तावन्नास्तित्वम्, तथाविधपुरुषमात्रसत्तायामुभयोरविवादात्तथा व्यवहारपारमार्थिकापारमार्थिकत्व एव विप्रतिपत्तेः। असर्ववित्त्वं चेत्कस्तत्रहेतुः? उपलब्धिः अनुपलब्धिर्वा? उपलब्धिश्चेदविरुद्धोलब्धिर्विरुद्धोपलब्धिर्वा? अविरुद्धोपलब्धिः तावद् व्यभिचारीणी, नित्यत्वनिषेधाभिधीयमान-प्रमेयत्ववत्। विरुद्धोपलब्धिस्तु किं साक्षाद्विरुद्धोपलब्धिः विरुद्धव्याप्तोपलब्धिः विरुद्धकार्योपलब्धिः विरुद्धकारणोपलब्धिर्वा स्यात्? नाद्या असर्वज्ञत्वेन साक्षाद्विरुद्धस्य किञ्चिज्ज्ञत्वस्य तत्र प्रसाधकप्रमाणाभावात्।

नाग्रेतनविकल्पचतुष्टयमपि घटामटाट्यते। प्रतिषेधेस्य हि सर्ववित्त्वस्य विरुद्धं किञ्चिज्ज्ञत्वम्। तस्य च व्याप्यं कतिपयार्थसाक्षात्कारित्वम्, कार्यं कतिपयार्थप्रज्ञापकत्वम्, कारणमावरणक्षयोपशमः, सहचरादि रागद्वेषाद्विकम्। न च विवादोपादाने पुंसि तेषामन्यतमस्यापि प्रसाधकं किञ्चित्प्रमाणं तवास्ति यतस्तदुपलब्धीनां सिद्धिः स्यात्। **(शं)** वक्तृत्वरूपाविरुद्धकार्योपलब्धिरस्त्येव तन्निषेधे साधनं साधिष्टमिति **चेत्,** ननु कीदृग् वक्तृत्वमत्र वीक्षाञ्चक्रे यत्सर्ववित्त्वस्य विरुद्धस्य कार्यं स्यात्? प्रमाणविरुद्धार्थवक्तृत्वं तदविरुद्धार्थवक्तृत्वं वक्तृत्वमात्रं वा? आद्यभिदायामसिद्धं साधनं वर्द्धमानादौ भगवति तथाभूतार्थवक्तृत्वाभावात्। द्वितीयभिदि तु नेयं विरुद्धकार्योपलब्धिः, किं तु कार्योपलब्धिरेव तद्विधिसाधनी। धूमध्वजसिद्धिनिबन्धनोपन्यस्तौधूमोपलब्धिवत्, तथा च विरुद्धो हेतुः। तृतीयभेदे त्वनेकान्तो वक्तृत्वमात्रे सर्ववित्त्वकार्यत्वस्याविरोधात्।

अनुपलब्धिरप्यविरुद्धानुपलब्धिर्विरुद्धानुपलब्धिर्वा। विरुद्धानुपलब्धिस्तावद्विधिसिद्धावेव साधीयस्तां दधाति, अनेकान्तात्मकं वस्त्वेकान्तस्वरूपानुपलब्धेरित्यादिवत्। अविरुद्धानुपलब्धिरपि स्वभावानुपलब्धिः, व्यापकानुपलब्धिः, कारणानुपलब्धिः सहचरानुपलब्धिर्वाभिधीयेत्। स्वभावानुपलब्धिरपि सामान्येन उपलब्धिलक्षणप्राप्तत्वविशेषणा वा व्याक्रियेत्(त)। पौरस्त्या तावन्निशाचरादिव्यभिचारिणी। द्वितीया पुनरसिद्धा, सर्ववित्त्वस्य स्वभावविप्रकृष्टत्वात्। व्यापकानुपलब्धिप्रभृतयोऽपि विकल्पा अल्पीयांसः, यतः सर्ववित्त्वस्य व्यापकं सकलार्थसाक्षात्कारित्वं

कार्यमतीन्द्रिय-वस्तूपदेशः, कारणमखिलावरणविलयः, सहचारादि क्षायिकचारित्रादिकम्। न च तत्र तदनुपलब्धीनां सिद्धौ साधनं किञ्चित्ते अस्तीत्यसिद्धा एवामूः।

अथ सर्वज्ञादन्यः कश्चिद्धर्मी तर्हि तस्यासर्ववित्त्वे साध्ये सिद्धसाध्यता। तत्र नानुमानं तद्बाधकं नापि शाब्दम्। यतस्तदपौरुषेयं पौरुषेयं वा स्यात्। न तावदपौरुषेयं अपौरुषेयत्वस्य वचःसु सम्भवाभावात्। पौरुषेयमपि केवलालोकाकलितपौरुषेयं पुरुषप्रणीतम् तदितरपुरुषप्रणीतं वा? आद्यं कथं बाधकम्?, विरोधात्। द्वितीये त्वसौ पुरुषः केवलालोकविकलाः सकलाः पुरुषपर्षदः प्रेक्षते न वा? प्राच्यपक्षे कथं तत्प्रतिषेधः? तस्यैव तदाकलितत्वात्। द्वितीयेऽपि कथन्तराम्?, तत्प्रणीतशब्दस्य पांशुलपादकोपदिष्टशब्दस्यैव प्रमाणत्वासम्भवात्।

नाप्यर्थापत्तिस्तद्बाधिका, तदभावमन्तरेणानुपपद्यमानस्य प्रमाणषट्कनिष्टङ्कितस्यार्थस्य कस्यचिद् सत्त्वात्। नाप्युपमानम्, तस्य सादृश्यमात्रगोचरत्वात्। तत्र(न्न) भावरूपप्रमाणं तद्बाधबद्धकक्षम्।

नाप्यभावरूपम्, तस्य सत्तापरामर्शिप्रमाणपञ्चकाप्रावृत्तौ सत्यां भावात्। न चासौ समस्ति विवादास्पदं कस्यचित्प्रत्यक्षं प्रमेयत्वात्पटवदिति तद्ग्राहकानुपमानस्य प्रवृत्तेः। तन्न बाधकभावात् सकलप्रत्यक्षाभावः। नापि साधकाभावादनुमानस्यैव तत्साधकस्येदानीमेव निवेदनात्। इति सिद्धं करतलतुलितनिस्तलस्थूल-मुक्ताफलायमानाकलितसकलवस्तुविस्तारं केवलनामधेयं संवेदनमिति।

**॥इति श्रीसर्वज्ञस्थलं सम्पूर्णमजनि॥**

# ॥सङ्क्षेपेण सर्वज्ञसिद्धिः॥

॥नमो वीतरागाय॥

[१] इह विमलकेवलालोकसमालोकितमालोकलोकस्वरूपस्य परमपुरुषरूपस्य श्रीसर्वज्ञस्य निराकरणार्थं प्रकटोत्कटविकटमदसङ्कटा भट्टचट्टानुमानमुरुरीकुर्वते(चट्टा अनुमानमुररीकुर्वते)। तथा हि– नास्ति निखिलपदार्थसाक्षात्कारिज्ञानकमला-कामिनीसमालिङ्गिताङ्गः कश्चित्पुरुषः, अनुपलब्धेः, खरविषाणवत्। तत्र प्रत्युत्तरम्–किमत्र देशे किमत्र कालेऽनुपलब्धिः सर्वदेशे काले वा? यद्यत्र देशे काले नास्ति तदा सम्मत एव। अथ सर्वदेशे काले नास्तीति भण्यते तज्जगत्रयं सर्वज्ञरहितं कथं ज्ञातं भवता? ज्ञातं चेत्तर्हि भवानेव सर्वज्ञः। अथ न ज्ञातं तर्हि कथं निषेधः क्रियते? तत्र दृष्टान्तः, यथा कोऽपि निषेधे घटस्याधारभूतं घटरहितं भूतलं चक्षुषा दृष्ट्वा पश्चाद् वदति 'अत्र भूतले घटो नास्ति' इति युक्तम्। यस्तु चक्षुरहितस्तस्य पुनरिदं वचनं न युक्तम्। तथैव यस्तु जगत्त्रयं सर्वज्ञरहितं जानाति तस्य जगत्त्रयकालत्रये सर्वज्ञो नास्तीति वक्तुं युक्तं न भवति। यस्तु जगत्त्रयं कालत्रयं सर्वज्ञरहितं न जानाति स सर्वज्ञनिषेधं कथमपि न करोति।

[२] **यच्चोक्तम्**–अनुपलब्धेरिति हेतुत्ववचनम्, **तदप्युक्तम्**, कस्मादिति चेत्? किं भवतामनुपलब्धेः किं जगत्त्रयकालत्रयवर्तिपुरुषाणां वा यदि भवतामनुपलब्धेः तदा सर्वज्ञाभावो न सिद्ध्यति, भवद्भिरनुपलभ्यमानानां परकीयचेतोवृत्तिपरमाण्वादिसूक्ष्मपदार्थानामिव। अथवा जगत्त्रयकालवर्तिपुरुषाणामनुपलब्धेः तत्कथम्? ज्ञातं चेत्तर्हि भवन्त एव सर्वज्ञाः। पूर्वमेव भणितं तिष्ठतीत्यादिहेतुदूषणं ज्ञातव्यम्।

[३] यच्चोक्तम्–खरविषाणवदित्यादिदृष्टान्तवचनम्, तदप्यनुचितम्, खरे विषाणं नास्ति गवादौ तिष्ठतीति। अतो भावो न भवति यथा तथा सर्वज्ञस्यानियतकालादिष्वभावोऽपि सर्वथा नास्तित्वं न भवति। इति दृष्टान्तदूषणम्।

[४] **अथ मतम्-** सर्वज्ञविषये बाधकप्रमाणं निराकृतं भवद्भिस्तर्हि सर्वज्ञसद्भावे साधकं प्रमाणं किमिति पृष्टे **प्रत्युत्तरमाह**-कश्चित्पुरुषो धर्मी सर्वज्ञो भवति साध्यते धर्मः। एवं धर्मिधर्मसमुदायेन पक्षवचनम्। कस्मादिति चेत्, पूर्वोक्तप्रकारेण बाधक-प्रमाणाभावादिति हेतुवचनं किं तत्? स्वयमनुभूयमानसुखदुःखादिवत् इति दृष्टान्तवचनम्। एवं सर्वज्ञसद्भावे पक्षहेतुदृष्टान्तरूपेण त्र्यङ्गमनुमानं विज्ञेयम्।

[५] अथवा द्वितीयमनुमानं कथ्यते रामरावणादयः कालान्तरिताः मेर्वादयो देशान्तरिताः भूतादयः स्वभावान्तरिताः परचेतोवृत्तयः परमाण्वादयश्च सूक्ष्मपदार्थाः धर्मेण कस्यापि पुरुषविशेषस्य प्रत्यक्षा भवन्तीति साध्यो धर्मः इति धर्मिधर्मसमुदायेन पक्षवचनम्। कस्मादिति चेत्, अनुमानविषयत्वादिति

हेतुवचनम्, किं तत्? यद्यदनुमानविषयं तत्कस्यापि प्रत्यक्षं भवति यथाग्न्यादि इत्यन्वयदृष्टान्तवचनम्। अनुमानेन विषयाश्चेति इत्युपनयवचनम्। तस्मात्कस्यापि प्रत्यक्षा भवन्तीति निगमनवचनम्। इदानीं व्यतिरेकदृष्टान्तः कथ्यते। यत्र कस्यापि प्रत्यक्षं [न] तदनुमानविषयं न भवति यथा खपुष्पादि इति व्यतिरेकवचनम्। अनुमानविषयश्चेति पुनरप्युपनयवचनम्। तस्मात्प्रत्यक्षा भवन्तीति पुनरपि निगमनवचनम् इति।

**[६]** किं त्व(चा)नुमानविषयत्वादित्ययं हेतुः सर्वज्ञस्वरूपसाध्यः सर्वप्रकारेण सम्भवति यतस्ततः क(का)रणात् स्वरूपासिद्धविशेषणाद्यसिद्धो न भवति। तथैव सर्वज्ञस्वरूपं स्वपक्षं विहाय सर्वज्ञाभावविपक्षं न साधयति तेन कारणेन विरुद्धो [न] भवति। तथैव च यथा सर्वज्ञसद्भावे स्वपक्षे वर्तते। यथा सर्वज्ञाभावेऽपि विपक्षोऽपि न वर्तते तेन कारणेन नानैकान्तिको भवति। अनैकान्तिकार्थो व्यभिचारीति। तथैव प्रत्यक्षादिप्रमाणबाधिते न भवति। तथैव च प्रतिवादीनां प्रत्यसिद्धं सर्वज्ञसद्भावं साधयति तेन कारणेनाकिञ्चित्करोऽपि न भवति। एवमसिद्धविरुद्धानैकान्तिकाकिञ्चित्करोऽपि न भवति, हेतुदोषरहितत्वात् सर्वज्ञसद्भावं साधयत्येव। इत्युक्तप्रकारेण सर्वज्ञसद्भावे पक्षहेतुदृष्टान्तोपनयनिगमनरूपेण पञ्चाङ्गमनुमानं ज्ञातव्यमिति।

**[७]** यथा लोचनहीनपुरुषस्यादर्शे विद्यमानेऽपि प्रतिबिम्बानां परिज्ञानं न भवति। तथा लोचनस्थानीयसर्वज्ञतागुणरहितपुरुषस्य आदर्शस्थानीयवेदशास्त्रैः कथितानां प्रतिबिम्बस्थाना(नी)यपरमाण्वाद्यनन्तसूक्ष्मपदार्थानां क्वापि काले परिज्ञानं न भवति। तथा चोक्तम्-

*यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्। लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति?॥*

**॥इति सङ्क्षेपेण सर्वज्ञसिद्धिः॥**[१]

---

१ तैलाद्रक्षेज्जलाद्रक्षेत् रक्षेच्छिथिलबन्धनात्। परहस्तगता रक्षेदेवं वदति पुस्तिका॥ इति पुष्पिका।

१७

## ॥सर्वज्ञव्यवस्थापनवादस्थलम्॥

[१] इह केचिदहङ्कारशिखरिशिखामध्यमध्यारूढाः सारासारविचारकरणचातुरीव्यामूढाः कूर्चालसरस्वतीबिरुदमात्मनः पाठयन्तः स्वगल्लझल्लरीझात्कारेण विद्यानटीं नाटयन्तः सकलतार्किकचक्रचक्रवर्तिचूडामणिमात्मानं मन्यमानाः सर्वज्ञसत्तां प्रति विप्रतिपद्यमानाः अतुच्छमात्सर्याद्यगुणमत्कुणतल्पकल्पाः सङ्कल्पितानल्पकल्पविकल्पाः मुग्धजनमनःसद{द}नगतदेवाधिदेवादिपर्यु-पासनावासनाधनलुण्टाकाः प्रजल्पन्ति जल्पाकाः-किं सर्वज्ञः प्रत्यक्षेण साक्षात्क्रियते? आहोश्विदनुमानेन? उदश्विदागमेन? यद्वोपमानेन? किञ्चार्थापत्त्या? इति विकल्पपञ्चतयी विषयपञ्चतयीव त्रिभुवनजनमनांसि क्षोभयन्ती भवत्पुरः प्रगल्भते।

[२] तत्र न तावत्प्रत्यक्षलक्षो भवति सर्वज्ञः, विद्यमान एव पदार्थः प्रत्यक्षलक्षतामाक्षिपति। सर्वज्ञस्तु व्योमारविन्दवदविद्यमान एव, तन्न तेन लक्ष्यते विचक्षणैरपि। नाप्यनुमानेनानुमीयते, अनुमानं हि धूमधूमध्वजयोर्लिङ्गलिङ्गिनोर्ग्रहणे सति प्रवृत्तिमातितांसति। न चात्र सर्वज्ञसद्भावसाधनेऽविनाभूतं किमपि लिङ्गमुपलभ्यते, ततस्तदप्युदासीनमेव। नाप्यागमेनावगम्यते सर्ववेदी। आगमा हि सर्वे परस्परविरुद्धाभिधायिनः, क्वापि सर्वज्ञः स्थाप्यते क्वाप्युत्थाप्यते, ततः को नाम प्रमाणीक्रियते? तन्नागमः सर्वज्ञाभ्युपगमहेतुः। नाप्युपमानं सर्वज्ञसत्तापरिज्ञानं कर्तुमुत्सहेत, यतः कथञ्चित्कस्यचित् दृष्टगौरूपस्य नागरिकस्यारण्यं गतस्य गवयदर्शने सति खुरककुदविषाणादिसादृश्योपलम्भात् गौरिवायं गवय इत्युपमानज्ञानमाविर्भवति। न च केनाप्यंशेन सर्वज्ञस्य सादृश्यं कस्यापि दृश्यते येनोपमानं तत्सत्तामाविर्भावयति। नाप्यर्थापत्तिः सर्वज्ञापत्तिमाविःकरोति। सा ह्येवं जायते 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्युक्ते पीनत्वस्यान्यथानुपपत्त्या रात्रौ भुङ्क्त इति गम्यते। न च सर्वज्ञसत्तामन्तरेण कोऽप्यर्थो नोपपद्यते येन सर्वज्ञस्यापि सत्तासत्तामापद्यते। तस्मान्नास्ति सर्वज्ञः, तद्ग्राहकप्रमाणपञ्चकाभावाद् आकाशकुसुमवत्। उक्तं च-

*प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते। वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता।*

(श्लो.वा.अभाव.१)

इति पराभिमतं निराकुर्वन्नाह। इदमनवद्यविद्याविशारदाः सदाचारविचारचतुराः सर्वात्मनापि विदग्धमतयः प्रलपन्ति स्म प्राज्ञाः परे सर्वज्ञापलापिनः। यथा प्रत्यक्षेण तावत्सर्ववेदी न दरीदृश्यते। तदत्रैवं ते पृच्छ्यन्ते–किं भवद्भिः सर्वज्ञोऽपह्नूयते अत्र देशे सर्वत्र वा? अस्मिन्काले सर्वकालं वा? इति विकल्पचतुष्टयं कल्पान्तकालक्षुभिताम्भोधिचतुष्टयमिव युगपद्युष्मान् रसातलं प्रापयत् प्रसर्पति। तत्र यद्यस्मिन् देशेऽस्मिंश्च वर्तमानकाले सर्वज्ञोऽध्यक्षेण न वीक्ष्यते इति तदत्रार्थे सिद्धसाध्यता। अहमप्येवं मन्ये सम्प्रत्यत्रदेशे अस्मिंश्चकाले सत्सर्वज्ञो नावलोक्यत इति। **अथ** सर्वत्र देशे सर्वकाले सर्वज्ञाभावमाविर्भावयति, **तन्न**, न हि

सर्वदेशकालव्यापकं तेषामपि ज्ञानमस्ति येन सर्वत्र देशे काले च सर्वज्ञाभावस्तैर्निश्चीयते। **अथ** अस्ति सर्वव्यापकं ज्ञानं **तर्हि** यूयमेव सर्वज्ञाः सिद्धं नः समीहितम्, न चैतदस्ति तस्मात् क्वापि प्रदेशे भूते भविष्यति च काले सर्वज्ञसद्भावात् तद्गतलोकानां समक्ष एव भविष्यति। तथानुमानानुमेयोऽपि भगवान्सर्ववेदी। तच्चेदमनुमानम्-ज्ञानस्य तारतम्यं क्वचिद्विश्रान्तं तरतमशब्दवाच्यत्वात्। यद् यत् तरतमशब्दवाच्यं तत् तत् क्वचिद्विश्रान्तम्, यथा महत्परिमाणतारतम्यमाकाशे लघुपरिमाणतारतम्यं परमाणौ विश्रान्तम्। क्वचिद् ज्ञानतारतम्यं यत्र विश्रान्तं स सर्वज्ञः। उक्तं च-

*मा वहउ कोइ गव्वं इत्थ जए पंडिओ अहं चेव। आसव्वन्नमईओ तरतमजोगेण मइविहवा॥*
(गुरुस्थापनाशतकम्)

पक्षहेतुदृष्टान्तदोषवर्जितं चैतदनुमानं सर्वज्ञसद्भावं साधयत्येव।

**[३] यदप्युक्तम्**–'आगमादपि न सर्वज्ञः परिज्ञायते' **तदपि** न सुमनोमनो धिनोति। यतो यस्मिन्नागमेऽनागतकालं यत्र यत्र काले ये ये भावाः यथारूपेण भाविनः कथिताः सन्ति तत्र तत्र काले ते ते भावास्तथारूपेण भवन्तः सन्तः तदागमकर्तुः सर्वज्ञतामावेदयन्त्येव। उपमानं तु सर्वज्ञसद्भावावेदकं न सम्भवति, तस्य सर्वोत्तमत्वेन तदुपमानभूतस्य कस्याप्यभावात्। अर्थापत्तिः पुनः सर्वज्ञसद्भावं प्रादुःकरोति अविसंवादिवचनो ह्यागमः सर्ववेदिनं प्रणेतारमन्तरेण न जाघटीति, ततोऽर्थादेवं निर्णीयते तत्प्रणेता सर्वज्ञोऽवश्यमेव अभूदेवेति। ततो न भवत्परिकल्पितैर्गजशून्यविकल्पकल्पैः सर्वज्ञोऽपह्नोतुं पार्यते। तथा हि– कश्चिद्भोतः कुतर्कमुखरबठरखण्डिककुट(टु)म्बकाविकलकोलाहलाकर्णनमानवातूलः कथमपि नृपतिद्वारमुपागतः प्रथमजलधरनीरन्ध्रधाराधोरणीधौतसमुद्धराञ्जनगिरिशृङ्गसोदरं सपदि विदलितकुन्दकलिकावदातदन्तमुशलद्वितयम् अनुकलविगलदविरलमदजलाकुलकपोलस्थलम् अमन्दमन्दरोन्मथ्यमानमहाम्भोधिध्वनिगम्भीरगर्जितम् ऊर्जितप्रभञ्जनप्रेर्यमाणध्वजपटप्रान्तप्रचलत्कर्णजालम् अन्तरालस्थूलचलनचतुष्टयप्रतिष्ठितम् अनवरतपरिचलत् प्रबलशुण्डादण्डडामरम् अनलनिकटनिषण्णनिरन्तरभयकरहुङ्कारमुखरमहामात्रप्रदीयमानस्थूलकवलनाव्याकुलं मदकलमवलोक्य विकल्पयति-किमिदमन्धकारनिकुरम्बं मूलकान् कवलयति ?किं वा वारिवाहो अयं बलाकावान् वर्षति ? गर्जति च यद्वा बान्धवोऽयम् ? ***'राजद्वारे श्मशाने च यस्तिष्टति स बान्धवः'*** इति वचनात्। अथवा योऽयमासन्नमेदिनीपृष्ठप्रतिष्ठायिपुरुषस्तस्यच्छायेयं स्त्यानीभूता इति। दूषयति -नाद्यः पक्षोऽन्धकारस्य मूलकयुगलप्रस्फोटनाभावात्। नापि द्वितीयः स्तनयित्नोः स्तम्भचतुष्टयाभावात्। नापि तृतीयः बन्धोऽस्मद्दर्शननिषेधनलगुडभ्रमणासम्भवात्। नापि तुरीयः, न हि नरः शतोद्गिरणनिगरणं सम्भवति छायायाः ततो न किञ्चिदेतदिति। न चैतावता मतङ्गजस्वभावो व्यावर्तते। एवं सर्वज्ञोऽपि न भवद्विकल्पैरपह्नूयते। सकलप्रमाणप्रतीतस्य त्वस्यापलापे सुखदुःखादेरपि अपलापः प्रसह्येतेति स्थितम् अस्ति सर्वज्ञः॥

**॥इति सर्वज्ञव्यवस्थापनवादस्थलम्॥**

चतुर्थः खण्डः

# जीववादः

# १८

## ॥जीवास्तिवादस्थलम्॥

[१] इह केचिदनादिमहामिथ्यात्ववासनाग्रहग्रहिलान्तःकरणकुम्भविगलितविवेकवारिविरहवैकल्पवितथप्ररूपणाप्रकारपर-प्रतारणप्रवणाः पृथ्वप्तेजोवाय्वाकाशलक्षणभूतपञ्चकव्यतिरिक्तजीवाजीवपुण्यपापाश्रवसंवरनिर्जराबन्धमोक्षप्रमुखसमस्तवस्तुस्तोमा-पलापमौलाः कौलाः सकलबालगोपालाङ्गनाहङ्कारागमनसुखदुःखेच्छाज्ञानशीतोष्णक्षुत्पिपासापमानप्रमुखप्रत्ययप्रतीतावस्थानम् अप्यात्मानं निराचिकीर्षवः प्रमाणमित्थमुद्भावयन्ति। यथा नास्त्यात्मा घटपटशकटमकुटस्थम्भाम्भोरुहादिविद्यमानसकलपदार्थसार्थ-ग्राहकस्पर्शनरसनघ्राणचक्षुःश्रौत्रलक्षणाक्षूणकरणपञ्चकाग्राह्यत्वात्। तथा हि–न तावदयमात्मा नगनगरविहारारामतरुतरङ्गिणी-सरित्पतिपुरस्सरसमस्तवस्तुस्तोम इव चक्षुरिन्द्रियेण दरीदृश्यते। नापि मन्दमन्दादोलितस्वच्छशीतलनिर्मलजलापूर्णसरस्तीर-प्ररुढप्रौढपारिजातमचकुन्दसिन्दुरे मन्दारविकचविचकिलप्रमुखप्रधानप्रसूनप्रभूतविपुलभुवनवलयव्यापिमकरन्दामोह(द)मत्तमुग्ध-मधुकरनिकरकङ्कारोन्मिश्रमृदुतरसुरभिशीतलप्रभञ्जन इव स्पर्शनेन्द्रियेण परीस्पृश्यते। नापि सकलदिग्मण्डलव्यापिकाश्मीरजरजःपुञ्ज-दह्यमानकृष्णागरुकर्पूरपूरकस्तुरिकानिकरसम्पेषणोद्भूतप्रभूतामोदसन्दोह इव घ्राणेन्द्रियेण जेघ्रीयते। नापि वेणुवीणामृदङ्ग-शृङ्ग-शङ्खकाहलातिलमभेरिझल्लरीपटुपहरप्रमुखवाद्यमानातोद्यनाद इव श्रवणेन्द्रियेण शोश्रूयते। नापि मुक्ताफलाक्षोदधवलसूक्ष्मशर्करा-निकरनिक्षेपमधुरस्निग्धमुग्धदुग्धरसपूर इव जिह्वेन्द्रियेण लेलिह्यते। तस्मात् करणपञ्चकाग्राह्यत्वान्नास्त्यात्मा, किन्तु भूतपञ्चकपरिणाम एव नरतिर्यगादिशरीराणां चेतनाव्यवहार इति। तथा चोक्तम्-

*समस्तवस्तुविस्तार(रो?)ग्राहिभिश्चक्षुरादिभिः। यन्न संवेद्यते तन्न विद्यते वियदब्जवत्॥*

[२] तदेतत्सकलमपि मात्सर्यमुत्सार्यविचार्यकार्यमार्यवर्याः समर्यादमिदमुदाहरन्ति। तदेनपति (तदेतदपि?) प्रचुरमाहिषदधिभक्षणाक्षेपसमागतोमु(न्मु?)द्रिनिद्राविद्राणचैतन्यविवेकस्योत्स्वप्नायितमिव [अ]सारतया विचारभूधरगुरुतरशिखरशिखामरोप्यमाणं जीर्णशकटमिव स्वयमेव स नीश्चस्यते, न पुनः प्रमाणतामाचनीस्कद्यते। तथापि सामाजिकजनमनश्चमत्कारचिकीर्षिया किञ्चिद्वक्तुम् उपक्रमामहे।

[३] तत्र यदेतद् वादिवृन्दवृन्दारकविद्वज्जनविकल्पितानल्पकल्पद्रुमवनगहनोन्मूलनप्रवृत्तानवद्यगद्यगोदावरी-प्रवाहितानेकफल्गुवलितवालुकाजीवाभावसाधकप्रमाणमूचिवांसो विद्वांसः तत् किं विद्यमानमविद्यमानं वेति

भागीरथीविपुल-पुलिनावतस्चञ्चक्रवाकयुगलमिव विमलं विकल्पयुगलं अवतारमीरयाञ्चकार। तत्र न तावदाद्यपक्षः स्वपक्षाक्षेमकारी क्षणमपि कक्षः(क्षी)करणीयः। यथा जीवाभावसाधकं प्रमाणं विद्यमानमिति विद्यमानलक्षणस्य सप्रपञ्चवचनरचनाचातुरीचञ्चुभिर्भवद्भिरपि प्रपञ्चितत्वात्, जीवभावसाधकप्रमाणस्य वा मूर्तत्वेन करणपञ्चकाग्राह्यत्वाद्। एतावता वचनरचनाप्रपञ्चेन प्रतिष्ठितमिदं यथा–न जीवभावसाधकं प्रमाणं विद्यमानमिति। तस्मिंश्चाविद्यमाने सिद्धः सर्वापलापमौलकौलवादिव्यतिरिक्तविद्वज्जनसमाजाव्याज-प्रतिपन्नावस्थानो जीवः, त्वदुक्तयुक्तिविकलप्रतिबन्धकप्रामाण्यात्। अथ पूर्वोक्तदोषपोषपरिजिहीर्षया द्वितीयकं पक्षं स्वाभिधेयप्रतिपादनैकदक्षं कक्षीकुर्वन्ति भवन्तो-यथा जीवाभावसाधकं प्रमाणमविद्यमानमिति, तदेतदपि महानदीश्रोतः प्रवहत्कुशकाशपुष्टिमुष्टिदुष्टावलम्बनप्रायं प्रतिभासते, यतः स्ववाचैवाभ्युपगता विद्यमानत्वेन प्रमाणेन कथमिव साहसजीवाभावसाधनसाहसमध्यवसितवन्तो भवन्तः?

[४] अथेत्थङ्कारं चक्षुषीनिर्मा(मी)ल्य विवक्षणक्षणमेकमाचक्ष्यते यथा–अविद्यमानमप्यस्मद् मतं जीवाभावसाधकप्रमाणं जीवाभावसाधकं भवतीति। तर्हि मृगतृष्णाम्भःकृतस्थानवन्ध्यासुतशिरःशेखरकर्णपूरक्रियासाधकानि किं न भवन्ति व्योमारविन्दवृन्दानि? तस्मान्नाविद्यमानक्रियाकाण्डसाधने सौण्डं किं तु विद्यमानमेव।

[५] अथेत्थङ्कारमविचारसारमभिधास्यन्ति सन्तो भवन्तो यथा–करणपञ्चकाग्राह्यमपि जीवाभावसाधकं प्रमाणमस्ति, तर्हि करणपञ्चकाग्राह्यत्वादि अनैकान्तिको हेतुः जीवाभावमपि कथं साधयेद् ? इति स्ववाचैव स्वपक्षक्षतिकारिणां विचक्षणानाम् अजाकृपाणीन्यायः समागतो भवति भवताम्।

[६] किञ्च, यथान्धबधिरादिभिरनुपलभ्यमाना स्वभावा अपि वेविद्यन्त एव रूपादयो भावास्तदन्यैरुपलम्भात् तथा परमज्ञानलोचनाभावान्धकल्पाल्पशेमुषीजुषां भवादृशविदुषामप्रत्यक्षोऽप्यास्त[ए]वात्मा देशकालविप्रकृष्टमन्दरमकराकरादि-व्यवहिततारकग्रहनक्षत्रचलितचन्द्रसूर्योपरागादित्रैलोक्योदरविवरवर्ति समस्तवस्तुस्तोमनिश्चलावलोकनपरपरमज्ञानचक्षुषश्चक्षुष्मतां प्रत्यक्षत्वात्। तथा चोक्तम्-

***अनिन्द्रियगुणं जीवमग्राह्यं मांसचक्षुषा। सिद्धाः पश्यन्ति सर्वज्ञा ज्ञानसिद्धाश्च साधवः॥***

[७] **यदप्यवादि** वादिद्विरदघटाविकटकुम्भकूटविषाटनपटिष्टकण्ठीरवकिशोरकल्पैर्विद्वद्भिर्यथा-भूतपरिणाम एव नरतिर्यगादि शरीराणां चेतनाव्यवहार इति, **तदपि** स्वेच्छाचारविचारचतुरचेतोभिर्भवद्भिः स्वमनीषिकाकल्पितमित्यपि विचार्यमाणं न विचार-भारगौरवं बावहीति। यतस्तानि भूतानि प्रत्येकं विपरिवर्तमानानि किं सचेतनान्यहोश्विदचेतनानि? इति परपक्षलक्षोददक्षक्षितिधर-शेखरप्रांशुकुम्भिकुम्भस्थलयुगलमिव विकल्पद्वन्द्वमवतिष्ठते। तत्र न तावत्प्रथमपक्षवृक्षोऽस्मद्विचारतीक्ष्णधारकुठारप्रहारप्रपातं क्षणमपि तितिक्षते। यथा सचेतनानि तानि ततो यदि सचेतनानि भूतानि ततः सिद्धा एवास्माकमेकेन्द्रिया जीवाः पृथिव्यादयः। अथ पूर्वोक्तदोष-पोषश्रवणप्रतिपन्नजोषास्तदति(दित)रपक्षमाक्षेपेण विचक्षणाः कक्षीकुर्वन्त्येतदपि न

युक्तिघटाकोटिसण्टङ्कमाटीकते। यतो यदि प्रत्येकं तानि भूतान्यचेतनानि तदा कथं तेषां समुदायेऽपि वयं चेतना सद्भावमुद्भावयामः? न वालुकाकणेष्वविद्यमानतैलं वालुकाघाणकेऽपीति।

[८] अथैवङ्कारं प्रमाणप्रमेयाप्रमेयझल्लरीझात्कारबधरितसकलदिङ्मण्डलाः सङ्गिरन्ते यथा-गुलतन्दुलादिषु प्रत्येकम् अविद्यमानमपि विद्वज्जनसभाजुगुप्सितशर्मकर्मठमालोक्यते संयोगेन मदजननसामर्थ्यम्, तदेतदपि न चतुरचेतसां चेतसि चारुतया चकास्ति। यतः प्रत्येकमपि तेषां धावनलङ्घनोत्प्लवनादिव्यापारसमर्थबलावलपोप(?)चयजनकत्वेन मदलेशहेतुत्वादित्यलमति वाचां विस्तरेण॥

**॥इति जीवास्तिवादः समाप्तः॥**

# १९

## ॥आत्मनित्यत्वसिद्धिः॥

**[१]** केचिदात्मनोऽनित्यत्वे प्रमाणयन्ति–उत्पत्तिनिरोधधर्मकः आत्मा विकारित्वात्। यदेवं तदेवं यथा पद्मम्, तथा चात्मा तस्मादनित्य इति। न चायमसिद्धः, स हि सङ्क्षेपतो विभज्यमानो द्विधा भवति–धर्मे सम्बन्धासिद्ध्यासिद्धो व्याप्यत्वासिद्ध्यासिद्धः। एवं धर्मिसम्बन्धासिद्ध्यासिद्धः आश्रयस्वरूपासिद्धभेदाद् द्विधैव। तत्र व्याप्यत्वासिद्धो यथा–अयं श्यामो मैत्रतनयत्वात्। आश्रयासिद्धो यथा गगनारविन्दं सुरभि अरविन्दत्वात्। स्वरूपासिद्धो यथानित्यः शब्दश्चाक्षुषत्वात्।

तत्र न तावदयमाश्रयासिद्धो नापि स्वरूपासिद्धः, साधन तदधिकरणयोः प्रमाणसिद्धतया वादिप्रतिवादिनोरनुमतत्वात्। नापि विरुद्धः सपक्षेऽन्वयोपलब्धेः। शब्दसाध्यापेक्षया हि तद्विपरीतव्याप्तेर्विरुद्धो भवति। यथा शब्दो नित्यः कृतकत्वादिति। न चानैकान्तिकः, सपक्षवद्विपक्षेऽप्यगमनात्। नापि कालात्ययापदिष्टः, बाधकाभावात्। तथा हि न तावत्प्रत्यक्षं बाधकम् आत्मनोऽनित्यत्वस्य प्रत्यक्षेण ग्रहितुम् अशक्यत्वादिति। नाप्यनुमानकालात्ययापदिष्टः, उपजीव्यानुमानाभावात्। नापि प्रकरणसमः, प्रकरणचिन्ताप्रवर्तकस्य हेत्वन्तरस्यासम्भवात्। **(शं)** नित्यः आत्मा अनुपकार्यत्वाद् गगनवदित्यनुमानमस्ति, **(स)** नैवम्, नित्यत्वेऽनु[प]कार्यत्वे च हिंसातत्फले न प्राप्नुतः। हिंसा तावन्नित्यत्वान्न प्राप्नोति, फलमपि न युक्तमात्मनोऽनुपकार्यत्वात्। अस्य चार्थस्य ज्ञापि कारिकामुदाहरन्ति-

***वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम्। चर्मोपमश्चेत्सोऽनित्यः खतुल्यश्चेदसत्फलः॥***

**[२]** नित्यवादी प्राह-यस्य च पूर्वस्कन्धनिरोधसमकालानि स्कन्धान्तराणि प्रादुर्भवन्ति तस्य तेषां स्कन्धान्तराणामकर्मनिमित्तः सर्गः प्राप्नोति। अकर्मनिमित्ते च सत्त्वगर्भे शुभाशुभफलप्राप्त्यर्था क्रिया न प्राप्नोति। **(शं)** सुखी स्यामिति तत्क्रियेति चेत्, अन्य(थ) मन्यसे अयं कर्माणि करोति कथमहं सुखी स्यां दुःखी न स्यामिति? **तन्न(त्र)** अननुभूतत्वात्। येन सुखमनुभूतं सुखसाधनसम्बन्धानुस्मृते(ति)श्च यस्य स तत्साधनमुपादत्ते, यस्य पुनः प्रतिक्षणप्रध्वंसिनः संस्काराः तस्य सुखसाधनसम्बन्धानुस्मृतेरभावात् सुखी स्यामिति क्रियानुपपत्तिः मुक्त्यर्थश्च प्रयासो नोपपद्यते। अयत्नसिद्धत्वाज्जातमात्र एवायं मुच्यते इति मुक्त्यर्थो ब्रह्मचर्यवासो व्यर्थः। परिपृच्छा च न प्राप्नोति। तथागतेन भिक्षवः परिपृच्छ्यन्ते क(क्व)च्चिद्यूयं मया विनीता इति ते चाहुरङ्गविनीताः स्मेति। अतीतानागतवर्तमानानुपकार्यत्वाद् ये तावदनागताः संस्कारास्ते भा(ता)वदसत्त्वान्नोपक्रियन्ते। येऽप्यतीताः तेऽप्येवम्। ये तु वर्तमानास्तेषु संस्काराधानमशक्यम्, वर्तमानक्षणस्यानुपकार्यत्वात्। न हि तस्यावस्थानकालो यस्मिन्नुपक्रिया स्यात्, संस्कार्यसंस्कारकयोः सहोत्पादात्। नियमानुपपत्तेरिदं संस्कारकमिदं संस्कार्यमिति नियमो नोपपद्यते।

**[३] अथ** संस्कारकमपेक्षमाणसंस्कार्यं विलक्षणं कार्यं करोति विलक्षणकार्योत्पादश्च संस्कार **इत्युच्यते**, संस्कार्यार्थानभिधानाद् इदं संस्कारकमिदं संस्कार्यमित्येतत्कथम्? न हि यो यस्य विशेषं नाधत्ते

स तस्य संस्कारक इति वा संस्कार्य इति वा शक्यं व्यपदेष्टुम्। **अथा**प्युपदेशेन संस्काराणामनागतानामुत्पत्तिः क्रियते, **न**, अनागतानुत्पत्तेः सत्त्वात् यासावनागतानां संस्काराणामनुत्पत्तिर्नासौ कदाचिन्नास्तीति किं तस्याः क्रियते? तस्मान्मुक्त्यर्थे ब्रह्मचर्यवास इत्यनुपपन्नम्। तदेवमनभ्युपगतार्थान्तरात्मनो दोष इति।

**[४]** तटस्थः प्राह-नित्यात्मवादिनोऽपि न प्राप्नोति, अप्रच्युतानुत्पन्नस्थिरैकस्वभावत्वान्नित्यस्य। केवलमियं साङ्ख्यपक्षे सम्भवति, बुद्धेः परिणामित्वात्। कार्यकारणसङ्घातपरिणामित्वादुच्छिद्यते। स एव च तत्फलानि भुङ्क्ते। तत्फलस्य तत्र व्यक्तिरिति न पूर्वावस्थापरित्यागाद् यथैवात्मा पूर्वावस्थां न जहाति इति तत्र फलं नेष्यते तथा बुद्धिरपि पूर्वावस्थां न जहातीति न तत्र फलमिष्यते। अथ पूर्वावस्थां जहाति नित्यत्वं विरुद्ध्यते। **अथा**वस्था भिद्यन्ते **न** अवस्थाभ्योऽवस्थावतोऽनन्यत्वात्। **अथा**वस्थाभेदेऽवस्थानाद् भिद्यते इति य एव बौद्धस्य प्रतिक्षणध्वंसिषु संस्कारेषु दोष एवं प्रतिक्षणविपरिणामेष्वपीति ऋजुवक्रतादिवदिति **चेत्,** अथ मन्यसे ऋजुवक्रतादिभेदे यथाङ्गुलिद्रव्यं न भिद्यते न चाङ्गुलेस्ते अन्ये तथा अवस्थाभेदे बुद्धेरभेद इति नान्यत्वात् अन्ये ऋजुवक्रते। युक्तं च यदन्यभेदेऽन्यस्याभेदः। न पुनरवस्थातोऽवस्थावतोऽन्यत्वं तस्मादसमो दृष्टान्तः। **अथ** बुद्धेरप्येवमिति **चेत्,** बुद्धेरपि ये ते अवस्थे भिद्येते तयोर्भेदबुद्धिर्न भिद्यते अन्या अवस्थावस्था[व?]तो बुद्धिः, तन्न, सिद्धान्तविरोधात्। न हि भवतां मते गुणगुणिनोर्भेद इति। तस्मात् यथात्मनित्यत्वे सुखदुःखानुपभोगो दोष इति न तत्र सुखदुःखे कल्प्येते तथा बुद्धावपि न कल्पनीये समानं नित्यत्वमिति॥

**[५]** अथात्मनो नित्यसु(त्वमस्तु) पुण्यपापाभ्यां किं क्रियते इति? **(स)** सुखदुःखे पुण्यपापाभ्यां आत्मनो नित्यस्य क्रियेते। अथ ताभ्यां किं क्रियते? **(स)** प्रत्ययः। ये आत्मनि सुखदुःखे तद्विषयः प्रत्यय आत्मनि भवतीति एतावत्क्रियते। स च प्रत्ययो भोगः। यत्पुनरेतद्वर्षातपाभ्यां किं व्योम इति यदेव चर्मणश्चर्मणो वर्षातपाभ्यां यत्क्रियते तदेव व्योम्नः। अथ चर्मणः किं क्रियते? **(स)** सम्बन्धः। यथा चर्म वर्षातपाभ्यां सम्बन्ध्यते तथा व्योम। **(शं)** वर्षातपसम्बन्धाच्चर्मवदनित्यं व्योम इति चेत्, **(स)** यथा वर्षातपाभ्यां सम्बन्धाच्चर्म विक्रियते तथा व्योम विकरष्यते इति। नानेकान्तात् वर्षातपसम्बन्धा(न्धः)परमाणुरथ च नित्य इत्यनेकान्तः। चर्मणश्चातिनित्यत्वं किं वर्षातपाभ्यां सम्बन्धादथ कारणविभागादाश्रयविनाशादिति।

**[६]** वयं तु ब्रूमः–कारणवतस्तद्विभागात् तद्विनाशाच्च युक्तो विनाशः। न पुनराकाशस्य कारणमस्तीति। अत उभयाभाव इति। तद्वतां वावस्थानान्न सम्बन्धो विनाशहेतुः। यदि चायं सम्बन्धो विनाशहेतुरभविष्यत् न तद्वतामवस्थानमभविष्यद्। तिष्ठन्ते तु भावास्तावद्यावद् विनाशकारणसन्निपात इति। **अथ** वर्षातपाभ्यां चर्मणः सङ्कोचविकासौ भवतो न त्वाकाशस्येति **तन्न** विकल्पानुपपत्तेः। सङ्कोचविकासौ चर्मण इति कोऽर्थः? किं तावदल्पमहत्त्वे उत संयोगविभागाविति। तत्र तावत्सङ्कोचविकासौ अल्पत्वमहत्त्वे यावद् द्रव्यभावित्वात्परिणामस्य। यावद् द्रव्यं हि परिमाणं तत्सति द्रव्ये न निवर्तितुमर्हवि(ति)। **अथ** चर्मणः संयोगविभागौ सङ्कोचविकासाविति **तदपि न युक्तम्,** एकत्वात्। न ह्येकस्य संयोगविभागौ भवत इति। कथम्? तदिदमुच्यते। चर्मणः सङ्कोचश्चर्मणो विकास

इति। चर्मकारणानामवयवानामातपसम्बन्धापेक्षाणां या परस्परेण प्राप्तयः आरब्धकार्याणां द्रव्यान्तरानारम्भिकास्ता इतरेतरोपश्लेषेणावयवेषु वर्तमानास्तदेकार्थसमवायिनि चर्मण(णि) तूपचर्यन्ते तदपेक्षं चेदमुच्यते। चर्मणः सङ्कोचो न पुनः सङ्कुचतीति। एतेन तदवयवानामेवोदकसम्बन्धापेक्षाणामविनश्यत् कार्याणां परस्परतो विभागो विनाश इति विक्रियायां दृष्टान्ताभावः। तदेव वस्त्वविनश्यद्विक्रियामापा(प)द्य[ते] इति न दृष्टान्तोऽस्ति। विक्रिया तु पदार्थान्तरोत्पादः यथा पूर्वरूपादिनिवृतौ रूपाद्यन्तरोत्पादे विकृतो घट इति। यद्येवंभूतो विकारः आत्मन्यपि विकारोऽस्ति तत्रापि सुखनिवृत्तौ दुःखप्रादुर्भावेति(व इति)। सुखप्रत्ययनिवृ(त्तौ)दुःखप्रत्यय [इ]ति। तस्मान्नित्यस्यात्मनः सुखदुःखभङ्ग इति सिद्धम्। नित्यपक्षे एव य एवायमात्मा शरीरादिसाधनः कर्म करोति स एव तत्फ(लं) भुङ्क्ते इति अकृताभ्यागमादिदोषो नास्ति। भवतां त्वकृताभ्यागमः कृतविप्रणाशश्चेति। ज्ञानचिकीर्षाप्रयत्नानां समवायः कर्तृत्वम्, सुखदुःखसंवित्समवायो भोक्तृत्वमिति हि कर्तृत्वभोक्तृत्वस्वरूपम्।

[७] किं च किमिदं विकारित्वम्? यदि धर्मोपजनमात्रं विकारः स आकाशादिष्वपीत्यनेकान्तः। किञ्च किं धर्मिण एवोपजनापायौ विकार आहोश्विद्धर्मस्य? प्रथमे साध्याविशिष्टः। द्वितीयेऽप्रयोजकः स्वकारणाद्धर्मस्योपजनापायावपि स्यातामकारणकतया धर्मणो नित्यत्वं चेत्यविरोधात्। तस्माद् अकारण आत्मा सर्वदा अमूर्तत्वादाकाशवदिति। घटादयोऽपि प्रथमे क्षणे भवन्त्यमूर्ताः, परिमाणविशेषो हि मूर्तिर्न च द्रव्यसमानकाला उत्पत्तिः गुणानामिति तन्निवृत्त्यर्थं सर्वदेत्युक्तम्। कृतकत्वं च प्रतिपद्यमानेन कारणमस्य वाच्यं कार्यस्य कारणवत्त्वात्॥

**॥इति आत्मनित्यत्वसिद्धिः॥**

## ॥एकेन्द्रियाणां जीवत्वस्थापना॥

वनस्पतयो जीवा जातिजरामरणावृद्ध्याद्युपेतत्वात्, मनुष्यवत्।

पृथिवीकायिका जीवाः पर्वतादिषु परिवृद्धिदर्शनात्, मनुष्यवत्।

अप्कायिका जीवा अनुपहतत्वे सति द्रवत्वात्, कललाण्डरसादिवत्।

तेजस्कायिका जीवाः स्वभावत आकाशगमनवत्त्वात्, ज्योतिरिङ्गणवत्

अथवा तेजस्कायिका जीवा सूर्यकिरणत्वे सत्युष्मधर्मोपेतत्वात्, ज्वरितमनुष्यवत्।

वायवो जीवा अपराप्रेरितत्वे सति तिर्यगनियमितगमनस्वभावत्वात्, गवादिवत्।

**॥इति एकेन्द्रियाणां जीवत्वस्थापना॥**

## ॥सर्वव्याप्यात्मवादः॥

**[१]** आत्मा सर्वगतो न भवति, सर्वत्र तद्गुणानुपलब्धेः। यो यः सर्वत्रानुपलभ्यमानगुणः स स सर्वगतो न भवति, यथा घटः, तथा चायं तस्मात्तथा। व्यतिरेका(के) व्योमादि। न चायमसिद्धो हेतुः, कायव्यतिरिक्तदेशे तद्गुणानां बुद्ध्यादीनां वादिना प्रतिवादिना वानभ्युपगमात्। तथा च भट्टः श्रीधरः सर्वगतत्वेऽप्यात्मनो देहप्रदेशे ज्ञातृत्वं नान्यत्र, शरीरस्योपभोगायतनत्वाद्, अन्यथा तस्य वैयर्थ्या{त्}दिति।

[२] **अथ** अस्त्यदृष्टमात्मानो विशेषगुणस्तच्च सर्वोत्पत्तिमतां निमित्तं सर्वव्यापकं च। कथमितरथा द्वीपान्तरादिष्वपि प्रतिनियतदेशवर्तिपुरुषोपभोग्यानि कनकरत्नचन्दनाङ्गनादीनि तेनोत्पाद्यन्ते? गुणश्च गुणिनं विहाय न वर्ततेऽतोऽनुमीयते सर्वगत आत्मेति, **नैवम्**, अदृष्टस्य सर्वगतत्वसाधने प्रमाणाभावात्। **अथ** अस्त्येव प्रमाणं वह्नेरूर्ध्वज्वलनं वायोस्तिर्यक् पवनं चादृष्टकारितमिति **चेत्**, न, तयोः स्वस्वभावत्वादेव तत्सिद्धेर्दहनस्य दहनशक्तिवत्। **(शं)** साप्यदृष्टकारिता **चेत्**, तर्हि जगत्त्रयवैचित्रीसूत्रणेऽपि सैव सूत्रधारायतां किमीश्वरकल्पनया? तन्नायमसिद्धो हेतुः। न चानैकान्तिकः, साध्यसाधनयोर्व्याप्तिग्रहणेन व्यभिचाराभावात्। नापि विरुद्धोऽत्यन्तं विपक्षव्यावृत्तत्वात्।

[३] आत्मगुणाश्च बुद्ध्यादयः शरीर एवोपलभ्यन्ते, ततो गुणिनोऽपि तत्रैव भाव्यमिति सिद्धः कायप्रमाण आत्मा। अन्यच्च, त्वयात्मनां बहुत्वमिष्यते। ***नानात्मानो व्यवस्थात*** इति वचनात्। ते च वा(व्या)पकास्तेषां प्रदीपप्रभामण्डलानामिव परस्परानुवेधे तदाश्रितशुभाशुभकर्मणामपि परस्परं सङ्करः स्यात्,तथा चैकस्य शुभकर्मणान्यः सुखी भवेत्, इतरस्याशुभकर्मणान्यो दुःखीत्यसमञ्जसमापद्यते।

[४] अन्यच्च, एकस्यैवात्मनः स्वोपात्तशुभकर्मविपाकेन सुखित्वं परोपार्जिताशुभकर्मविपाकसम्बन्धेन च दुःखित्वमिति युगपत्सुखदुःखसंवेदनप्रसङ्गः। **अथ** स्वाबद्धं भोगायतनमाश्रित्यैव शुभाशुभयोर्भोगः,**तर्हि** स्वोपार्जितमप्यदृष्टं कथं भोगायतनाद्बहिर्निष्क्रम्य वह्नेरूर्ध्वज्वलनादिकं करोतीति चिन्त्यमेतत्।

[५] आत्मनां च सर्वगतत्वे एकैकस्य सृष्टिकर्तृत्वप्रसङ्गः सर्वगतत्वेनेश्वरान्तरनुप्रवेशस्य सम्भावनीयत्वात्। ईश्वरस्य वा तदन्तरनुप्रवेशे तस्याप्यकर्तृत्वापत्तिः। न हि क्षीरनीरयोरव्योच्य(न्योन्य)सम्बन्धे एकतरस्य पानादिक्रियान्यतरस्य सा न भवतीति युक्तं वक्तुम्।

[६] किञ्च, आत्मनः सर्वगतत्वे नरनारकादिपर्यायाणां युगपदनुभवानुषङ्गः। **अथ** भोगायतनाभ्युपगमे नायं दोष इति **चेत्**, ननु स भोगायतनं सर्वात्मनावष्टभ्नीयादेकदेशेन वा। सर्वात्मना चेद् अस्मदभिमताङ्गीकारः। एकदेशेन चेत् सावयवत्वप्रसङ्गः।

[७] परिपूर्णभोगाभावश्च। **अथ** आत्मनो व्यापकत्वाभावे दिग्देशान्तरवर्तिपरमाणुभिः युगपत्संयोगाभावाद् आद्यकर्माभावः तदभावाद् अन्त्यसंयोगस्य तन्निमित्तशरीरस्य तेन तत्सम्बन्धस्य

चाभावादनुपायसिद्धः सर्वदा सर्वेषां मोक्षः स्यात्, **नैवम्,** यद्येन संयुक्तं तदेव तं प्रत्युपसर्पतीति नियमासम्भवात्। अयस्कान्तं प्रति अयसः तेनासंयुक्तस्य अप्यकर्षणोपलब्धेः। अथ असंयुक्तस्याप्याकर्षणे तच्छरीरारम्भं प्रत्येकसुखीभूतानां त्रिभुवनोदरविवरवर्तिपरमाणूनाम् अपसर्पणप्रसङ्गात्, न जाने तच्छरीरं कियत्प्रमाणं स्याद् ? इति चेव संयुक्तस्याप्याकर्ष कथं स एव दोषो न भवेत्? आत्मनो व्यापकत्वेन सकलपरमाणूनां तेन संयोगात्। **अथ** तद्भावाविशेषेऽप्यदृष्टवशाद् विवक्षितशरीरोत्पादनानुगुणा नियता एव परमाणव उपसर्पन्ति **तदेतद्** इतरत्रापि तुल्यम्।

**[८] अथ** अस्तु यथाकथञ्चित् शरीरोत्पत्तिस्तथापि सावयवं शरीरं प्रत्यवयवमनुप्रविशन्नात्मा सावयवः स्यात्तथा चास्य पटादिवत्कार्यत्वप्रसङ्गः, कार्यत्वे चासौ विजातीयैः सजातीयैर्वा कारणैरारभ्येत। न तावद्विजातीयैः, तेषामनारम्भकत्वात्,न हि तन्तवो घटमारभन्ते। न च सजातीयैर्यत आत्मन्याभिसम्बन्धादेव तेषां कारणानां सजातीयत्वम्, पार्थिवादिपरमाणूनां विजातीयत्वात्। तथा चात्मभिरारभ्यत इत्यायातम्, तच्चायुक्तम्, एकत्र शरीरेऽनेकात्मनामात्मारम्भकाणासम्भवात्, सम्भवे वा प्रतिसन्धानानुपपत्तिः। न ह्यन्येन दृष्टमन्यः प्रतिसन्धातुमर्हति, अतिप्रसङ्गात्। तदारभ्यत्वे चास्य घटवदवयवक्रियातो विभागात् संयोगविनाशाद् विनाशः स्यात् तस्माद् व्यापक एवात्मा युज्यते, कायप्रमाणतायाम् उक्तदोषसद्भावादिति, **चेत्,** न, सावयवत्वकार्यत्वयोः कथञ्चिदात्मन्यभ्युपगमात्। तत्र सावयवत्वं तावदसङ्ख्येयप्रदेशात्मकत्वात्। तथा च द्रव्यालङ्कारकारः-

*आकाशोऽपि सदेशः सत्त(कृ)त्सर्वमूर्ताभिसम्बन्धार्हत्वा{व}द्* इति।

**[९] यद्यपि** अवयवप्रदेशयोर्गन्धहस्त्यादिषु भेदोऽस्ति, **तथापि** नात्र सूक्ष्मेक्षिका चिन्त्या, प्रदेशेष्वप्यवयवव्यवहारात्। कार्यत्वं तु वक्ष्यामः। **ननु** आत्मनां कार्यत्वे घटादिवत् प्राक्प्रसिद्धसमानजातीयान(नि)यतारभ्यत्वप्रसक्तिः। अवयवाद्यवयविनमारभन्ते यथा तन्तवः पटमिति, **चेत्,** न वाच्यम्। न खलु घटादावपि कार्ये प्राक्प्रसिद्धसमानजातीयकपालसंयोगारभ्यत्वं दृष्टं कुम्भकारादि व्यापारान्वितान्मृत्पिण्डात् प्रथममेव पृथुबुध्नोदराद्याकारस्य अस्योत्पत्तिप्रतीतेः। द्रव्यस्य हि पूर्वाकारपरित्यागेन उत्तराकारपरिणामः कार्यत्वम्, तच्च बहिरिवान्तरप्यनुभूयत एव ततश्चात्मापि स्यात्कार्यः। न च पटादौ स्वावयवसंयोगपूर्वककार्यत्वोपलम्भात्सर्वत्र तथाभावो युक्तः, काष्ठलोहलेख्यत्वोपलम्भाद् व(?)ज्रेऽपि तथाभावप्रसङ्गात्। प्रमाणबाधनमुभयत्रतुल्यम्।

[१०] न चोक्तलक्षणकार्यत्वाभ्युपगमेऽप्यात्मनोऽनित्यत्वानुषङ्गात् प्रतिसन्धानाभावोऽनुषज्यते। कथञ्चिदनित्यत्वे सत्येवास्योपपद्यमानत्वात्। प्रतिसन्धानं हि— यमहमद्राक्षं तमहं स्मरामीत्यादिरूपम्। तच्चैकान्तनित्यत्वे कथमुपपद्यते? अवस्थाभेदात्। अनाद्यनुभवावस्थान्या च स्मरणावस्था। अवस्थाभेदे चावस्थावतोऽपि भेदादेकरूपत्वक्षतिः कथञ्चिदनित्यत्वं युक्त्यायातं केन वार्यताम्?

**[११] अथ** आत्मन(नः) शरीरपरिमाणत्वे मूर्तत्वानुषङ्गाच्छरीरेऽनुप्रवेशो न स्यात्, मूर्ते मूर्तस्यानुप्रवेशविरोधात्, ततो निरात्मकमेवाखिलं शरीरं प्राप्नोतीति **चेत्,** किमिदं मूर्तत्वं नाम? असर्वगतद्रव्यपरिमाणत्वं रूपादिमत्त्वं वा? तत्र नाद्यः पक्षो दोषाय, सम्मतत्वात्। द्वितीयस्त्वयुक्तः, व्याप्त्यभावात्। न हि यदसर्वगतं तन्नियमेन रूपादिमदित्यविनाभावोऽस्ति, मनसोऽसर्वगतत्वेऽपि भवन्मते तदसम्भवात्। आकाशकालदिगात्मनां सर्वगतत्वं परममहत्त्वं सर्वसंयोगसमानदेशत्वं चेत्युक्तत्वान्मनसो वैधर्म्यात्सर्वगतत्वेन प्रतिषेधनात्। अतो नात्मनः शरीरेऽनुप्रवेशानुपपत्तिर्येन निरात्मकं तत्स्यात्। असर्वगतद्रव्यपरिमाणलक्षणमूर्तत्वस्य मनोवत्प्रवेशाप्रतिबन्धकत्वात्। रूपादिसत्त्वलक्षणमूर्तत्वोपेतस्यापि जलादेर्वालुकादावनुप्रवेशो न निषिध्यते। आत्मनस्तु तद्रहितस्यापि तत्रासौ प्रतिषिध्यते, इति महच्चित्रम्।

**[१२] अथ** आत्मनः कायप्रमाणत्वे बालशरीरप्रमाणस्य सतो युवशरीरपरिमाणस्वीकारः कथं स्यात्? किं तत्परिमाणपरित्यागात् तदपरित्यागाद्वा? परित्यागाच्चेत्,तदा शरीरवत्तस्यानित्यत्वप्रसङ्गात् परलोकाद्यभावानुषङ्गः। अथापरित्यागात् तन्न, पूर्वपरिमाणापरित्यागे शरीरवत्तस्योत्तरपरिमाणोत्पत्त्यनुपपत्तेः, **तदयुक्तम्,** युवशरीरपरिमाणावस्थायामात्मनो बालशरीरपरिमाणपरित्यागे सर्वथा विनाशासम्भवात्, विफणावस्थोत्पादे सर्पवदिति कथं परलोकाभावोऽनुप(ष)ज्यते? पर्याय[त]स्तस्यानित्यत्वेऽपि द्रव्यतो नित्यत्वात्।

**[१३] (शं)** आत्मनः कायप्रमाणत्वे तत्खण्डने खण्डनप्रसङ्ग इति **चेत्,** कः किमाह? शरीरस्य खण्डने कथञ्चित्तत्खण्डनस्येष्टत्वात्। शरीरसम्बद्धात्मप्रदेशेभ्योऽपि हि कतिपयात्मप्रदेशानां खण्डितशरीरप्रदेशेऽवस्थानादात्मनः खण्डनं तच्चात्र विद्यते एव, अन्यथा शरीरात्पृथग्भूतावयवस्य कम्पोपलब्धिर्न स्यात्। न च खण्डितावयवानुप्रविष्टस्य आत्मप्रदेशस्य पृथगात्मत्वप्रसङ्गः,तत्रैवानुप्रवेशात्।

**[१४]** न चैकत्र सन्तानेऽनेक आत्मानः, अनेकार्थप्रतिभासिज्ञानानाम् एकप्रमात्राधारतया प्रतिभासाभावप्रसङ्गात्। शरीरान्तरव्यवस्थितानेकज्ञानावसेयार्थसंवित्तिवत्। **(शं)** कथं खण्डितावयवयोः सङ्घटनं पश्चादिति **चेत्,** एकान्तेन छेदानभ्युपगमात्, पद्मनालतन्तुवत् छेदस्यापि स्वीकारात्। तथाभूतादृष्टवशात्तत्सङ्घटनमविरुद्धमेवेति तनुपरिमाण एवात्माङ्गीकर्तव्यो, न व्यापकः। तथा चात्मा व्यापको न भवति, चेतनत्वाद्। यत्तु व्यापकम्, न तच्चेतनम्, यथा व्योम। चेतनश्चात्मा तस्मान्न व्यापकः। अव्यापकत्वे चास्य तत्रैवोपलभ्यमानगुणत्वेन सिद्धा कायप्रमाणता।

**[१५]** यत्पुनरष्टसमयसाध्यकेवलिसमुद्घातदशायामार्हतानामपि चतुर्दशरज्ज्वात्मकलोकव्यापित्वेनात्मनः सर्वव्यापकत्वम्, तत्कादाचित्कमिति न तेन व्यभिचारः। स्याद्वादमन्त्रकवचावगुण्ठितानां च नेदृशबिभीषिकाभ्यो भयमिति काव्यार्थः॥

**॥इति सर्वव्याप्यात्मवादः॥**

## ॥सर्वगतात्मसिद्धिः॥

[१] अत्र हि वैशेषिकैः सर्वगतत्वमात्मनः साध्यते प्रमाणतः। तथा हि–बुद्ध्यधिकरणं द्रव्यं विभु नित्यत्वे सत्यस्मदाद्युपलभ्यमानगुणाधिष्ठानत्वात्। यद्यन्नित्यत्वे सत्यस्मदाद्युपलभ्यमानगुणाधिष्ठानं तत्तद्विभु यथा आकाशम्। तथा बुद्ध्यधिकरणं द्रव्यम्, तस्माद्विभु। न च बुद्धेर्गुणत्वासिद्धेः हेतुविशेषणासिद्ध्या हेतौ असिद्धिरभि[धा]तुं शक्या, बुद्धिगुणत्वस्यानुमानसिद्धेः। तथा हि–गुणो बुद्धिः प्रतिषिध्यमानद्रव्यकर्मभावे सति सत्तासम्बन्धित्वात्। {त}यो यः प्रतिषिध्यमानद्रव्यकर्मभावे सति सत्तासम्बन्धी स स गुणः, यथा रूपादिः तथा च बुद्धिः तस्माद् गुणः।

[२] न च प्रतिषिध्यमानद्रव्यकर्मभावत्वमसिद्धं बुद्धेः। तथा हि–द्रव्यं न भवति एकद्रव्यत्वात्। यद्यदेकद्रव्यं तत्तद्द्रव्यं न भवति यथा रूपादि, तथा च बुद्धिः तस्मान्न द्रव्यम्। न चायमप्यसिद्धो हेतुः। तथा हि–एकद्रव्यं बुद्धिः सामा{न्ये}न्यविशेषवत्त्वे सत्येकेन्द्रियप्रत्यक्षत्वात्। यद् यत्सामान्यविशेषत्वे सत्येकेन्द्रियप्रत्यक्षं तत्तदेकद्रव्यं यथा रूपादि, तथा च बुद्धिः, तस्मादेकद्रव्या। न चैकेन्द्रियप्रत्यक्षत्वादित्युच्यमाने आत्मना व्यभिचारः, तस्येन्द्रियप्रत्यक्षत्वे विवादात्। नापि वायुना, तत्रापि प्रत्यक्षत्वस्य विवादास्पदत्वात्। तथापि रूपत्वादिना व्यभिचारः, तन्निवृत्त्यर्थं सामान्यविशेषवत्त्वे सतीति विशेषणोपादानम्। न च रूपस्यान्तःकरणबाह्यतया द्वीन्द्रियग्राह्यता चक्षुरिन्द्रियस्यैव चक्षुषा <u>रूपं यस्या मिथ्यापदेश</u>हेतोस्तत्र करणत्वसिद्धेः, मनसस्त्वन्तरार्थप्रतिपत्तावेवासाधारणत्वात्।

[३] अथ चैकद्रव्या बुद्धिः सामान्यविशेषत्वे अगुणवत्त्वे च सत्यचाक्षुषप्रत्यक्षत्वात् शब्दवत्। तथा न कर्म बुद्धिः संयोगविभागाकारणत्वात्। यद् यत्संयोगविभागाकारणं तत्तत्कर्म न भवति, यथा रूपादि, तथा च बुद्धिः तस्मान्न कर्म। तस्मात्सिद्धः प्रतिषिध्यमानद्रव्यकर्मभावो बुद्धेः।

[४] न च सत्तासम्बन्धित्वमसिद्धं बुद्धेः, तत्र सदिति प्रत्ययोत्पादात्। न च सत्ताभिन्ना न सिद्धा, तद्भेदप्रतिपादकप्रमाणसद्भावात्। तथा हि–यस्मिन् भिद्यमानेऽपि यन्न भिद्यते तत्ततोऽर्थान्तरम्, यथा भिद्यमाने च आदावविद्यमानो देहो भिद्यमाने च बुद्ध्यादौ न भिद्यते, सत्ताद्रव्यादौ सर्वत्र सदिति प्रत्ययाभिधानदर्शनात्, अन्यथा तदयोगात्। सा च बुद्धिः तत्सम्बद्धा, ततस्तत्र विशिष्टप्रत्यक्षप्रतीतेः। तथा हि–यतो यत्र विशिष्टप्रत्ययः स तेन सम्बद्धः, यथा दण्डो देवदत्तेन। भवति च बुद्ध्यादौ सत्तातः तत्प्रत्ययः, ततस्तया सम्बद्धेति।

[५] प्रतिषिध्यमानद्रव्यकर्मत्वादित्युच्यमाने सामान्यादिना व्यभिचारः, तन्निवृत्त्यर्थं सत्तासम्बन्धित्वादिति वचनम्। सत्तासम्बन्धित्वादित्युच्यमाने द्रव्यकर्मभ्यामनेकान्तः, तन्निवृत्त्यर्थं प्रतिषिध्यमानद्रव्यकर्मभावे सतीति विशेषणम्। तदेवं भवत्यतोऽनुमानाद् बुद्धिगुणत्वसिद्धिः।

अस्मदाद्युपलभ्यमानत्वं च बुद्धेः तदेकार्थसमवेतानन्तरज्ञानप्रत्यक्षत्वात् नासिद्धम्। नित्यत्वं चात्मनोऽकार्यत्वादाकाशवत् इत्याद्यनुमानप्रसिद्धम्। अतो नित्यत्वे सत्यस्मदाद्युपलभ्यमानगुणाधिष्ठानाक्षेपस्यावृत्तेः।

**[६]** नापि विरुद्धः, विभुन्याकाशे शब्देत्युपलम्भात्। नापि बाधितविषयः, प्रत्यक्षागमयोरात्मनि अविभुन्यप्रदर्शकयोः असम्भवात्। नापि प्रकरणसमः, प्रकरणचिन्ताप्रवर्तकस्य हेत्वन्तरस्याभावाद् भवति सकलदोषरहिताद् अतो हेतोः सर्वगतात्मसिद्धिः॥

**॥इति सर्वगतात्मसिद्धिः॥**

## पञ्चमः खण्डः

# सङ्कीर्णवादः

२३

## ॥विद्वज्जनालापः॥

हंहो! विपश्चिच्चक्रचूडामणयः! कुतः स्थानादिदं स्थानमागमिकर्मीकृतवन्तः? क्व भवतां निवासः? किं प्रयोजनमिहागमनम्? अलङ्क्रियतामयं प्रदेशः। आस्यतामिदमासनम्। समनुष्ठीयते क्षणमेकं विद्वद्गोष्ठी। केषु शास्त्रेषु भवतां सातिशयः परिचयः? किं सकलशास्त्रार्थप्रथावगतिप्रधानकरणे व्याकरणे? किमु निजनिरुपमरसप्रसरविहितसहृदयहृदयनिःसीमसौहित्ये साहित्ये? किं वा कर्कशतर्कवितर्ककार्कश्या(श्ये)प्रमाणे? किमथ समर्थसमस्तवृत्तरचनाङ्कुरविरचनाम्भसि छन्दसि। इत्थं विद्वज्जनालापः कर्तव्यः श्रोतव्यश्च तथा।

॥इति विद्वज्जनालापः॥

## ॥अपशब्दनिराकरणम्॥

[१] येऽप्यमी शाब्दिका अपशब्दजिघृक्षवो लब्धलक्षाः समाचक्षीरन्-अपशब्दस्त्वया कृत इति, तदेतद्विचारयामः। किं ध्वनिव्यतिरिक्तोऽयमपशब्द आहोश्वित् ध्वनिरेवापशब्दः? यदि तावत् ध्वनिव्यतिरिक्तोऽयमपशब्द इत्ययं पक्षः कक्षीक्रियते, एवं सति यावन्तोऽप्यमी ध्वनिव्यतिरिक्ता रूपादयः। सर्व एते ध्वनिव्यतिरिक्तत्वादपशब्दतामश्नुवीरन्। आगमविरोधश्चोपपद्यते भवताम्। यतः स्फोटोऽपि ध्वनिव्यतिरिक्त एवेष्यते, तस्यापशब्दता प्राप्नुयात्। अथ ध्वनिरेवापशब्द इति प्रतिज्ञा असावपि निकृतनामा श्रवणे च नायका(?) न शोभामादधाति। यतो ध्वनिः इत्यनर्थान्तरम्। लौकिकप्रयोगदर्शनात्तथाहि-ध्वनिः कुर्वन्नुच्यते शब्दं कार्षीरिति तस्मादसत्कल्पनैवासौ त्वयापशब्दं कृत इति।

[२] किञ्च, श्रोत्रेन्द्रियज्ञानावसेयो वा भवेदपशब्दश्चक्षुर्विज्ञानसमधिगम्यो वा? तत्र यद्याद्यः पक्षस्तदा न साधिमानमास्कन्दति, श्रोत्रेन्द्रियज्ञानग्राह्यत्वात्साधुशब्दवत्। अथ द्वितीयः विकल्पस्तदा नापशब्दव्यपदेशमापद्यते, चाक्षुषत्वात्, रूपादिवत्। अथ एवमभिदध्युर्लक्षणानुपपन्नोऽपशब्द एतदपि स्वबन्धाय कृत्योपस्थानम्, यतो यदि लक्षणाभिधानेन जेगीयमानाः शब्दानां नित्यता प्रलीयते। कथम्? यदि नित्याः शब्दाः, किं लक्षणेन? अथ लक्षणम् न तर्हि नित्याः।

[३] **अथैवमामनन्ति वैयाकरणाः**–अर्थप्रतिपादकाः साधव इति। अपशब्देन च नासावर्थो गम्यते इति। एवमपि न दोषो। योऽपि गौरित्याह सोऽपि लाङ्गुलखुरककुदविषाणादिमन्तं गोपिण्डं प्रत्याययति। योऽपि गवीत्याह सोऽपि तमर्थम्। न च गवीत्युक्ते वडवा प्रतीयते करेणुर्वा, **एतत्तु अयुक्तम्**, अर्थप्रतिपादकाः साधव इति स्थितमेतन्नास्त्यपशब्दः। तदुत्पादककारणाभावात् कार्यस्याप्यभाव इति निश्चीयते।

[४] **अथैवमाहुर्वैयाकरणाः**-यान्येवापशब्दस्योत्पादककारणानि तान्येव साधुशब्दस्यापि। **अयमपि** परिहारसम्बन्धोऽसम्बन्धताम् आत्मनः प्रदर्शयति। किं कारणम्? यतो भिन्नानि कार्याणि भिन्नेभ्यो कारणेभ्यो दृश्यन्ते। तस्माच्छब्दापशब्दापशब्दयोरेकं कारणं नोपपद्यते इति स्थितमेतत्, अन्यथा हि एकस्माच्छालिबीजात्सर्वसस्योत्पत्तिः स्यात्। न चैतद् दृष्टमिष्टं वा तस्मादयुक्तमुक्तं यान्येव शब्दस्योत्पादककारणानि तान्येवापशब्दस्यापीति।

[५] **अथ ते व्याकरणविदो वदन्ति**–योऽयमपशब्दनिराकरणोपायोपन्यासो भवद्भिरङ्गीकृतो न तेनायमपशब्दो निराकर्तुं शक्यते। किं कारणम्? यतः शब्द एवान्यावस्थान्तरगतोऽपशब्द इत्युच्यते। यथा वत्स एवावस्थान्तरगतो वृषभादिव्यपदेशमापद्यते। **अयमप्यसारः,** यतस्ते वैयाकरणा नित्याः शब्दा नित्योऽर्थो नित्यः सम्बन्ध इत्याचक्षते। नित्येषु नाम शब्देषु कूटस्थैरवगलद्भिः वर्णैर्भवितव्यम्। कथमवस्थान्तरप्राप्त्यापशब्दोऽभिसम्बध्यते इत्यहो दुर्मेधसां वोऽबोध इति।

॥इति अपशब्दनिराकरणम्॥

## ॥तमोवादः॥

**[१] तमो नामेत्यादि।**[१] तमो द्रव्यं रूपादिमत्त्वात् घटवत्, क्रियावत्त्वादश्ववत्। न चोक्तेष्वन्तर्भावो वैधर्म्यात्। तथा हि–न पृथिव्यादिचतुष्टये स्पर्शरहितत्त्वे सति रूपवत्त्वात्। तथा चोक्तम्-

*तमः खलु चलं नीलं परापरविभागवत्। प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति॥*

इत्याशयः पूर्वपक्षवादिनः।

**[२] यथा प्रदीपेत्यादि।** ननु प्रदीपनिर्गतावयवारब्धमण्डलेन अनैकान्तिकत्वोद्भावनमसङ्गतम्, तेजोजातीयस्य कनकादेः प्रतिघातकत्वदर्शनादखण्डावयविद्रव्यप्रतीतेश्च। न च तमोजातीयस्य कुत्रापि प्रतिघातत्वं दृष्टम्, खण्डावयविद्रव्यप्रतीति चास्तीत्यभिप्रायो वृद्धानाम्। **तमःपरमाणव इत्यादि**। ननु तामसाः परिमाणवः सिद्धा असिद्धा वा? यदि सिद्धाः सिद्धं नः समीहितम्। न हि तमःकार्यद्रव्यसिद्धिम् अन्तरेण तत्सिद्धिरस्ति। अथासिद्धाः किमाश्रयास्पर्शत्वात्स्पर्शवत्त्वचिन्ता? ततश्च यदि स्वतन्त्रं साधनम्, यदि वा प्रसङ्गः, उभयत्रापि आश्रयासिद्धिर्दूषणम्। तन्न तमः पक्षीकृत्य द्रव्यत्वाद्रव्यत्वविचारः। यदि द्रव्यं स्यान्नित्यमनित्यं वा स्यात्, तृतीयस्य प्रकारस्याभावात्। नित्यं भवन्न बाह्येन्द्रियप्रतिविषयः स्याद् गगनवत्। अनित्यं भवत्परमाणुकारकं स्याद् घटवत्। ते च परमाणवः स्पर्शवन्तोऽस्पर्शवन्तो वा भवेयुः। यद्यस्पर्शवन्तो न कार्यवन्तः न कार्यद्रव्यारम्भकाः स्युर्मनोवत्। अथ स्पर्शवन्तः तर्हि तत्कार्येण स्पर्शवता भवितव्यं घटवत्। यद्गतं हि रूपमारम्भकं तद्गतस्यापि स्पर्शस्यापि आरम्भकत्वादिप्रसङ्गापादनम्।

तथापि प्रसङ्गानामपरिच्छेदकत्वात्परपक्षदूषणमात्रं न स्वपक्षसिद्धिः अतस्तत्सिद्धे प्रमाणं वाच्यम्। तच्चेदम्- तमो द्रव्यं न भवति आलोकनिरपेक्षेण चक्षुषा गृह्यमाणत्वात्। यदालोकनिरपेक्षेण चक्षुषा गृह्यते तद्द्रव्यं न भवति। यथा आलोकाभावः आलोकनिरपेक्षेण चक्षुषा गृह्यते {च} ततः = तस्माद् द्रव्यं न भवति। न चालोकदर्शनेन व्यभिचारः। तत्र विषयभूतस्यैवालोकस्य सहिकारित्वात्। अद्रव्यं भवत्कर्म भविष्यतीत्यपि न, संयोगविभागानारम्भकत्वात्। न हि तमसा किञ्चित्कुतश्चिद् विभज्यते। नापि संयुज्यते चलनबुद्धेरभावाच्च। नापि सामान्यम्, आश्रयाप्रतीतौ प्रतीयमानत्वात्तस्य, तमसो नित्यताप्राप्तेश्च। नापि विशेषः, नित्यद्रव्याश्रयत्वेनाप्रतीतेः। नापि समवायः, समवायिनोरनुपलम्भेऽपि उपलभ्यभानत्वात्। नापि वास्तवो गुणः, द्रव्यानाश्रितत्वात्। तस्माद् भावाभावे सति भुव आरोपितस्तमोगुणः इति स्थितम्। कन्दलीटिप्पनकात्।

[३] निशि[२] मशीनिचयाकारमन्धकारमवलोकयन्तोऽपि केचन मुग्धधियस्तमसि विप्रतिपद्यन्ते। तत्स्वरूपमुच्यते। **तमः पौद्गलिकं विधिस्वातन्त्र्याभ्यां च चक्षुर्ग्राह्यपटादिवदिति**। अभावानुल्लेखो विधिः, अपरायत्तत्वं स्वातन्त्र्यम्। विधिपदेनाभावस्य स्वातन्त्र्यपदेन गुणादीनां चक्षुःपदेन चात्मादेर्निरासः। विधिस्वातन्त्र्याभ्यां चक्षुर्ग्राह्यत्वं रूपवत्त्वमव्याप्तम्। रूपवच्चावश्यं पौद्गलिकमेवेति प्रमाणार्थः। न

---

[१] न्यायकन्दलीग्रन्थस्य व्याख्यारूपोऽयं वादः प्रतिभाति।

[२] अस्य सूत्राणि वादस्यान्तभागे सन्ति।

चाश्रयासिद्धिः, तमःशब्दवाच्यस्य कस्यचिद्धर्मिण उभयसिद्धत्वात्। न च हेतुरप्रसिद्धविशेषणोऽसिद्धिभेदः, अन्धकारोऽयमिति प्रत्यये घटाभावोऽयमिति प्रत्ययवदभावोल्लेखस्य अननुभवात्। न हि निशिमशीनिकुरम्बाकारमवलोकयन्न मुग्धधीरभावाभासमात्मनो ज्ञानमनुभवति। न त्वालोकाभावोऽयमिति प्रत्ययस्तमोविषय इत्युभयसिद्धम्। न चात्राभावोल्लेखाननुभवोऽस्ति तत्कथं नासिद्धविशेषणो हेतुरिति?। तत्किमेतावता तमस एकान्तेनाभावरूपत्वं सिद्ध्येत् ? एवं ह्यालोकाभाववत्त्वं स्यान्नालोकाभावरूपत्वम्। न हि घटः पटाभावोऽयमिति प्रत्ययविषयत्वेन पटाभावरूपो भवति किं तु पटाभाववानेव। कथं तर्हि आलोकाभावोऽयमन्धकार इति प्रतीतिः समानाधिकरणा ? आलोकाभावान्धकारयोः कथञ्चित्तादत्मा(तादात्म्या)दिति ब्रूमः। भावांशाभावांशयोः सर्वत्र कथञ्चिदभेदात्। अत एव पटाभाववानयं पटाभावरूपो वेति द्वयमपि भेदाभेदार्पणया घटे न विरुद्ध्यते।

**[४]** अयमर्थः-तमोद्रव्यं भावांशरूपम्, तत्र य एष इदं तम इति प्रत्ययो भावरूपावभासी स भावांशविषयः, अभावांशरूपानुपल्लेखात्। य एष पुनरालोकाभावोऽयमिति प्रत्ययोऽभावरूपावभासी सोऽभावांशविषयः, भावांशरूपानुल्लेखात्। तदालोकाभावप्रत्ययस्य तमोविषयत्वेऽपि विधिरूपप्रत्ययविषयविषयत्वं तमसो न विरुद्ध्यते इति।

**[५]** एतेन यदाह विधिमुखस्तु (?)प्रत्ययो सिद्धः। न हि नञोऽप्रयोग इत्येव विधिः, प्रलयविनाशावसानादिषु व्यभिचारात्। नञार्थान्तर्भाविन वाक्यार्थपदप्रयोग इति तु समं समाधानमन्यत्राभिनिवेशादिति तदपाक्रियते, प्रलयादिप्रत्ययानां नञोऽप्रयोगेऽपि निषेधरूपत्वस्य युक्तत्वात्। क्षयप्रलयविनाशावसानधनानामञ्जसा नञ इवाभाववाचित्वात्। नैवं तमोऽन्धकारादीन् शब्दानवसानवचनान् शाब्दिकाः सङ्गिरन्ते। ततो नञ्प्रयोगाभावावशेषेऽपि अन्धकारप्रत्ययो विधिरूप एव। प्रलयादिप्रत्ययस्तु निषेधरूप इति स्थितम्।

**[६]** तमसः पौद्गलिकत्वम्। **ननु** महतः पुद्गलस्कन्धस्य स्पर्शवत्त्वेन प्रतिघातधर्मकत्वात् तमसि सञ्चरतः पुरुषस्य प्रतिबन्धः स्यात् न चैवमतो न स्पर्शवत्तमः तथा चापौद्गलिकमिति, **उच्यते**, स्पर्शवत्त्वेऽपीति प्रदीपप्रभावदिति साध्यसाधर्म्यम्, अप्रतिघातस्तमसः प्रतिघातकारित्वाभावः। यथा स्पर्शवत्यामपि प्रदीपप्रभापटल्यामटतां प्रतिबन्धो न भवति तथा स्पर्शवत्यपि तमसि सञ्चरतां तत्परिणामविशेषाद् अप्रतिबन्धः। **(शं)** प्रदीपनयनादिप्रभाणाम् अनुद्भूतस्पर्शत्वेन प्रतिघातकत्वाभावोऽस्माकं सिद्ध इति **चेद्,** एवं तर्हि तमःस्कन्धेऽपि प्रतिघातकत्वाभावोऽनुद्भूत स्पर्शत्वादेवास्तु। न तु(ननु) प्रभाजातीये क्वचिदपि स्पर्श उपलब्ध इत्यन्य{त्व}त्र तस्योद्भूत्वं कल्पयितुमुचितम्, तमोजातीये तु क्वचिदपि स्पर्शो नोपलब्ध इति तस्य कथमनुद्भूतत्वं कल्पयितुं शक्यम्? प्रत्युत तस्य नास्तित्वमेव कल्पयितुमुचितम्, {तमो} अत्राह-**रजोवदिति**। जालिकारन्ध्रप्रविष्टभास्करप्रभादण्डान्तर्दृश्याः पांशुकणा वा रजः, तस्येव तमसः सन्नपि स्पर्शः क्वचिदपि न वेद्यते। परिणामविशेषादिति हेतुरत्रापि सम्बध्यते। न केवलमप्रतिघातः स्पर्शानुपालम्भोऽपीत्यपिशब्दार्थः। यथा रजकणानां क्वचिदपि स्पर्शो नोपलभ्यतेऽथ च नास्तीति न कल्प्यते, तथा यद्यपि तमसः क्वचिदपि स्पर्शो

नोपलभ्यते तथापि नास्तीति न कल्प्यते। ततश्च सतः स्पर्शस्यानुद्‌भूतत्वं कल्पयितुं दीपादिप्रभाणाम् इवोचितम् एवेत्यनुद्‌भूतस्पर्शत्वेनाप्रतिघातः।

**[७] ननु** रजःकणानामनुपलम्भेऽपि स्पर्शस्य असत्त्वं न भवति, तत्कार्याणां स्पर्शवतामुपलम्भेन तत्रापि स्पर्शसत्तानिश्चयात्, **नैवम्,** तमसः स्पर्शवत्कार्यमुपलभ्यते। **(शं)** यो हि सूक्ष्मधीस्तम एव नेच्छेत्स कथं स्पर्शवत्कार्यम् इच्छेदिति, **तन्न,** आलोकपरमाणूनामेव तमःकार्यरूपत्वात्। क्षपासु कृतक्रीडाः तमःपरमाणव एवोदयावनीधरशिरसो विकसकुसुम्भकुसुमशेखरशोभां भजन्ति। भानुमति प्रभापरमाणुपरिणामलक्ष्मीं श्रयन्ते इति नः सिद्धान्तः। आलोकश्च स्पर्शवानिति सर्वसम्मतमेवेति। स्पर्शवत्कार्योपलम्भादपि रजसामिव तमसां स्पर्शसत्तानिश्चयोऽस्ति। न च स्पर्शवतास्पर्शवत्कार्यं जन्यत एव, नायनरश्म्यादिभिर्व्यभिचारात्। तत्साक्षादनुपलब्धोऽपि रजःस्विव तमसि स्पर्शोऽस्ति। स चासन्नप्यनुद्‌भूतत्वेन सूर्याचन्द्रमःप्रदीपप्रभाणामिव प्रतिघातहेतुर्न भवति। ततो न प्रतिघाता-भावेनास्पर्शवत्त्वम्। नापि स्पर्शाभावेनापौद्गलिकत्वम्।

**[८] स्यान्मतिः-**यदि स्पर्शवत्पुद्गलप्रचयरूपं तमस्तदा महान्धकारे भूगोलकस्येव तदवयवभूतानि खण्डावयविद्रव्याणि किमिति नोपलभ्यन्त? इत्यत आह-**खण्डादर्शनं चेति**। विशेषातिदिष्टः प्रकृतं न बाधते इति न्यायात् परिणामविशेषात् प्रदीपप्रभावदित्येतद् अत्रापि योज्यते। न केवलं परिणामविशेषात् प्रदीपप्रभावद् अप्रतिघातो रजोवत्स्पर्शानुपलम्भः। तथा खण्डादर्शनखण्डावयविद्रव्याणामदर्शनं चेति। तथा हि प्रदीपप्रभा-परमाणुभिः परिणामः विशेषणवशाद् अनुभूतस्पर्शम् अनिबिडावयवम् अप्रतीयमानखण्डावयविद्रव्यविभागम् अप्रतिघाति प्रभामण्डलमुपजन्यते तथा परिणामविशेषात् तमःपरमाणुभिरपि।

[९] तदेवं पौद्गलिकत्वपक्षोक्तदूषणमपाकृत्य येऽभावरूपं तमो वाव(व्याच)क्षते तन्मतमपाकरोति-**न च भाभाव इति।** न च भायाः = प्रकाशस्याभावोऽभावरूपं भवति, तम इति प्रकृतम्। अल्पकृष्णमहत्प्रतिभासायोगादिति। 'अल्पं तमः', 'कृष्णं तमो', 'महच्च तमः' इति प्रतिभासः पुरुषाणामस्ति, स एव तमसो भाभावरूपत्वे कथं स्यात्? न खल्वभावस्य नीरूपस्य अल्पमहत्त्वकृष्णादयो धर्माः सम्भवन्ति। अभावस्यैवाभावप्रसङ्गात्। न केवलमल्पादिप्रतिभासायोगात्तथाविधग्रहाच्चेति। **विधिना** विधिरूपेण भावरूपेणेत्यर्थः। न भाभावरूपं तम इति योगः। बहलतमालपल्लवकुवलयदलालिकुलश्यामलं तमः प्रादुरस्ति, न पुनर्भाभावं पुरः पश्यामः इत्येवं निषेधरूपेण ततः कथं नाम तमो भाभावो भवेत्?

**[१०] ननु** चक्षुरिन्द्रियं सर्वत्र विषयं परिच्छिन्ददालोकसापेक्षमेवाद्राक्षम्, ततस्तमः परिच्छेदकमालोकमपेक्षते इति, **तन्न,** आलोकसद्भावव्यञ्जनीयेष्वेव विषयेषु चक्षुष आलोकसापेक्षत्वात्। द्विधा हि प्रवृत्तिश्चक्षुरिन्द्रियस्य-आलोकसद्भावापेक्षा आलोकनिरपेक्षा च। घटादिषु मनुष्यादिचक्षुषामालोकसद्भावापेक्षा, तेष्वेव च मार्जारादि चक्षुषामालोकनिरपेक्षेति। ततश्चेदमपि तम आलोकाभावज्ञेयमालोकविपक्षत्वात्। आलोकसद्भावे तमस एवासत्त्वाद् इत्यालोकानपेक्षेणापि चक्षुषा परिच्छिद्यते। अपि चालोकाभावः तावत्कथमपि आलोकनिरपेक्षेणापि चक्षुषा गृह्यते तथा तमोऽप्यस्तु, न

चाभावो न प्रत्यक्षः, भवन्मते तस्य प्रत्यक्षत्वाभ्युपगमात्। यदि तमश्चाक्षुषं कथं तर्हि निमीलितलोचनस्यापि तमो दर्शनमिति?। यदि चाक्षुषं तर्हि क्रियान्तरैरग्राह्यमस्तु, मनोग्राह्यत्वे तु को दोषः? चाक्षुषा अपि हि घटादयो मनसा विकल्प्यमाना दृश्यन्ते। एतावत्तु स्याद्वक्तव्यं विकल्पोत्पादस्य किं निबन्धनमिति? तत्र सत्यतमोऽनुभवाहितः संस्कारो निबन्धनमिति ब्रूमः। तस्मादल्पकृष्णमहत्त्वप्रतिभासयोगाद् विधिग्रहाच्च न भाभावरूपं तम इति।

**[११]** ननु न भावरूपं तमो भावः कस्यचिदभावात्किन्त्वालोकादर्शनमेव ? यदा आलोकविषयं ज्ञानं नोत्पद्यते तदेव तम इति व्यवह्रियते इत्यत आह–**अत एव नालोकादर्शनमिति।** अल्पकृष्णमहत्त्वप्रतिभासायोगाद् विधिग्रहाच्च नालोकादर्शनं = नालोकज्ञानानुत्पत्तिरूपं तमः। तमसो ह्यल्पकृष्णमहत्त्वादयो धर्माः प्रतीयन्ते। 'जलमेदुराम्बुधरसोदरं पुरस्तमः पश्यामि' इत्येवं च विधिरूपेण तमोज्ञानं तदेतदुभयमपि आलोकज्ञानोत्पत्तिरूपत्वे तमसः कथं स्यात्? तदालोकादर्शनरूपमपि तमो न भवति।

**स्यादेवं** सालोकेऽपि गर्भगृहप्रवेशादौ बहिर्देशादागतस्य प्रतिपत्तुः असत्यपि तमसि वस्तुज्ञानानुत्पत्तौ तमःप्रतिभासोऽस्ति। ततो ज्ञानानुत्पत्तिमात्रमेव तम इति, **तन्न,** यतः प्रचुरतरालोकोपहतलोचनः पुमांस्तत्र अवस्थितानर्थान् यथावदवगन्तुमसमर्थो जलरूपतया मरीचिकाचक्रमिवालोकमेव तमोरूपतया प्रतिपद्यते। न च मिथ्यातमःप्रतिभासेनामिथ्यातमःप्रतिभासस्य साम्यमापादयितुमुचितम्। सत्यजलादिप्रतिभासस्य अप्यसत्यजलादिप्रतिभासेन साम्यापादनप्रसङ्गात्। किञ्च, ज्ञानानुत्पत्तिव्यतिरेकेणापरस्य तमसोऽनाश्रयणे विशदज्ञानोत्पत्तिव्यतिरेकेणान्यस्य लोकस्याप्यभ्युपगमो मा भूत्। असत्यपि वा लोके बहुलान्धकारनीशीथिनीसमये नक्तञ्चराणाम् अञ्जनादि संस्कृतचक्षुषां च सप्रकाशं सकलवस्तुप्रतिभासदर्शनात्। लोकप्रतीतिबाधस्तूभयत्रापि तुल्यः। यथैव हि मध्याह्नेऽतितीव्रालोके 'बहिर्गन्तुमसमर्था वयम्' इति लौकिकी प्रतीतिरस्ति तथा बहुलान्धकारायां क्षपायां 'बहिर्गन्तुम् असमर्था वयम्' इत्यपि प्रतीतिरस्ति। तन्न ज्ञानानुत्पत्तिमात्रं तमः, आलोकस्यापि अभावप्रसङ्गात्।

**[१२]** ननु तमः पुद्गलद्रव्यं किं तर्हि रूपविशेषोऽयमित्यत्राह–**न चानाश्रयो गुण इति।** न चानाश्रयः = आश्रयरहितो गुणः सम्भवति। रूपं तावद् गुणः, गुणश्च द्रव्याश्रयः। न च तमसि प्रतिभासमाने तदाधारभूतद्रव्यम् किमपि प्रतिभासते। न च द्रव्याप्रतिभासेऽपि स्वतन्त्रो गुणप्रतिभासः सम्भवति तत्कथं रूपविशेषं तमः स्यात्?

**स्यान्मतम्-**न तमःसंविदा पुरोऽवस्थित एव रूपविशेषो गृह्यते, किं तर्हि ? अन्यत्रोपलब्धो नीलिमा तत्रारोप्यते। अत एव 'दीर्घं ह्रस्वं महदल्पं तमः' इत्यपि प्रतिभासो नासङ्गतः, तावद्देशव्यापिनो नीलिम्नः समारोपादिति, तन्न, अतो(तत्र आह-) **नाप्यारोपप्रत्ययोऽस्खलित इति।** आरोपकारी प्रत्यय आरोपप्रत्ययो यतोऽस्खलितो न भवति, किं तु स्खलित एव इत्यर्थः। यदि तमःप्रत्ययोऽन्यत्रोपलब्धस्य नीलिम्नः समारोपकारी स्यात्तदा नात्र नीलिमा, किं तर्हि ? अन्यतः समानीय समारोपित इत्येवं स्खलद्वृत्तिः स्यात्। न

खलु माणवके वह्निप्रत्ययो स्खलितस्तथा सर्वभावी वापीना(?) सम्बध्यते। सर्वेषां भवतीत्येवं शीलः सर्वभावी। यद्ययं तमःप्रत्ययः समारोपितरूपविशेषविषयः स्यात्तदा सर्वेषामविशेषेण न स्यात्, न खलु माणवके वह्निप्रत्ययः। न चैषामगृहीतसङ्केतानामपि पुरुषाणामपि जायते। एतेन यदुक्तम्-तस्माद् रूपविशेषोऽयमत्यन्तं तेजोऽभावे सति सर्वतः समारोपितस्तम इति तत्प्रतिव्यूढम्।

सम्प्रति तमोवादमुपसंहरति-**तत्** = तस्मात्पौद्गलिकं तमो न भाभावः, नाप्यालोकदर्शनम्, नाप्यन्यतः समारोपितो रूपविशेषः।

**॥इति तमोवादः समाप्तः॥**

**तेजसैवापवत्यः(?) स्कन्धस्तमः। पौद्गलिकत्वं च विधिस्वातन्त्र्याभ्यां चक्षुर्ग्राह्यत्वात्। स्पर्शवत्त्वेऽपि परिणामविशेषात् प्रदीपप्रभातदप्रतिघातः। रजोवत्स्पर्शानुपलम्भोऽपि। खण्डादर्शनं च। न च भावः। अल्पकृष्णमहत्त्वप्रतिभासायोगात् विधिग्रहाच्च। अत एव नालोकादर्शनम्। न चानाश्रयो गुणः। नाप्यारोपप्रत्ययोऽस्खलितः। सर्वभावी वा। तत्पौद्गलिकं तम इति सूत्रम्॥**

**॥इति तमोवादः॥**

## २६

## ॥चक्षुर्द्वैतनिराकरणम्॥

[१] एकविनाशे द्वितीयाविनाशान्नैकत्वं चक्षुषः। एकस्मिन्नुपहते चोद्धृते वा चक्षुषि द्वितीयमवतिष्ठते चक्षुर्विषयग्रहणलिङ्गं विनाशाविनाशलक्षणविरुद्धधर्मसंसर्गान्नानात्वमित्यर्थः। आक्षेप्ता आह-अवयवविनाशे अप्यवयव्युपलब्धेरहेतुः। एकविनाशे द्वितीयावस्थानादित्यहेतुः। कस्माद्? वृक्षस्य हि कासुचित्शाखासु भग्नासु उपलभ्यते एव वृक्षः। समाधाताह-दृष्टान्तविरोधादप्रतिषेधः। न कारणद्रव्यविभागे कार्यद्रव्यमवतिष्ठते, नित्यत्वप्रसङ्गात्। बहु[षु] चावयविषु यस्य कारणविभागस्तस्य विनाशः, येषां कारणान्यविभक्तानि तान्यवतिष्ठन्ते इति। अथवा दृश्यमानार्थविरोधो दृष्टान्तविरोधः। मृतस्य शिरःकपाले द्वाववटौ नासास्थिव्यवहितौ चक्षुषोः स्थानं भेदेन गृह्येते। न चैतदेकस्मिन् नासास्ति(स्थि)व्यवहिते सम्भवतीति। तृतीयं व्याख्यानमाह-अथवा एकविनाशस्य अनियमात् द्वाविमावर्थौ तौ च पृथगावरणोपघातौ। एकत्वे चक्षुषो विनाशनियमो न स्यात्, सव्यस्यैव चक्षुषो नाशो दक्षिणस्यैव वेति? एकत्वात्सव्यविनाशे दक्षिणस्यापि विनाशप्रसङ्गात्। दृश्यते चायं नियमः तस्माद् द्वावर्थौ पृथगावरणौ पृथगुपघातौ च। अपि चक्षुरेकं मध्ये नासावंशेन पीडितं ततोऽङ्गुल्यावपीडितं यथैकमर्थं भिन्नमवभासति अवपीडने च निवर्तमाने भिन्नावभासितावर्थौ सन्दधातीव तथा नासावंशावपीडितं भिन्नमिव दर्शयेत् तन्निवृतौ सन्दध्यादिवेत्याह-अवपीडनाच्चैकस्य चक्षुष इतरस्मिन् भेदाद् द्वितीयसन्निकर्षस्य भेद इत्यर्थः। अङ्गुल्यवपीडनेन चक्षुषा दृष्टान्तेन विरोधादित्यर्थः। एकविनाशे इतराविनाशोऽयं दृष्टान्तः, तेन विरोधादिति चक्षुर्द्वैतस्थापना।

[२] **यदुक्तम्**–एकविनाशे द्वितीयाविनाशान्नैकत्वमिति तस्याप्यनुपपत्तेः। द्वितीयमवतिष्ठत इति नैतत्कस्यचित्प्रत्यक्षप्रत्ययमात्रं तु विनष्टेऽप्येकस्मिन् अधिष्ठाने यदवतिष्ठते तेन भवति। न चाधिष्ठानमैन्द्रियमपि तु यत्तदनुविधायि तदेकमनुवि[धा]त्ते इति। यथा बहुवातायनस्य वेश्मन एकपिधाने इतरेण ग्रहणमिति। तस्मात्सव्यदृष्टस्येतरेण प्रत्यभिज्ञानादेकं चक्षुरिन्द्रियम्। अनेकत्वे त्विन्द्रियस्य युगपदधिष्ठानासम्भवः, यतोऽणु मनो नेकं चक्षुः न चाणोर्मनसोऽनेकेन च चाक्षुषा युगपत्सम्बन्धः सम्भवति। अथासम्बद्धमपि द्वितीयं चक्षुरर्थानालोचयति। एवं सति द्वितीयचक्षुर्वदितरचक्षुरपि मनसानधिष्ठितमेव प्रवर्तिष्यते इति व्यर्थं मनः प्राप्तम्। अनधिष्ठितं च प्रवर्तमानम् इन्द्रियकरणत्वं बाधते। न हि करणमनधिष्ठितं प्रवर्तमानं दृष्टमिति समग्रासमग्रचक्षुषोश्च तुल्योपलब्धिप्रसङ्गः। न ह्यनधिष्ठितमिन्द्रियं प्रवर्तते इत्यणुत्वान्मनसः नित्यमिदमेकेनैव सम्बध्यते इति विकलाविकलयोस्तुल्योपलब्धिः प्राप्ता। तस्मादेकमनेकाधिष्ठानं चक्षुरिति।

[३] प्रकरणविरोधश्चेन्द्रियार्थपञ्चत्वादिति। न च तदेकस्मिन् शरीरे जात्यभिप्रायम्, घ्राणादीनां व्यक्तीनां चतसृणां व्यक्त्यन्तरेण समभिव्याहारोपपत्तेः, न जात्या। न हि भवति ब्राह्मणयुधिष्ठिरावागताविति, किं तु ब्राह्मणराजन्यौ इति वा विशिष्टयुधिष्ठिराविति च, इति विनष्टेऽप्येकस्मिन्नधिष्ठाने योऽविनष्टोऽवविष्ठतेऽनेन प्रत्ययमात्रं काणस्येव। भवति च नाशावंशावपीडने न सर्वेषां सर्वदा सर्वत्र द्विचन्द्रवद्विभ्रमप्रसङ्गः। आगन्तुकमवपीडनं विभ्रमहेतुर्नौत्पत्तिकमिति कार्यदर्शनात्कल्प्यते।

**॥इति चक्षुर्द्वैतनिराकरणम्॥**

## ॥विप्रवक्त्रमुद्गरः॥

[१] इह हि केनचित् ब्राह्मणेन जातिमात्राभिधागर्वितेनोक्तम् "यथा ब्राह्मणस्यैव परलोकेन सार्द्धं सम्बन्धोऽस्ति, न पुनरन्येषां क्षत्रियविट्शूद्रादीनां वर्णानाम्। यतो यद्यपि तेषां परलोको भावी तथापि द्विजशुश्रूषया नान्यथेति।" एवं प्रोक्ते सति केनचित् सिद्धान्तानुसारेण प्रतिवचनमत्राभिधीयते। सति धर्मिणि धर्मा उत्पद्यन्ते। ततो यदि ब्राह्मणत्वं नाम किञ्चिद्वस्तुतत्त्वं विद्येत तदा एवं वक्तुं शक्यते यथा-ब्राह्मणस्यैव परलोकोऽस्ति नान्येषाम्, यदा पुनस्तदेव नास्ति तदा तदभिधानं वृथैव। यतो यदेतत् ब्राह्मणत्वं तत् किं जीवस्य, किं वा शरीरस्य, किं वा संस्कारस्य, किं वा वेदस्येत्यनल्पं विकल्पचतुष्टयमवतरति।

[२] यदि तावज्जीवस्य ब्राह्मणत्वमङ्गीक्रियते तदा नटभटविटवरुटकिराटचर्मकारादीनामपि ब्राह्मणत्वमङ्गीकर्तव्यम्, तेषामपि जीवो विद्यत एव। किञ्च, जीवस्तावदमूर्तः कथं तस्य ब्राह्मणत्वं भवति? अथामूर्तस्यापि जीवस्य ब्राह्मणत्वमङ्गीक्रियते तदाकाशस्यापि ब्राह्मणत्वेन भवितव्यम्। न चास्यैतदिष्टम्, तस्मान्निश्चीयतेऽस्माभिर्यथा आकाशस्यामूर्तत्वान्नास्ति ब्राह्मणत्वमेवं जीवस्यापि अमूर्तत्वान्नास्तीति।

[३] अथ मन्यसे संस्कारेण ब्राह्मणत्वं तर्हि नटबटुकस्यापि संस्काराद् ब्राह्मणत्वं स्यात्। अपि च ब्राह्मणबालकस्य ब्राह्मणत्वं विद्यते न वा? यदि विद्यते तदा तस्य चूडोपनयनसमावर्तनव्रतादेशसंस्कारो वृथा। अथ बालावस्थायां नास्ति संस्काराच्च भवति तदा नटबटुकयोरपि भवतु समानशूद्रत्वात्। समानशूद्रत्वेनोभयोरपि वा ब्राह्मणत्वाभावः प्रसज्यते।

[४] अथ शरीरस्य ब्राह्मणत्वमङ्गीक्रियते तदा क्षितिजलप[व]नहुताशनाकाशानामपि प्रत्येकं विप्रत्वेन भवितव्यम्। न च तदिष्टं तस्मादव्यस्तानां नास्ति विप्रत्वमिति। अथ कदाचिन्मन्यसे समस्तानां द्विजत्वं भविष्यति तदपि मिथ्या, घटद्रव्ये संयुक्तत्वाभ्युपगमात्। न च घटद्रव्यस्य कश्चिद् ब्राह्मणत्वं मन्यते तस्मात् समस्तानामपि नास्ति।

[५] अथ वेदेन ब्राह्मणत्वमाश्रीयते तदपि मिथ्या, शब्दरूपत्वाद्वेदस्य विटशास्त्रवत्। यथा विटशास्त्राध्ययनान्नास्ति ब्राह्मणत्वम्। एवं वेदाध्ययनादपि ब्राह्मणत्वं नास्ति। किं च नटविटवरुटकिराटचर्मकारचाण्डालादयोऽपि अन्यदेशान्तरं गत्वा वेदं पठन्ति पाठयन्ति च। तन्न जानाम्यहं यथा वेदेन ब्राह्मणो भवति। तथा वेदे चोक्तम्-

[६] *कैवर्तीगर्भसम्भूतो व्यासो नाम महामुनिः। तपसा ब्राह्मणो जातः तस्माज्जातिरकारणम्॥*
*उलूकीगर्भसम्भूतो कणादो नाम महामुनिः। तपसा ब्राह्मणो जातः तस्माज्जातिरकारणम्॥*
*उर्वशीगर्भसम्भूतो वसिष्ठोऽपि महामुनिः। तपसा ब्राह्मणो जातः तस्माज्जातिरकारणम्॥*
*हरिणीगर्भसम्भूतो ऋषिशृङ्गो महामुनिः। तपसा ब्राह्मणो जातः तस्माज्जातिरकारणम्॥*
*मण्डकीगर्भसम्भूतो माण्डव्यो नाम महामुनिः तपसा ब्राह्मणो जातः तस्माज्जातिरकारणम्॥*
*गर्दभीगर्भसम्भूतो गार्ग्यो नाम महामुनिः। तपसा ब्राह्मणो जातः तस्माज्जातिरकारणम्॥*
*क्षत्रियाणां कुले जातो विश्वामित्रो महामुनिः तपसा ब्राह्मणो जातः तस्माज्जातिरकारणम्॥*

इत्यादयो जात्या विनापि ब्राह्मणा जाताः। तस्मात्-

[७] *व्रतिनो ब्राह्मणा ज्ञेयाः, क्षत्रियाः शस्त्रपाणिनः। कृषिकर्मकरा वैश्याः शूद्राः प्रेषणकारकाः।*

॥इति विप्रवक्त्रमुद्गरः समाप्तः॥

## २८

## ॥सर्ववाक्यस्य सावधारणता॥

सर्वं वाक्यं सावधारणं प्रवर्तते। अन्यथा नियतार्थाप्रदर्शकत्वेन तदुच्चारणवैयर्थ्यप्रसङ्गात्। विपरीताकार-निराकरणचातुर्यायोगेन निराकाङ्क्षप्रवृत्त्यसिद्धेः। **यद्येवं** तर्हि चैत्रो धनुर्धर इत्यादिवाक्येषु धनुर्धरत्वमेव स्यात् न सूर्यौदार्यथै(स्थै)र्यादयः, **तदयुक्तम्,** यतः सर्वं वाक्यं सावधारणमिति न्यायेऽप्याशङ्कितस्यैव व्यवच्छेदः। परार्थं हि वाक्यम् अभिधीयते। यदेव परेण व्यामोहादाशङ्कितं तस्यैव व्यवच्छेदः। चैत्रो धनुर्धर इत्यादौ च चैत्रस्य धनुर्धरत्वायोग एव परेणाशङ्कित इति तस्यैव व्यवच्छेदो, नान्यधर्मस्य ।

**॥इति सर्ववाक्यस्य सावधारणता॥**

*******

## २९

## ॥जातिसिद्धिः॥

जातिविशेषस्य प्रत्ययानुवृत्तिलिङ्गस्याप्रत्याख्यानम्। न जातिविशेषमन्तरेण प्रत्ययानुवृत्तेर्निमित्तम्। न च निर्निमित्तः प्रत्ययो व्यवस्थातुमर्हति। अस्ति चायमनुवृत्तिप्रत्ययः कुण्डानीति। अस्ति च व्यावृत्तिप्रत्ययो नेमानि कुण्डानीति। तस्माज्जातिविशेषो न प्रत्याख्येय इति जातिसिद्धिः।

**॥इति जातिसिद्धिः॥**

*******

## ॥सामान्यसिद्धिवादः॥

[१] अस्ति सामान्यं गौर्गौरिति अबाधितप्रत्ययत्वेन तस्याभावासिद्धेः। अबाधितप्रत्ययविषयस्यापि तस्याभावः तर्हि विशेषस्यापि अभावप्रसक्तिः, तथाभूतप्रत्ययविषयत्वव्यतिरेकेणापरस्य तद्व्यवस्थानिबन्धनस्य तत्राप्यभावाद्। यथा हि पुरोऽवस्थिते गोवर्गव्यावृत्ताकारा बुद्धिरुपजायमाना संलक्ष्यते तथा गौर्गोरित्यनुगताकारेणाप्युपजायमाना सैव लक्ष्यते। न चानुगतव्यावृत्ताकाराबुद्धिः अ[तदा]त्मकवस्तुव्यतिरेकेण घटते। अबाधितप्रत्ययस्य विषयव्यतिरेकेणापि सद्भावाभ्युपगमे ततो वस्तुव्यवस्थाभावप्रसक्तेः।

[२] **न च** अनुगताकारत्वं बुद्धेर्बाध्यत्वं तद्वति **वक्तुं युक्तम्**, सर्वत्र देशादावनुगतप्रतिभासस्य अतद्रूपस्य तथाभूतस्य व्यवहारहेतोर्दर्शनात्। अतो व्यावृत्ताकारानुभवांशानधिगतम् अनुगतमाकारम् अवभासयन्ती अक्षान्वयव्यतिरेकानुविधायिनी अबाधितरूपा बुद्धिः अनुभूयमानानुगताकारं वस्तुभूतं सामान्यं व्यवस्थापयति।

[३] **न च** शाबलेया, प्रतिनियतव्यतिरिक्तरूपविवेकेन साधारणरूपस्यापरस्य भेदेनाप्रतिभासनाद् व्यक्तिरूपाद् भिन्नमभिन्नं वा सामान्यं नाभ्युपगन्तुं युक्तमिति **शक्यं वक्तुम्**, यतः सद(दृ)शसमानेन्द्रियग्राह्याणामपि वातातपघटपटादीनां प्रतिभासभेदान्नापरम्। स च शाबलेयादिव्यक्तिप्रतिभासगौर्गौरिति साधारणावभासस्य तद्व्यवस्थानिबन्धनस्य संवेदनात्। एकान्ततो व्यक्तिभेदे तु सामान्यस्य शाबलेयादिव्यक्तिस्वरूपस्येव तदभिन्नसाधारणरूपस्यापि बाहुलेयादिव्यक्त्यन्तरेण प्रतिभासो न स्यात्। अस्ति च व्यक्त्यन्तरेऽपि गौर्गौरिति साधारणरूपानुभवः। अतः कथं न भिन्नसामान्यसद्भावः?

[४] **(शं) न च** व्यक्तिदर्शनवेलायां स्वेन वपुषा बहिः ग्राह्याकारतया प्रतिपदमवतरन्ती जातिर्नाना भाति, व्यक्तिव्यतिरेकेणापरस्य बहिः साधारणनिमित्तनिरपेक्षा प्रतिभाति। **(स)** तथाभ्युपगमे प्रतिनियतदेशकालाकारतया तस्या [अ?]भावप्रसङ्गात्। **(शं) न च** असाधारणा व्यक्तय एव तद्बुद्धिनिमित्तम्, **(स)** व्यक्तीनां भेदरूपतया विशिष्टत्वात्, कर्कादिव्यक्तीना[म]पि गौर्गौरिति बुद्धिनिमित्तत्वापत्तेः। न च व्यक्तीनां भेदादि(वि?)शेषेऽपि या श्वेतगौर्गौरिति बुद्धिरुपजायमाना {ना} समुपलभ्यते ता(सा) एव तामुपजनयितुं प्रभवन्ति(ति)। यथा यास्वेव गुडूच्याद्यौषधिषु भेदाविशेषेऽपि ज्वरादिषु ज्वरादिशमनलक्षणं कार्यमुपलभ्यते ता एव तन्निमित्तं नान्या इति वक्तुम् [युक्तम्], साधारणनिमित्तव्यतिरेकेणापि देशकालादिनियतसाधारणप्रत्ययस्यापि तन्निमित्तमन्तरेणापि ताभ्यु(भ्य उ)त्पक्ति(त्ति)प्रसक्ते[न?] नास्य लक्षणस्यापि व्यवस्था स्यात्।

[५] तथा हि–परेणापि एवं वक्तुं शक्यम्। अभेदाविशेषेऽप्येकमेव-----------[त]दा भासनिबन्धनं भविष्यतीति किमत्र {च} रूपादेः स्वलक्षणपरिकल्पनया?

[६] अथ रूपरसाद्याभासज्ञानस्य तद्रूपस्थलक्षणमन्तरेणापि सम्भवः, अपरस्य अर्थक्रियानिबन्धनार्थव्यवस्थापकस्य ----------लक्षणो व्यवहार--------स्वलक्षणाकारज्ञानस्यैतन्निमित्तत्वेन तद्व्यवस्थापकत्वम्, एतत् सदृशाकारज्ञानेऽपि समानम्। न हि सामान्यमन्तरेण भिन्नानाम् एककार्यकर्तृत्वं सम्भवतीति तत्परिकल्प्यते, किन्तु समानाकारप्रत्ययो बाधितरूपतथाभूतविषयव्यतिरेकेण उपजायमानो मिथ्यारूपः प्राप्नोतीति विशेषप्रत्ययस्यैवाबाधितरस(रूप)स्य समानप्रत्ययस्यापि सामान्यमालम्बनभूतं निमित्तमभ्युपगन्तव्यम् इत्यस्ति वस्तुभूतं सामान्यम्, अन्यथा समानप्रतिभासायोगात्।

[७] **(शं)** एका(क)कार्यता[१]सादृश्येनैकत्वाध्यवसायादेकप्रतिभास इति **चेत्**, वाहदोहादिकार्यस्य प्रतिव्यक्तिभेदात् कथमभेदः कार्याणामिति?। तत्राप्यपरकार्यतासादृश्येन एकत्राध्यवसायेऽनवस्थाप्रसक्तेः एककार्यतया भावानान(म)प्रतीतेः कथमध्यवसायादेकप्रतिभासः येनैककार्यकारित्वमत् कारिपदार्थविवेको वा सामान्यं तद्व्यवहारनिबन्धनं स्यात्?

[८] एकसाधनतया अभेदोऽपि अत एव न सामान्यम्, वाहदोहादेरेकार्थत्वाभावेऽपि एकविज्ञानजनकत्वेन अभेदाध्यवसाये तद्विज्ञानस्यापि प्रतिव्यक्ति भिन्नत्वात्। एकाकारपरामर्शज्ञानजनकत्वेन भेदाध्यवसायेन तत्परामर्शस्यापि प्रतिव्यक्ति भिन्नत्वात्। अपरपरामर्शजनकत्वं(त्वे)न अभेदाध्यवसायेऽनवस्था।

[९] **अथ** एकाकारपरामर्शज्ञानस्य स्वत एवाभेदाध्यवसायरूपत्वाद् एकत्वमिति नानवस्था, तज्जनकानुभवानां त्वेकाकारपरामर्शज्ञानहेतुत्वाद् एकत्वमनुभवति(न्ति)। निमित्तव्यक्तीनां च तथाभूतानुभवजनकत्वेनोपचरितं तत्। **(स)** नन्वेवं व्यक्तीनामेव अव्यवहितैकाकारपरामर्शहेतुत्वं स(त्वम) वस्तुभूतं सामान्यप(म)भ्युपगन्तव्यं किं पारम्पर्यपरिश्रमेण? यथा हि सत्यासत्या व्यक्तिर्भिन्नानुभवा एकं परामर्शज्ञानं जनयति (तथैव) प्रतिनियता व्यक्तयः स्वगतसमानाकारार्पकत्वेन तज्जनयन्तीति [न] कश्चिद्विशेषः। यथा ह्यनुभवज्ञानं भिन्नमपि परामर्शज्ञानं प्रति नियतैकाकारतया विलक्षणम्, चिद्रूपतया तु समानं जनयदपि समानासमानजनकाकारद्वयाध्यासितम् अप्येकं तथा व्यक्तयोऽपि समानाकाराध्यवसायिप्रत्ययजनकं रूपद्वयं बिभ्राणा नैकरूपतया विरोत्स्यन्त इति स्थितम्।

[१०] विकल्प एक एवार्थिग्राही उपलक्ष्यते नापरं द्वयम्, यद्व्यापारानुसारिणः विकल्पस्याप्रामाण्यम् भवद्भिर्गृहीतग्राहितया प्रतिपाद्येत। विकल्पाविकल्पयोर्लघुवृत्तेः विकल्पव्यतिरेकेण अविकल्पस्यानुपलक्षणे अङ्गीक्रियमाणे वर्णयोरपि लघुवृत्तेरितरेतरव्यतिरेकेण अनुपलक्षणप्रसक्तिः। न च वर्णयोस्तथा लघुभूतप्रवृत्तेः अभावात् परस्परव्यतिरेकेण उपलक्षणसद्भावः। युगपज्ज्ञानानुपपत्तिवादिनोऽपि तस्यां व्यभिचाराभावप्रसक्तेः।

---

[१] एकाकारता इति भाव्यम्?

**[११]** नापि सादृश्याद् विकल्पाविकल्पयोः भेदेनानुपलक्षणम्, सन्तानेतरविषयत्वेन तयोरेकविषयत्वे कृतशा(सा)दृश्याभावात्। ज्ञानरूपतया सादृश्ये नीलनीलाकारज्ञानयोरपि ज्ञानात्मना सादृश्याद् भेदेनोपलक्षणं तन्नाविकल्पकज्ञानसद्भावः।

**[१२] अथ यदि** प्रथमाक्षसन्निपात एव सविकल्पकदर्शनं न उदयमासादयति तदग्राह्यस्तु अर्थात्मा, **तथा सति** अर्था(र्थ)ग्रहणाभाव एव प्रसक्तः। तथा हि–अर्थदर्शने सति तत्सन्निधाने दृष्टे तद्वाचके स्मृतिः। तत्स्मृतौ----[वाचके]नार्थं योजयति। ततो योजितं चार्थं विकल्पिका बुद्धि च(श्च?) व्य(रध्य)वस्यति। न च सविकल्पकप्रत्यक्षवादी अशब्दकमर्थं पश्यति। तद्दर्शनमन्तरेण च तद्वचनस्मृतिः। तामन्तरेण च परिष्कर्ता(र्तृ) अर्थदर्शनमिति अर्थदर्शनाभाव एव प्रसक्तः।

**[१३]** असदेतत्, यतो यदि अशब्दकम् अर्थं विकल्पेनावगच्छतीति अभ्युपगम्येत तदा स्यादयं दोषः। न चास्माभिः शब्दसंयोजितो ग्रहणं(ण)विकल्पोऽभ्युपगम्यते। किं तर्हि? निरंशक्षणिकपरमाणुप्रतिभासः। स्थिरस्थूररूपस्य स्तम्भादेर्ग्राह्यरूपतां बिभ्राणस्य प्रतिभासनात्। अ[र्थस्य?]---विकल्पकालेऽपि पुरो व्यवस्थितस्य गवादेः तथाभूतानुभवविषयत्वेन प्रतिभासनात्। यदि पुनः अभिलापसंस्पृष्टाध्यवसायी एव विकल्पोऽभ्युपगम्यते, तदा तदनुत्पत्तिरेव प्रसक्ता। तथा हि–यावत् पुरो व्यवस्थितं वस्तु नीलादित्वेन निश्चितं न तावत् सन्धानोपलब्धतद्वाचकस्मृत्यादिक्रमेण तत्परिष्कर्ता त्का(अ)र्थनिश्चयः, यावच्च न तन्निश्चयो न तावत्तद्वाचकस्मृत्यादि, क्षणक्षयादावि(वे)वानिश्चिते वाचकस्मृत्यादेरयोगात्। योगे वा शब्दानुभवानन्तरक्षणिक इति वाचकस्मृत्यादिक्रमेण तन्निश्चयोत्पत्तेः क्षणक्षयानुमानमपार्थकं स्यात्। अपि च तद्वाचकस्यापि स्मरणम् अपरतद्वाचकयोजनमन्तरेण, स्मरणमपि अपरतद्वाचकयोजनादिव्यतिरेकेण इत्यनवस्थानान्न क्वचिदपि निश्चयः स्यादिति। तस्मादभिलापसंसर्गयोग्यस्थिरसूरार्थप्रतिभाससञ्ज्ञानं प्रथमात्क(क्ष)सन्निपातोद्भवं सविकल्पकं तथाभूतार्थव्यवस्थापकम् अभ्युपगन्तव्यम्, अन्यथा सकलव्यवहारोच्छेदप्रसङ्गात्। साधारणासाधारणरूपे वस्तुनि प्रमाणप्रवृत्तिः, नासाधारणात्मनीति स्थितिमिति॥

**॥इति सामान्यसिद्धिवादः॥**

## ३१
## ॥शशविषाणादिदृष्टान्ते निषेधविचारः॥

ननु दृष्टान्ते किं शशो निषिद्ध्यते विषाणं वा तयोः संयोगो वा? नाद्यद्वयम्, स्वस्वस्थाने तयोर्द्वयोरपि विद्यमानत्वात्। नान्त्यो गवादिविषाणेनान्यतः समानीतेन संसर्गसम्भवात्। **(शं)** ना[स्मा]भिः शशशिरःसम्भूतविषाणसंयोगो निषिद्ध्यते, अप्रतीतस्यानिषेध्यत्वात् साध्यविकलो दृष्टान्तः, **सत्यम्,** अन्यत्र पशुमस्तकविषाणयोर्जन्यजनकभावः प्रतीतोऽत्र निषिध्यते। ततश्च प्रतिपन्नस्यैवारोप्य निषेधः। पक्षधर्मस्य सर्वत्रापूर्वस्यैव सिद्धेः।

**॥इति शशविषाणादिदृष्टान्ते निषेधविचारः॥**

******

## ३२
## ॥आकाशादीनां मूर्तत्वविचारः॥

सर्वैर्मूर्तैः सह संयोग आकाशादीनां सर्वगतत्वम्, न तु सर्वत्रगमनम्, तेषां निष्क्रियत्वादिति। **ननु** यत्राकाशदेशे परमाणुस्तत्र किमाकाशमस्ति वा न वा? यद्यस्ति तर्हि परमाणोः सावयवत्वम्। यदि नास्ति तदा स आकाशदेशो नष्टोऽनष्टो वा? नाशे तस्यानित्यत्वम्, अनाशे परमाणुमध्ये अवस्थानं वाच्यम्। अवस्थाने पूर्वदोषोऽनवस्थाने आकाशस्य अव्यापकत्वमिति, **नैवम्,** परमाणोर्निरवयवत्वेन मध्याद्यसम्भवात् तत्रावस्थानानवस्थानचिन्ताया निरुपपत्तिकत्वात्। [ननु] अणुपरिमाणतारतम्यं क्वचित् विश्रान्तं परिमाणतारतम्यत्वात् महत्परिमाणतारतम्यवत्। नाप्यौपचारिकः परि(पर?)माणुसिद्ध्यभावे मुख्याणुत्वसिद्धौ गौणप्रयोगानुपपत्तेरितरेतराश्रयप्रसङ्गात्, **नैवम्,** अणुपरिमाणतारतम्यस्य महत्परिमाणापकर्षतारतम्यार्थत्वात्, अणुशब्दस्य व्यवहारसिद्धत्वाच्च।

**॥इति आकाशादीनां मूर्तत्वविचारः॥**

********

## ३३
## ॥सामान्यविशेषविचारः॥

सामान्यादत्यन्तमभिन्ना विशेषा इति साङ्ख्याः। विशेषेभ्योऽत्यन्तमभिन्नं सामान्यमिति बौद्धाः। सामान्यादत्यन्तं भिन्ना विशेषा इति नैयायिकवैशेषिकाः। कथञ्चिद्भिन्नाभिन्नौ सामान्यविशेषौ इति जैनाः।

**॥इति सामान्यविशेषविचारः॥**

* * *
******

## ॥बौद्धानां सम्प्रदायचतुष्टये बाह्यार्थविचारः॥

**[१] अर्थो ज्ञानसमन्वितो मतिमतां वैभाषिकेणोच्यते, प्रत्यक्षो न हि बाह्यवस्तुविसरः सौत्रान्तिकैराश्रितः।**

**योगाचारमतानुगैरभिहिता साकारबुद्धिः परा, मन्यन्ते बत मध्यमाः कृतधियः स्वच्छां परं संविदम्॥**

[२] (व्याख्या) सौत्रान्तिकाद्यपेक्षया विरुद्धं भाषणं चतुःक्षणं वस्त्वादि, विभाषा ***गुरोश्च*** इति अ-प्रत्ययः सा प्रयोजकं प्रवर्तकं वैभाषिकध्वनिनिमित्तं यस्य स वैभाषिकः ***प्रयोजनम्*** इति ठञ्। प्रभाचन्द्रस्तु न्यायकुमुदचन्द्रे विभाषा तद्धर्मप्रतिपादको ग्रन्थविशेषस्तां विदन्त्यधीयते वा वैभाषिका इत्युवाच। वस्तुनः चतुःक्षणिकतां विना चक्षुरिन्द्रियसन्निकृष्टाद् अर्थादुत्पद्यमानस्य द्वितीयक्षणभाविनो ज्ञानस्य न प्राक्क्षणवर्तिरूपग्राहकत्वेन वर्तमानवस्तुग्राहकत्वं स्यात्।

[३] ***सूत्रण अवमोचने***ऽदन्तः। ततः सूत्र्यते निर्णीयते तत्त्वमनेनेति स्वरान्तत्वादलि सूत्रम्= आगमः, तस्यायं सूत्रोऽन्तः परिनिष्ठा। यदाहुः तद्वादिनः-प्रतिक्षणविशरारवो रूपरसगन्धस्पर्शपरमाणवो ज्ञानं चेत्येव तत्त्वमिति।ततः सौत्रश्चासावन्तश्च सौत्रान्तः, स विद्यते यस्य ***अतोऽनेकस्वराद्*** इति इकः। यद्वा सौत्रान्तः प्रयोजनं प्रवर्तकमस्येति ***प्रयोजने*** इति इकण्। वस्त्वाहितमात्मगमाकारं प्रत्यक्षं परिच्छिनत्तीति सौत्रान्तिकसिद्धान्तः। यतो वस्तुजन्यज्ञानगतग्राह्याकारलक्षणमेव वस्तुनो रूपं साक्षात्कर्तुं क्षमते।

[४] योजनं योगो ज्ञानाकारयोः सम्बन्धः तमाचरन्ति व्यवहरन्ति इति ***कर्मण्यणि*** इत्यण्, साकारज्ञानवादिन इत्यर्थः। योगः समाधिः साकारज्ञानमात्रैकागता तमाचरतीति पूर्ववदण्।

[५] मध्ये भवो मध्यमो ***मध्यान्ममण्वा*** इति विश्रान्तसूत्रान्मप्रत्ययः। पूर्वोत्तरक्षणासंस्पर्शी निराकारो ज्ञानगुणस्तमर्थनप्रवणा वादिनोऽपि मध्यमाः। माध्यमिकध्वनिस्त्वित्थं मध्यमेन क्षणेन चरन्ति चरत्यर्थे इकण्। यद्वा मध्यम आद्यपुरुषविशेषस्तस्य दर्शनं माध्यमं तत् प्रयोजनं येषां पूर्ववत् ठञ्।

[६] येऽपि तदारम्भकाः परमाणवो वैशिषिकाणां साक्षादक्षगोचरा वैभाषिकाणां मते स्वाकारसमर्पणप्रवणाः सौत्रान्तिकानां दर्शने तेऽपि योगाचाराणां मते न सम्भवन्ति। न खलु एकः परमाणुः प्रसिद्धिमध्यास्ते, तस्याधरोत्तरचतुर्दिक्षु परमाणुमध्यमध्यासीनस्य नियमेन षडंशतापत्तेः। यो ह्यस्य स्वभावः पूर्वपरमाणुप्रत्यासन्नो [स न?] घटते, तयोरेकदेशताप्राप्तेः। एवं हि स पूर्वपरमाणुसन्निहितस्वभावोऽपरपरमाणुं प्रत्यासीदेत् यदि सोऽपि तत्र स्यात्। असत्यामपि प्रत्यासत्तावाभिमुख्यमात्रेऽप्ययमेव वृत्तान्तः। ततः परमाणुमात्रं पिण्डः प्रचण्डः प्रसक्तः।

[७] अथवायं विचारः। नाप्यनेके परमाण्वंशाः, परमाणोरयोगात्। तथा हि–यद्यसौ सांशः स कथं परमाणुः? अथ निरंशः तदा संयुक्ताः परमाणवः सर्वात्मना संयोगात् परस्परमभिन्नदेशाः स्युरिति सर्वपिण्डः परमाणुमात्रं स्यात्। पवन्तोपक्षितिरपीति (पिण्डतोपक्षतिरिति)। तस्मादवश्यं तयोः

स्वभावयोर्भेदोऽभ्युपेतव्यः। यथा वानयोस्तवाधरोत्तरदक्षिणोत्तरपरमाणुप्रत्यासन्नानां भेद इति षडंशतैव परमाणोर्बलादापतति। यदाह-***षट्केन युगपदिति।*** न चैकसिद्ध्यभावे अनेकस्य सिद्धिरिति न सन्ति परमाणवः।

[८] **(शं)** यदि बाह्योऽर्थो नास्ति किंविषयस्तर्हि अयं प्रतिभासः? **(स)** प्रतिभासः खल्वेषोऽनादिवितथवासनातः प्रवर्तमानो निरालम्बन एव सम्भाव्यते। तथा हि-सति विषये सालम्बनता स्यात् तेन चावयविना भाविना भवितव्यं परमाणुप्रचयेन वा। स चायमुभयोऽप्यनन्तरोक्तबाधकप्रमाणग्रस्तविग्रहो न व्योमतामरसमतिशेते। यथा चोक्तम्-***प्रतिभासोऽयं निरालम्बः स्वप्नानुभवसन्निभः।*** स्वप्नज्ञानं तु निरालम्बनं विहितमेव। न च स्वप्नजाग्रदनुभवयोः कश्चिद्भेदोऽस्ति, सर्वप्रकारसाधर्म्यदर्शनात्। न चानालम्बनात् स्वप्नज्ञानाद् अनवाप्तरूपविशेषं विज्ञानमालम्बनसम्बन्धमनुभवितुमुत्सहते। यदनालम्बनाद् अविशिष्टं तदनालम्बनम्। यथैकस्मादाकाशके(दे)शदर्शिनो द्वितीयं तदालम्बनं ज्ञानम्। स्वप्नज्ञानादविशिष्टं च विवादाध्यासितं च जाग्रद्विज्ञानमिति स्वभावहेतुः।

[९] **(शं)** यदि बाह्योऽर्थो नास्ति किं तर्हि सत्? **(स)** ग्राह्यग्राहकादिकलङ्कानङ्कितं निःप्रपञ्चज्ञानमात्रं परमार्थसत् सत्। उक्तं च-***ग्राह्यग्राहकनिर्मुक्तं विज्ञानं परमार्थसद्।*** इति। साकारनिराकारज्ञानवादिनोर्योगाचार[सौत्रान्तिक]योर्दर्शने सामान्येनार्थाभाव उक्तः॥

**॥इति बौद्धानां सम्प्रदायचतुष्टये बाह्यार्थविचारः॥**

* * *
******

## ॥शब्दाम्बरगुणत्वनिर्लोठनस्थलम्॥

**[१]** ये केचन श्रोत्रेन्द्रियस्याप्राप्यकारित्वमभ्युपगच्छन्तः शब्दस्याम्बरगुणत्वं प्रतिपद्यन्ते तदयुक्तम्, आकाशगुणतायां शब्दस्यामूर्तत्वप्रसक्तेः, यो हि यद्गुणः स तत्समानधर्मो यथा ज्ञानमात्मनः। तथा हि–अमूर्त आत्मा ततस्तद्गुणो ज्ञानमप्यमूर्तमेव। एवं शब्दोऽपि यद्याकाशगुणस्तर्ह्याकाशस्यामूर्तत्वाच्छब्दस्यापि तद्गुणेनामूर्तता भवेत्। न चासौ युक्तिसङ्गता तल्लक्षणायोगात्। मूर्तिविरहो ह्यमूर्तताया लक्षणं विचक्षणैर्क्षूणमाक्षायते (रक्षुण्णमाचक्ष्यते)। न च शब्दे मूर्तिविरहः शुचिविचारभारसहः, स्पर्शवत्त्वात्। यदनुमानं निरुपमानं स्पर्शवतः शब्दास्तत्सम्पर्कदर्शनाल्लोष्टवत्। न चायमसिद्धो हेतुर्यतः सद्योजातबालकानां कर्णदेशाभ्यर्णीकृतगाढास्फालित-झल्लरीझात्कारश्रवणेन श्रवणस्फोटः स्फुटमेव प्रकटीभवद्विलोक्यते। न चेत्थमुपघातकारित्वमस्पर्शवत्त्वे सम्भवति, यथा विहायसः। ततो विपक्षे गमनाभावान्नानैकान्तिकोऽपि। अतश्च स्पर्शवन्तः शब्दास्तैरभिघाते गिरिगह्वरभित्त्यादिषु प्रतिशब्दोत्थानाल्लोष्टवत्। अयमपि हेतुरुभयस्यापि सिद्धः। तथा हि–श्रूयन्ते तीव्रप्रयत्नोच्चारितशब्दाभिघाते जाते सति गिरिगह्वरभित्यादिषु प्रविष्टाः प्रतिशब्दाः प्रतिदिग्। ततः स्पर्शवत्त्वात् मूर्ता एव शब्दाः। ***रूपस्पर्शादिसन्निवेशो मूर्तिः।*** इति वचनप्रामाण्यात्। ततः कथमिव शब्दानामाकाशगुणत्वम् उपपत्तिमत्?

**[२] अपि च** तदाकाशमेकमनेकं वा? यद्येकं तर्हि योजनलक्षादपि श्रूयते, आकाशस्यैकत्वेन शब्दस्य तद्गुणत्वेन दूरासन्नादिभेदाभावात्। अनेकमेवं सति वदनदेश एव स वेविद्यते इति कथं भिन्नदेशवर्तिभिः श्रूयते? वदनारविन्ददेशाकाशदूरतया तस्य श्रोतृगतश्रोत्रेन्द्रियाकाशसम्बन्धाभावात्। अथ च श्रोत्रेन्द्रियाकाशसम्बन्धितया तच्छ्रवणमङ्गीकरिष्यते, तन्नाकाशगुणत्वाभ्युपगमः श्रेयान्।

**[३] ननु** आकाशगुणत्वमन्तरेण शब्दस्यावस्थानमेव नोपपद्यते, अवश्यं हि पदार्थेन स्थितिमता भवितव्यं, तत्र रूपरसस्पर्शगन्धानां पृथिव्यादिभूतचतुष्टयमाश्रयः शब्दस्य त्वाकाशमिति, **तदयुक्तम्**, एवं सति पृथिव्यादीनामपि आकाशगुणत्वप्रसक्तेः। तेषामप्याकाशाश्रितत्वान्न खल्वाकाशमन्तरेण पृथिव्यादीनामप्यन्य आश्रयः।

**[४] (शं)** अगुणत्वात् पृथिव्यादीनामाकाशगुणत्वमनुपपन्नमिति **चेत्, न, (स)** आकाशाश्रितत्वेन भवन्नीत्या बलादपि तद्गुणत्वप्रसक्तेः। **अथ** नाश्रयणमात्रं तद्गुणत्वनिबन्धनं किन्तु समवायः, स चास्ति शब्दस्याकाशेन, न तु पृथिव्यादीनामिति। **(स)** ननु कोऽयं समवायो नाम ? **(शं)** एकत्र लोलीभावेनावस्था, यथा पृथिव्यादिषु रूपाद्या इति **चेत्**, न तर्हि शब्दस्याकाशगुणत्वमाकाशेन {काशेन न तु} पृथिव्यादीनामिति सहैकलोलिभावेन तस्याप्रतिपत्तेः। **अथ** आकाशे उपलभ्यमानत्वात्तद्गुणता शब्दस्य, **(स)** तर्ह्याकाशे उपलभ्यमानत्वात् तूलिकादिभिरपि तद्गुणत्वं प्राप्यते। **अथ** परमार्थतः पृथिव्यादिस्थानं रूपादीनामाकाशे तूपलम्भो [पृथिव्यादि]ना सञ्चार्यमाणत्वात्। **(स)** यद्येवं तर्हि शब्दस्यापि परमार्थतः स्थानं श्रोत्रादि

यत्पुनराकाशेऽवस्थानमुपलभ्यते तद्वायुना सञ्चार्यमाणत्वादवसेयम्। तथा हि–यतो यतो वायुः सञ्चरति ततः ततः शब्दोऽपि गच्छति वातप्रतिकूलं शब्दस्याश्रवणत्वात्। उक्तं च–

*यथा च प्रेर्यते तूलमाकाशे मातरिश्विना। तथा शब्दोऽपि वायोर्तत् प्रतीपं कोऽपि शब्दवित्।* ()

तन्नाकाशगुणः शब्दः, किन्तु पुद्गलमय इति स्थितम्॥

**॥इति शब्दाम्बरगुणत्वनिर्लोठनस्थलम्॥**

## ॥आख्यातार्थविचारः॥

[१] इह हि प्रथमं तावल्लक्षणे विचारस्तदुत्तरकालं प्रमाणे। यो हि लक्षणं न वेत्ति कथं तस्य तर्काधिकारः? सूत्रलक्षणमेव विचार्यते। लक्षणं चाख्यातम्, आख्यातं च क्रियाप्रधानम्, क्रिया च पचतीत्यादिरूपा। तत्र भवता पचतीत्यादि रूपं न शक्यते साधयितुम्। तथा हि– ***'दुपचष्(च्) पाके'*** इति धातुसूत्रानुबन्धयोः प्रयोजनं वक्तव्यम्। भवतु नाम किमपि प्रयोजनं दुर्बलं वादिनं दृष्ट्वाभ्युपगमवादाः प्रवर्तन्ते।

[२] किं चान्यदपि प्रेर्यते, यथा पचते(तेः?) परस्मैपदानामेकवचनं कस्मिन्नर्थे प्रवर्तते? **अथ** इत्थम् आचक्षीथाः– कर्तरि, **ननु** कर्तापि विचारणीयः सामान्यो विशिष्टो वा? तत्र विशिष्टे कर्तरि परस्मैपदं न केनापि सूत्रेण प्रतिपादितम्। सामान्येन परस्मैपदं तु दृश्यते यथा पचति देवदत्तः। तत्रापि पचति देवदत्तेनेति स्यात् कथं पचति देवदत्तः? यथा कृतपूर्वी कटं देवदत्त(त्तः) पुत्रीयति माणवकम् इत्यत्र विशेषकर्मद्योतिका द्वितीया प्रवर्तते तथात्रापि विशेषकर्तृत्वद्योतिका तृतीया प्रवर्तमाना दुर्निवारः(रा) स्यात्।

[३] किञ्च, क्रियाभावो धातु(तुः), क्रिया च साधना, यत्रासाधनं च प्रत्ययवाच्यम्, ततो न यावत् प्रत्यय (यः) समुत्पन्न(न्नः) तावद्धातुत्वम् [समुत्पद्यते], न यावद्धातुत्वं समुत्पन्नं न तावत्प्रत्ययः समुत्पद्यते। [इ]तीतरेतराश्रयलक्ष(दूष)णं व्यक्तं समापनीपद्यते।

[४] किञ्च, क्रिया च किं प्रत्यक्षेण गृह्यते अनुमानेन वा? तत्र प्रत्यक्षं पञ्चधा स्यसा(स्पर्श)नरसनघ्राणचक्षुःश्रोत्रेभ्यः समुत्पन्नम्। तत्र न तावत् स्पर्शनेन क्रिया गृह्यते। कथमिति चेत्, तस्यास्पर्शनरूपापत्तेः तूल्यादिवत्। न च क्रिया तूलीभवितुमर्हति। नापि रसनेन्द्रियेणोपादीयते, तस्या स्निग्धदुग्धादिरूपापत्तेः, न च दुग्धादिक्रिया घटाकोटिसण्टङ्कम् आटीकते। न च घ्राणेन्द्रियेण [त]स्या गन्धरूपप्राप्तेः, मृगमदघनसारादिवत्, न च मृगमदादिरूपता युक्ता। न च चक्षुषा गृह्यते, तस्याः चित्राङ्गनादिस्वरूपापत्तेः,न च चित्रादिरूपता समीचीना। न च श्रवणाभ्यामभ्युपगम्यते, तस्या वेणुवंशरवरूपापत्तेः,न च वेण्वादिरवक्रिया(रूपता) [युक्ता] सर्वेष्वपि इन्द्रियादिषु अर्थेषु क्रियानुभवाभावात्। नाप्यनुमाने[न, तद्धि] लिङ्गलिङ्गिनोरविनाभावनिश्चये प्रवर्तते, यथा धूमाद्यनुमानम्, न च क्रियायां धूमवल्लिङ्गमुत्पश्यामः, तस्यामूर्तत्वात्कथं गृह्यते क्रिया? इति।

[५] तत्र यदुक्तमनुबन्धयोः किं प्रयोजनममुत्र धातौ? तत्र तावदुच्यते– दुकारोद्वनुबन्धात्रिमक्तेन3ब निवर्त इति विशेषणार्थः। तेन पक्षममिति सिद्धं षकारोऽपि स्वानुबन्धभिदादिभ्यश्चेत्यत्र विशेषप्रयोजनार्थः, तेन एवेति सिद्धम्।

[६] यदप्युक्तं विशिष्टकर्तृत्वद्योतिका तृतीया प्राप्नोति तदपि न युक्तम्, समानाधिकरणेऽस्य न्यायस्य वैयाकरणैरनभ्युपगमात्। यथाकृतकटे विशेषं(ष)कर्तृत्वद्योतिका द्वितीया न प्रवर्तते तथा विशेषकर्तृत्वद्योतिका तृतीयात्रापि [न] प्राप्नोति।

[७] यदप्युक्तं क्रियाभावो धातुः, क्रिया च साधना यत्रेत्यादि तदपि न युक्तमवभासते, पचति धावतीत्यादिष्वयोद्वारद्वारेण क्रियाया अङ्गीकरणात्।

[८] यदप्युक्तं पञ्चावयवेन प्रत्यक्षेणानुमानेन न च गृह्यते। तदप्यनुपपन्नम्, तस्य अनुमानेन ग्रहणात्। तथा चोक्तम्–

*नित्यं क्रियानुमेया{नुमेया} द्रव्यविकारेण भवति धात्वर्थः।*
*कारकसाध्या द्वेधा सकर्मिकाकर्मिका वेति॥छ॥*

॥इति आख्यातार्थविचारः॥

## ॥शब्दार्थसम्बन्धसाधनम्॥

[१] यद्येन अप्रतिबद्धस्वभावं न तत्तस्य गमकम्, यथा रजोराज्यादिपदार्थ(र्थः) धूमध्वजस्य। अप्रतिबद्धस्वभावश्च शब्दोऽर्थेन। न चायमसिद्धो हेतुः। तथा हि–असौ सम्बन्धो भवन् तादात्म्यलक्षणः, तदुत्पत्तिलक्षणः, समवायलक्षणः, आधाराधेयलक्षणः, वाच्यवाचकलक्षणो वेति विकल्पाः। तत्र न तावत् तादात्म्यलक्षणः, यतस्तादात्म्ये हि शब्दार्थयोः शब्दो वा स्यादर्थो वा न द्वयम्, तथा शब्दार्थयोस्तादात्म्ये क्षुरिकामोदकादिशब्दोच्चारणे मुखपाटनप्रसङ्गः, न च दृश्यते। नापि तदुत्पत्तिलक्षणः, यतः किं शब्दादर्थोत्पत्तिरर्थाद्वा शब्दोत्पत्तिः? यदि शब्दादर्थोत्पत्तिस्तदा विश्वमदचिह्नं स्यात्। हिरण्यादिशब्दसमुच्चारणादेव तदुत्पत्तेः। नाप्यर्थाच्छब्दोत्पत्तिः ताल्वादिकारणकलापात् तदुत्पत्तिदर्शनात्। नाप्याधारधेयलक्षणः, तस्यापि [अ]घटनात्। यदि(तद्धि) सत्त्वाधारस्थितिकारणाद् अविनाशकारणाद्वा? यदि स्थितिकारणात् तदा सा स्थितिस्ततः स्थाप्याद् अभिन्ना क्रियते भिन्ना वा? यद्यभिन्ना तदा स्थाप्यमेव कृतम्, तच्च स्वकारणकलापादेव सिद्धं किं तत्राधारेण क्रियेत? अथ भिन्ना तदाधेयस्य न किञ्चित् कृतं स्यात्।

[२] अथ तत्सम्बन्धिनी स्थितिर्जन्यते, ननु तत्सम्बन्धो जन्यजनकलक्षणः आधाराधेयलक्षणो वा? तत्र यदि जन्यजनकलक्षणः तदा आधारेण भिन्ना स्थितिर्जन्यते आधेयस्य किमायातम्? अथाधाराधेयलक्षणे तर्हि स आधारः किं स्थितिकारणादविनाशकारणाद्वेति पुनस्तदेवावर्तते। नाप्यविनाशकारणात्, अविनाशो हि विनश्वरस्वभावानां भावानामविनश्वरस्वभावानां वा? न तावदविनश्वरस्वभावानाम्, यतो येऽविनश्वरस्वभावाः तेषाम् अविनश्वरत्वं स्वकारणकलापादेव सिद्धं किं तत्राधारेण क्रियते? विनश्वरस्वभावाते(त्ते)षाम् अविनश्वरतायाः पुरन्दरशतैरपि कर्तुं न शक्यत्वात्। अपि नाम भावाः स्वयं न भवेयुः। न पुनः स्वं स्वभावं परित्यज्य स्वभावान्तरं स्वीकुर्युः।

[३] नापि समवायलक्षणः, तस्य विद्यमानत्वात्। तथा हि–समवायोऽपृथग्भूतानां भावानामुपवर्ण्यते। सा चापृथक्सिद्धिः किं देशैकत्वं कालैकत्वं स्वरूपैकत्वं चेति विकल्पाः। न तावद्देशैकत्वम्, यतः पटस्य देशः तन्तवः तन्तूनां स्वांस्थाः, अतः कथं देशैकत्वम्? अथैकाकाशादेशावस्थिततत्वाद् एकदेशत्वमुच्यते तदा सर्वपदार्थानाम् एकाकाशदेशावस्थिततत्वात् एकत्वापत्तिः। नापि कालैकत्वं तन्तुकाले पटस्याविद्यमानत्वात्, नापि स्वभावैकत्वम्, यतः स्वभावैकत्वे एकमेव वस्तु स्यान्न कश्चित्समवायः। नापि वाच्यवाचकभावः, यतो वाच्यं किमर्थस्य लक्षणम् अर्थसामान्यं वा द्वयी गतिः। न तावत्स्वलक्षणम्, यतस्तस्य प्रथमक्षणे निरीक्षणं द्वितीये तदध्यवसायः तृतीये यावच्छब्देन वक्तुमारभ्यते तावत्तस्य क्षणक्षयित्वेन विनष्टत्वात् कथं चान्यरूपता?

[४] नापि सामान्यम्, तस्याविद्यमानत्वात्।[१] तथा हि–यत्प्रमाणगोचरचारितां न चरति न तत्सद्व्यवहृतिपथम् अवतरति। [अवतरति] च प्रमाणगोचरचारितां सामान्यम्। न चायमसिद्धो हेतुः। तथा हि–तत्सामान्यं प्रत्यक्षप्रमाणपरिच्छेद्यं वा स्यादनुमानसंवेद्यं वा? न तावदाद्यपक्षः यत्प्रत्यक्षस्य पुरोवर्तिव्यक्तिजन्यता, सामान्यस्य च सकलत्रैलोक्योदरविवरवर्तिव्यक्तिव्यापिस्वरूपता। तथाभूतस्य प्रत्यक्षेण कथमीक्षणम्? व्यक्तिशून्य एव वा देशे प्रागप्यासीत् तदीयक्षणे वा सर्वस्य सर्वज्ञतापत्तिः।

[५] तथा तत्सामान्यं व्यक्तिभ्यो भिन्नमभिन्नं वा? यदाभिन्नं तदा किं तासु व्यक्तिषु उत्पद्यमानासूत्पद्यते व्यक्त्यन्तराद्वा गच्छति? व्यक्तिशून्य एव वा देशे प्रागप्यासीत्। तथा व्यक्तिनाशे किं तद्विनश्यति? व्यक्त्यन्तरे वा याति। तच्छून्य एव वा देशे च तिष्ठति। तथा चोक्तम्–

***व्यक्तिजन्मन्यजाता चेदागता नाव्ययान्तरात्। तच्छून्यं न स्थिता देशे सा तयासङ्गता कथम्?॥***

***व्यक्तिनाशेन चेन्नष्टा गता व्यक्त्यन्तरं न च। तच्छून्येन स्थिता देशे सा जातिः क्वेति कथ्यताम्?॥***

[६] यदि व्यक्त्या सह जन्मेष्यते तदा नित्यत्वाभ्युपगमक्षतिः। द्वितीयपक्षे तु सक्रियत्वेन निष्क्रियत्वाभ्युपमो विरुद्ध्यते। तृतीयपक्षस्तु सदैव व्यक्त्याधारत्वाभ्युपगमान्न सम्भवति।

तथा नाम विकल्पा अपि अनेनैव युक्तिकलापेन निरस्तावतारा द्रष्टव्याः।

[७] अथ भिन्नं तदा भिन्नं सामान्यम् अनुगताकारं वा स्यात् व्यावृत्ताकारं वा? यदि व्यावृत्ताकारं तदा व्यक्तिरूपस्यैव व्यावृत्तत्वाद् व्यक्तिस्वभावतैव तस्य न सामान्यरूपता। अथानुगताकारं तदा सोऽनुगमः स्वरूपे पररूपे वा? न तावत्स्वरूपे, तत्रानुगमाभावात्। न हि सुशिक्षितोऽपि बटुः स्वं स्कन्धमारोढुं समर्थः। नापि पररूपे, यतः पररूपानुगमः किं तादात्म्यं तत्समवायो वा? न तादात्म्यम्, व्यतिरेकाङ्गीकारात्। नापि समवायः, सामान्यस्य समवायाद् अत्यन्तव्यतिरिक्तत्वेन अभ्युपगमात्।

[८] **अथ** प्रमाणान्तरं सामान्यसाधकं विद्यते। ततो वा स्वरूपता भविष्यति। तथा हि–यदबाधितबोधगोचरचारि तत्समस्तं समस्ति, यथा स्तम्भेभकुम्भादिकदम्बकम्। अबाधितबोधगोचरचारि सामान्यमित्यस्य सामान्यसाधकस्य हेतोर्विद्यमानत्वात् कथं नास्ति सामान्यम्? **इदमप्ययुक्तम्**, अस्य हेतोर्वृत्ता(व्यक्त्या)दिक विकल्पैर्बाध्यमानत्वात्। तथा हि–तत्सामान्यं तासु व्यक्तिषु एकदेशेन वा वर्तते सामस्त्येन वा? एकदेशेनापि किं येनैवांशेनैकस्यां व्यक्तौ वर्तते तेनैव द्वितीयस्यामपि अंशान्तरेण वा? यदि तेनैव तदा प्रकाशेन सर्वव्यक्तीनां व्याप्तत्वात् पिण्डरूपता। अथांशान्तरेण तदा खण्डीभूतत्वात् सामान्यस्य न्निःसामान्यत्वापत्तिः। अथ सामस्त्येन तदा एकस्यामेव व्यक्तौ परिनिष्ठितत्वात् व्यक्त्यन्तराणि सामान्यशून्यानि प्राप्नुवन्ति।

[९] तथा तत्सामान्यम् असमानरूपासु व्यक्तिषु वर्तते समानरूपासु? [यद्यसमानरूपासु] तदा महिष्यादिष्वपि वर्तेत विशेषाभावात्। अथ समानरूपासु तदा किमासां समानरूपता स्वरूपेण सामान्येन

---

[१] सामान्यनिरसनमिदमत्रासम्बद्धमिव प्रतिभाति।तत्त्वं तु बहुश्रुता विदन्ति।

वा? यदि स्वरूपेण तदा सामान्येन किं कर्तव्यम्? अथ सामान्येन क्रियते किं तेनैव सामान्यान्तरेण वा? यदि तेनैव तदा स्फुट एवेतरेतराश्रयदोषः। अथ सामान्यान्तरेण तदा तदपि तासु समानरूपासु असमानरूपासु वेत्याद्यावर्तनयानवस्था गच्छतीति तद्भयात् तावत्समानरूपता स्वरूपेणाभ्युपगन्तव्याः। तस्यां स्वरूपसिद्धायां सामान्येन किं कर्तव्यमिति प्रतिबन्धासिद्धेर्नासिद्धत्वम्।

[१०] नाप्यनैकान्तिकत्वम्, यतो यदि प्रतिबन्धमन्तरेणापि गमकत्वं भवेत्तदा स्यादनैकान्तिकत्वं तच्च नातिप्रसङ्गात्। तथा हि–प्रतिबन्धमन्तरेणापि गमकत्वे यत्किञ्चिद् यतःकुतश्चिद्गम्येत। न चैवं तस्मान्नानैकान्तिकत्वम्। नापि विरुद्धत्वम्, सपक्ष एव भावात्॥

**॥इति शब्दार्थसम्बन्धसाधनम्॥**

## ॥तुल्याधिकरणसमासविचारः॥

**[१]** इह हि बहलजलमजालकलुषितमतयो वैयाकरणा नीलोत्पलमित्यत्र तुल्याधिकरणतामावेदयन्ति। तदसङ्गतमिति विचारयामः। तथा हि–तुल्याधिकरणसमासो हि विशेषणविशेष्यसद्भावे सति भवति, न चात्रोभयोः सद्भावः, यतो नीलोत्पलमित्युक्ते पञ्च वस्तूनि प्रतीयन्ते। तद्यथा–नीलत्वं गुणसामान्यम्, नीलो गुणः, तदाधारो द्रव्यमिति त्रीणि, उत्पलत्वं जातिः, तदाधारो द्रव्यमिति द्वे। तत्र नीलजात्युत्पलजात्योः नास्ति विशेषणविशेष्यभावः, निर्गुणत्वात्। गुणकर्मविशेषसामान्यानां निर्गुणत्वनिष्क्रियत्वे इति।

**[२] न चे**हास्तितुल्याधिकरणत्वम्। तथा हि–नीलत्वं नीलगुणे समवेतमुत्पलत्वं चोत्पलद्रव्य इति उत्पलजातेः नीलगुणस्य चास्ति तुल्याधिकरणत्वम्, एकद्रव्ये समवायात्। विशेषणविशेष्यभावस्तु नोपपद्यते, जातेरनीलत्वात्। गुणद्रव्ययोस्तु सम्भवति विशेषणविशेष्यभावः, द्रव्यस्यानेकगुणत्वात् इति समानं तु तयोस्तृतीयमपरमधिकरणं न विद्यते, द्रव्येषु गुणस्य समवायात्। नीलद्रव्योत्पलद्रव्ययोरपि न विशेषणविशेष्यभावो नापि तुल्याधिकरणत्वम्, इतरेतरासम्बन्धाद् इति, **अत्रोच्यते**, जातिगुणयोः उत्पलनीलगुणयोः एकस्मिन्नर्थेऽवयविनि तुल्यद्रव्ये समवेतयोः जातिगुणयुक्तद्रव्याभिधायि नीलोत्पलमिति वृत्तिः। तस्माद् गुणद्रव्ययोः विशेषणविशेष्यभावो जातिगुणयोरेकाधिकरणत्वात् तद्वाचिनोः पदयोः तुल्याधिकरणत्वम्। उभयोर्जातिगुणोपसर्जने द्रव्ये प्रवृत्तत्वात्। अथवा किमनेन प्रयासेन? शब्दप्रमाणका हि वैयाकरणा इति स्थितम्॥

॥इति तुल्याधिकरणसमासविचारः॥

## ॥कार्यकारणभावसम्बन्धसिद्धिः॥

[१] यद् युक्तिप्रमाणाधीनसत्ताकं न तत् प्रेक्षावतां व्यवहारावतापि(वत्, यथा) व्योमारविन्दम्। युक्तिप्रमाणाधीनसत्ताकश्च कार्यकारणभावलक्षणः प्रतिबन्धः। न चायमसिद्धो हेतुः। तथा हि–असौ कार्यकारणभावलक्षणः प्रतिबन्धस्ताभ्यां भिन्नस्वभावो वा---[अभिन्नस्वभावो वा?]। भिन्नस्वभावोऽपि तयोः कार्यकारणयोः क्षणिकरूपयोर्बाधतो वा क्षणिकरूपयोर्वा? क्षणिकरूपयोरपि प्रतिपन्नकार्यकारणरूपयोर्वा यद्वास्यभावेनैव कार्यकारणरूपयोर्वा?

[२] तत्र यद्याद्यः पक्षः तदा सर्वत्रैवाकार्यकारणरूपेषु स्तम्भकुम्भाम्भोरुहादिषु पदार्थेषु भवेत् तन्नियमकारणाभावात्। तथानेन भिन्नेन भिन्नस्वस्वभावेन सम्बन्धितानयोः पूर्वरूपापनोदो वा विधीयेतापूर्वरूपसमुत्पादो वा? इति विकल्प्यते। न तावदाद्यः पक्षः ज्यायान्, विनाशकारणानाम् अकिञ्चित्करत्वेन विनाशस्याभावात्। तथा हि–असौ विनाशो विनश्वरस्वभावानां भावानां अभ्युपगम्येत अविनश्वरस्वभावानामिति द्वयी गतिः, गत्यन्तराभावात्। यदि विनश्वरस्वभावानां भावानां {भावनां} तर्हि तेषां स्वहेतुसन्देहादेवोत्पन्नत्वात् किं तत्र हेतुभिः कार्यम् ? अथाविनश्वरस्वभावानां भावनाम्, इदमप्यसुन्दरम्, यतो ये भावाः स्वहेतोरेवाविनश्वरस्वभावा समुत्पन्नास्ते पुरन्दरशतैरपि नान्यथा कर्तुं शक्यन्ते किमङ्गपुनर्व्यक्ति(ति)रिक्तसम्बन्धमात्रेण?

[३] नापि तेन सम्बन्धेनापूर्वरूपसमुत्पादः, तस्यापूर्वरूपस्य ताभ्यां भिन्नहेतुकत्वाद् अर्थान्तरत्वप्रसङ्गः। न हि निष्पन्नेभ्यो निष्पन्नो भिन्नहेतुको वा तत्स्वभावो युक्तः, यतः–अयमेव हि भेदो भेदहेतुर्वा विरुद्धधर्माध्यासः कारणभेदश्च। तत्(त)श्चेन्न भेदः विश्वमेकं द्रव्यं स्यात्। ततश्च सहोत्पादविनाशौ स्याताम्। ततश्चार्थान्तरस्योत्पादात् कार्यकारणरूपे वस्तुनी तदवस्थे एव न तयोरन्ययोगेऽपि कार्यकारणरूपतापत्तिः।

[४] अथ द्वितीयपक्षः तदा स्वभाव एव तयोः, कार्यकारणरूपत्वात् कथं व्यतिरिक्तः सम्बन्धो वैयर्थ्यं नानुभवेत्? तथासौ सम्बन्धः ताभ्यां कार्यकारणाभ्यां सहिताभ्यां जन्यतेऽसहिताभ्यामिति भागीरथीविपुलपुलिनावतरच्चक्रवाकयुगलमिव विकल्पद्वयम् अमलमवतारमारचयति। तत्र यद्याद्यः पक्षः कक्षीक्रियते तदासावनुपपन्नः, कार्यकारणयोः क्षणिकत्वेन चिरविनष्टत्वात् कथं कार्यकारणबुद्धिस्तन्निबन्धना स्यात्? नापि प्रत्येकजन्यः, यतोऽसौ कारणत्वेन जन्यमानः सम्बन्ध एवेति कार्यसम्बन्धितास्य हीयेत।

[५] अथ स्वकार्यात् पूर्वं कारणेन कार्यकरणलक्षणः सम्बन्धो जन्ये(न्यते) अथ स्वकार्यमुत्पाद्य पश्चादसौ सम्बन्धोऽनेन जन्यते? तदापि स्वकार्यकाल एव विनष्टत्वात् तदुत्तरकालभाविकार्यकारणभाव एव

सम्बन्धजननं कुतः स्याद्? इति कथं कार्यकारणयोर[स]हभावित्वात् सम्बन्धस्य द्विष्ठता? नाप्यक्षणिकरूपयोः कार्यकारणयोः प्रागप्रतिपन्नतदाधारयोः पश्चादपि सम्बन्धाधारता युक्तिमती, अविचलितस्वरूपत्वात्।

[६] किञ्च, असौ सम्बन्धो वस्तुरूपो वा [अवस्तुरूपो वा?] वस्व(स्तु)रूपोऽपि प्रत्यक्षप्रमाणपरिच्छेद्यो वा स्यादनुमानसंवित्संवेद्यो वा? न तावत्प्रत्यक्षं ताभ्यां कार्यकारणाभ्यां विभिन्नस्वभावं सम्बन्धं गृह्णद् निश्चीयते। नाप्यनुमानेन सम्बन्धो निर्णीयते, यतोऽनुमानं लिङ्गबलेनोदयमासादयति, न च सम्बन्धस्य किञ्चिल्लिङ्गमवलोक्यते, भवद्वा(तु वा) लिङ्गं तत्सम्बन्धस्य तथापि तयोः सम्बन्धः केन प्रमाणेनावसीयते प्रत्यक्षेणानुमानेन वा? न तावत् प्रत्यक्षेण कार्यकारणलक्षणसम्बन्धनिश्चयः, यतः-

*द्विष्ठसम्बन्धसम्बन्धिनि(संवित्ति)र्नैकरूपप्रवेदनात्।*

[७] अनुमानेनापि लिङ्गसम्बन्धयोः सम्बन्धनिश्चयः किं तेनैवानुमानेन अनुमानान्तरेण वेति विकल्पद्वयम्। यदि तेनैवानुमानेन तदा स्फुट एवेतरेतराश्रयलक्षणो दोषो भवन्तमनुबध्नाति। तथा हि– यावदनुमानं न प्रवृत्तं न तावत्सम्बन्धावधारणं यावत्सम्बन्धो नावधारितो न तावदनुमानप्रवृत्तिः। अनुमानान्तरेण चेद् अनवस्थाप्रसङ्गः तथा हि–अनुमानं लिङ्गग्रहणपुरस्सरमेव प्रवर्तते। तस्यापि लिङ्गस्य अनुमानान्तरेण सम्बन्धो निर्णेयः, तदपि लिङ्गनिर्णयपूर्वकमभिधानीयम्, त(इ)त्यावर्तमा[ना]नवस्था धावंतां(न्ती)निर्लज्जकुट्टिनीवद् दुर्निवारा स्यात्।

[८] अथावस्तुरूपं तर्ह्याकाशकुशेशयवत् प्रमाणाविषयत्वाद् अविद्यमान एव। अथाभिन्नस्वभावो साध्यते कथं कार्यकारणाभ्यामेव कार्यकारणबुद्धिर्भवति इति सुगतमतानुसारिभिरभिधीयमानमिदं वचो भवतः परुषं न {म}भाति ? इति न कश्चित्ताभ्यां व्यतिरिक्तसम्बन्धोऽस्तीति स्थितम्॥

**॥इति कार्यकारणभावसम्बन्धसिद्धिः॥**

षष्ठः खण्डः

# जैनवादः

सिताम्बराचार्यहरिभद्रेण कृतम्

# ॥वेदबाह्यतानिराकरणम्॥

[१] इह केचित्सदनुष्ठानवतोऽपि जैनान् प्रति महामोहदोषेण वेदबाह्या एव इत्यदोषमेव दोषमभिदधति। तन्मोहापनोदाय इदमभिधीयते। अथ के एते ते वेदा नाम यद्बाह्या जैना इति? किं विधायकादीनि वाक्यानि वेदा उताहो तत्समुत्थं ज्ञानम्, अथ सदनुष्ठानम्, आहोश्विद्विग्रहवन्तो देवताविशेषा इति? बाह्यमपि किं तेभ्योऽर्थान्तरमेव उताहो तदध्ययनज्ञानशून्यता, आहोश्वित् तदनधिकारत्वम्, अथवा तदनङ्गतेति? किं चातः? सर्वथापि दोषः। तथा हि–यदि विधायकानि वाक्यान्येव वेदास्तेभ्योऽर्थान्तरत्वमेव च तद्बाह्यत्वम्। ततस्तेषामकारादिसमुदायात्मकत्वेन शब्दरूपत्वम्, ततो भवतोऽपि जीवशरीरात्मकत्वेन तेभ्योऽर्थान्तरत्वाद्वेदबाह्यतापत्तिः इत्यनर्थको मां प्रत्यभिनिवेशः। **अथ** तत्समुत्थं ज्ञानमेव वेदाः, बाह्यत्वमपि तदध्ययनज्ञानशून्यतेति, **एतदप्ययुक्तम्,** विकल्पानुपपत्तेः। तथा हि–किमशेषविधायकादिवाक्यसमुत्थं ज्ञानं वेदा उत कतिपयवाक्यसमुत्थमपि? आद्ये पक्षे भवतोऽपि वेदबाह्यतापत्तिः, अशेषविधायकादिवाक्यसमुत्थज्ञानशून्यत्वात्। तदध्ययनानुपपत्तेश्च कतिपयवाक्यसमुत्थपक्षस्याप्यव्यापकत्वं तद्विकलत्वेन अग्रहारिकादीनामपि तद्बाह्यत्वप्रसङ्गात्।

[२] **अथ** सदनुष्टानं वेदाः, तदनधिकारित्वं च तद्बाह्यतेति, **(स)** अथ किमिदं सदनुष्ठानम्? अग्निहोत्रादि चेत्, न तस्याविद्यान्तर्गततत्वेन निन्दाश्रयणात्।

***अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।*** तथा

***इष्टापूर्त्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो येऽभिनन्दन्ति मूढाः। नाकस्य पृष्ठे ते सुकृतेन भूत्वा इमं लोकं हीनतरं वा विशन्ति॥*** इति श्रुतिप्रामाण्यात्। तथा अग्निहोत्रादिका च हिंसा तत्कथं जैनास्तदधिकारिणः स्युर्व्रतोपेतत्वात्। ***हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम्*** इति(तत्त्वार्थसूत्र ७.१) वचनात्। **अथ** तेषां तदनुपालयतामपि अब्राह्मणत्वात्प्रेत्यफलं न भवतीति **चेत्,** न, प्रमाणाभावात्। हविः पूर्णलक्षणादिक्रियाफलस्याविशेषेण दर्शनादिति। **अथ** विग्रहवन्तो देवताविशेषा वेदाः, बाह्यतापि तदनङ्गतेति, **(स)** एतदपि अलौकिकमावयोस्तुल्यमेव, तथोपलब्धेः। तथापि तत्कल्पनेऽतिप्रसङ्ग इति यत्किञ्चिदेतत्।

[३] **अथ** विधायकादीनि वाक्यान्येव वेदाः, बाह्यत्वं च तेष्वनभिधानमिति, **एतदप्ययुक्तम्**, जैनानां तेष्वभिधानासिद्धेः। सर्ववाक्यानामप्रत्यक्षत्वात्। श्रुतीनां स्मृतीनां चापरिमितकल्पशास्त्रत्वाद् दुर्विज्ञानत्वाच्च। तद्यथा-एकशतमध्वर्युः, शाखासहस्रवर्त्मा सामवेदः, एकविंशति वाड्हव्यम्(तिधा ऋक्) नवधाथर्वणो वेद इति। ततो यस्य सहस्रोपगानां श्रुतिशाखानामध्ययनमर्थज्ञानं च विद्यते तस्यैवैवं वक्तुं युज्यते। जैनानां तेष्वनभिधानमिति। न पुनर्भवादृशस्योल्कापिशाचस्येति। किं चाभिधानमप्यस्ति,

तद्विहितानुष्ठानार्थाभिधानात्। उक्तं च–*नित्यमहिंस्रो भवेत्। नानृतं वदेत्। परस्वं न हरेत्। ब्रह्मचर्यं चरेत्।* स्नानाभ्यञ्जनोद्वर्तनानुलेपनास्फोटनवलनक्तपावतरणहास्यजल्पनृत्यगीतवाद्यमाल्यधारणादिप्रतिषेधश्च कदाचिद् कस्यचिद् ब्राह्मणस्य विहितः। तथा निःपरिग्रहता च श्रूयते-

*न कर्मणा न प्रव्रज्यया न धनेनैकेनामृतत्वमासुः(पुः)।* इति

[४] इदमेव च जैनानां विहितानुष्ठानम् इत्यसिद्धो हेतुः। एतेन या वेदबाह्याः श्रुतयो–*याश्च काश्चन कुदृष्टयस्ताः सर्वा निष्फलाः प्रेत्यतमानिष्टाहिता मता* इत्येतदप्यत्रानास्पदमेव वेदितव्यमुक्तवद्युक्तिविरहेण वेदबाह्यत्वानुपपत्तेः।

**॥इति वेदबाह्यतानिराकरणं कृतं श्रीसिताम्बराचार्यहरिभद्रेण॥**

## ॥गणधरवादः॥

[१] श्री गौतमस्वाम्यादीनामेकादशानां गणधराणां प्रत्येकं संशया वक्ष्यन्ते।
तत्र एकस्य जीवे संशयः किमस्ति नास्तीति?।१।

[२] तथापरस्य कर्मणि ज्ञानावरणीयादिलक्षणं कर्म किमस्ति नास्तीति?।२।

[३] अपरस्य ***तज्जीवं***ति किं तदेव शरीरं स एव जीव उतान्य इति?, न जीवसत्तायामिति॥३॥

[४] तथा ***भूते***ति अपरस्य भूतेषु संशयः, पृथिव्यादीनि भूतानि सन्ति नेति वा ?॥४॥

[५] अपरस्य ***तारिसय त्ति,*** किं यो यादृश इह भवे तादृश एवान्यस्मिन्नपि उत नेति॥५॥

[६] ***बन्धमोक्षे***ष्विति अपरस्य तु किं बन्धमोक्षौ स्त उत नेति। आह-कर्मसंशयादस्य को विशेष:? इत्युच्यते, स कर्मसत्तागोचरः, अयं तु तदस्तित्वे सत्यपि जीवकर्मसंयोगविभागगोचर इति॥६॥

[७] तथा परस्य देवाः किं सन्ति नेति वा?॥७॥

[८] अपरस्य तु नारकाश्च संशयगोचरः। किं ते सन्ति नेति वा॥८॥

[९] तथापरस्य पुण्ये संशयः। कर्मणि सत्यपि किं पुण्यमेव प्रकर्षप्राप्तं प्रकृष्टसुखहेतुस्तदेव वापचीयमानम् अत्यन्तस्वल्पावस्थदुःखस्य उत तदतिरिक्तं पापमस्त्याहोस्विदकेमेवोभयरूपमुत स्वतन्त्रमुभयमिति॥९॥

[१०] अपरस्य परलोके संशयः सत्यप्यात्मनि परलोको भवान्तरलक्षणं किमस्ति नास्तीति?॥१०॥

[११] अपरस्य तु निर्वाणे संशयः,निर्वाणं किमस्ति नास्तीति वा? आह-बन्धमोक्षसंशयादस्य को विशेषः? उच्यते–स हि उभयगोचरः अयं तु केवलविषय एव। तथा किं संसाराभावमात्र एवासौ मोक्ष इति?॥११॥

[१२] तत्र गौतमः प्राह-प्रत्यक्षेण तावज्जीवो न गृह्यते। यतः ***सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्।***(मी.सू.१.१.४) न चास्येन्द्रियसम्प्रयोगोऽस्ति। नाप्यनुमानगोचरः यतः प्रत्यक्षपुरःसरं पूर्वोपलब्धिलिङ्गलिङ्गिसम्बन्धस्मृतिमुखेन तत्प्रवर्तते गृहीताविनाभावस्य धूमानलज्ञानवत्। न चेह तल्लिङ्गाविनाभावग्रहः, तस्य अप्रत्यक्षत्वात्। नापि सामान्यतोदृष्टादनुमानात्

सूर्येन्दुगतिपरिच्छेदवत्तदवगमो युज्यते, दृष्टान्तेऽपि तस्याध्यक्षतोऽग्रहणात्। न चागमगम्योऽपि, आगमस्यानुमानादभिन्नत्वात्। तथा च घटशब्दप्रयोगोपलब्धावुत्तरत्र घटध्वनिश्रवणादन्वयव्यतिरेकमुखेन घट एवानुमितिरुपजायते। न चेत्थमात्मशब्दः शरीरादन्यत्र प्रयुज्यमानो दृष्टोऽयमात्मशब्दात्प्रतिपद्येमहीति। किञ्च, आगमानामेकत्र्येऽपि परस्परविरोधेन प्रवृत्तेरप्रमाणत्वात्। तथा च

***एतावानेव लोकोऽयं यावानिन्द्रियगोचरः। भद्रे वृकपदं पश्य यद्वदन्ति बहुश्रुताः।***(षड्दर्शनसमुच्चयः-८१)

तथा ***न रूपं भिक्षवः पुद्गल*** इत्याद्यपरैः पुद्गले रूपं निषिध्यते। अमूर्त आत्मा इत्यर्थः। तथा ***अकर्ता निर्गुणो भोक्ता*** इत्यादिश्चान्यः तथा ***स एव अयम् आत्मा ज्ञानमय*** इत्याद्यपर इति। एते सर्वे एव प्रमाणं न भवन्ति। परस्परविरोधेन एकार्थानभिधायकत्वात्। पाटलिपुत्रस्वरूपाभिधायकपरस्परविरुद्धपुरुषव्रातवत्। अतो न विद्मः किमस्ति नास्तीति।

[१३] इति भगवानाह–सौम्य! प्रत्यक्षतोऽप्यात्मा गम्यत एव, तस्य ज्ञानादन्यत्वादनन्यत्वात् तद्धर्मत्वाच्चैतन्यस्य विज्ञानस्य च स्वसंविदितरूपत्वात्। तथा च नीलविज्ञानं मे उत्पन्नमासीदिति स्मृतिदर्शनात्। न चाननुभूतेऽर्थे स्मृतिप्रभवो युज्यते। न च भिन्नं ज्ञानं आत्मनः, प्रमात्रन्तरवद् विवक्षितप्रमातुः संवेदनानुपपत्तेः। न च स्वात्मनि क्रियाविरोधः, प्रदीपवत्तस्य स्वपरप्रकाशकत्वात्। इत्थं तावद् भवतोऽपि अयमनन्तपर्यायात्मकत्वात् ज्ञानदेशावभासित्वात् प्रदीपप्रदेशोद्योतितघटवद् देशतः प्रत्यक्ष एव। ज्ञानावरणीयाद्यशेष-प्रतिबन्धकापगमसमनन्तराविर्भूतकेवलज्ञानसम्पदां सर्वप्रत्यक्ष इति।

अनुमानगम्योऽप्ययम्, विद्यमानभोक्तृकमिदं शरीरं भोग्यत्वाद् ओदनादिवत्। व्योमकुसुमं विपक्ष इत्यनुमानम्। न च लिङ्ग्यविनाभूते लिङ्गोपलम्भव्यतिरेकेण अनुमानस्यैकान्ततोऽप्रवृत्तिः, हसितादिलिङ्गविशेषस्य ग्रहाख्यलिङ्गाविनाभावग्रहणमन्तरेणापि ग्रहगमकत्वदर्शनात्। न च देह एव ग्रहो येनान्यदेहदर्शनमविनाभावग्रहणनियामकं भवतीति। आगमगम्यता चास्याभिहतैवेत्यलं विस्तरेण॥१॥

[१४] तथा प्रत्यक्षानुमानागमगोचरातीतं चैतदमूर्तस्य चात्मनो मूर्तकर्मणा संयोग इति। कथं वामूर्तस्य सतो मूर्तकर्मकृतावुपघातानुग्रहौ स्याताम्? इति। लोकतन्त्रान्तरेषु च कर्मसत्ता गीयते। ***पुण्यः पुण्येन*** इत्यादावतो न विद्मः किमस्ति नास्तीति।

[१५] भगवानाह-सौम्य! इत्थं चैतदङ्गीकर्तव्यम्। यतो नाकर्मणः कर्तृत्वं युज्यते, प्रवृत्तिनिबन्धनाभावादेकान्तशुद्धत्वाद् गगनवत्। इतश्च अकर्म नारभते एकत्वात्, एकपरमाणुवत्। न च शरीरवानीशानः खल्वारम्भको युज्यते। तस्य स्वशरीरारम्भे अप्युक्तदोषानतिवृत्तेः। न चान्यस्तच्छरीरारम्भाय व्याप्रियते। शरीरित्वाशरीराभ्यां तस्याप्यारम्भकत्वानुपपत्तेः। न च शुद्धस्य देहकरणेच्छा युज्यते। तस्या रागविकल्पत्वात्। तत् स्यात्कर्म, स द्वितीयः पुरुषः कर्तेति। न च तत्कर्म प्रत्यक्षादिप्रमाणगोचरातीतम् अतत्प्रत्यक्षत्वात् त्वत्संशयवत्। भवतोऽप्यनुमानगोचरत्वात्।

तच्चेदमनुमानम्–शरीरान्तरपूर्वकं बालशरीरं इन्द्रियादिमत्त्वाद् युवशरीरवत्। न च जन्मान्तरातीतशरीरपूर्वकमेवेदम्, तस्यान्तरालगतावभावेन तत्पूर्वकत्वानुपपत्तेः। न चाशरीरिणो

नियतगर्भदेश-स्थानप्राप्तिपूर्वकः शरीरग्रहो युज्यते, नियामककारणाभावात्। न च स्वभाव एव नियामको वस्तुविशेषः, कारणवस्तुधर्म-विकल्पानुपपत्तेः। स्वभावो हि वस्तुविशेषो वा स्यादकारणता वा वस्तुधर्मो वा? न तावत् वस्तुविशेषोऽप्रमाणकत्वात्।

किञ्च, स मूर्तो वा स्यादमूर्तो वा? यदि मूर्तः, कर्मणोऽस्य च न कश्चिद्भेदः, कर्मैव सञ्ज्ञान्तरवाच्यं तत्। अथामूर्तः, न तर्हि नियामको देहकारणं वा, अमूर्तत्वाद् गगनवत्। तथा हि–नामूर्तत्वान्मूर्तप्रसूतिरस्ति। न चाकारणतास्वभावः, कारणाभावस्य अविशिष्टत्वाद्युगपदशेषदेशसम्भव-प्राप्तेः। अकारणताविशेषाभ्युपगमे च तद्भावप्रसङ्गः। न च वस्तुधर्मस्वभावः, आत्माख्यवस्तुधर्मत्वेन अमूर्तत्वाद् गगनवत्तस्य देहादिकारणत्वानुपपत्तेः। मूर्तवस्तुधर्मत्वे पुनरसौ न पुद्गलपर्यायमतिवर्तते। कर्मापि च पुद्गलपर्यायानन्यरूपमेवेत्यपि प्रतिपत्तिरिति। तस्मात् यच्छरीरपूर्वकं बालशरीरं तत्कार्मणमिति।

आगमगम्यं चैतत् ***पुण्यः पुण्येन पापः पापेन कर्मणा*** इत्यादि श्रुतिवचनप्रामाण्यात्। तथा अमूर्तस्याप्यात्मनो विशिष्टपरिणामवतो मूर्तकर्मपुद्गलसम्बन्धो विरुद्ध एव। आकाशस्येव घटादिसंयोग इति। तथा अमूर्तस्यापि मूर्तकृतावुपघातानुग्रहावविरुद्धौ,विज्ञानस्य मदिरापानौषधादिभिः उपघातानुग्रहदर्शनादित्यलं प्रसङ्गेन॥२॥

[१६] तृतीयः प्राह-भूतसमुदायमात्रधर्मता चेतनायास्तत्रैवोपलब्धेर्गौरतादिवदिति। तथा प्रत्यक्षादिप्रमाणगोचरातिक्रान्तश्च देहातिरिक्त आत्मेति। भगवानाह-तत्रैवोपलब्ध्या हेतुभूताया चेतनायाः शरीरधर्मतानुमानं युज्यते। तद्धर्मतया तत्रोपलम्भासिद्धेः। न च तस्मिन् सत्येवोपलम्भस्तद्धर्मत्वानुमानायालम्, व्यभिचारदर्शनात्। यतः स्पर्शे सत्येव रूपादय उपलभ्यन्ते न तद्धर्मता तेषामेवेति। तस्माच्छरीरातिरिक्तात्माख्यपदार्थधर्मश्चेतनेति। देशप्रत्यक्षस्यायमवग्रहानां स्वसंवेद्यत्वात्।

अनुमानगम्योऽपि तच्चेदम्-देहेन्द्रियातिरिक्त आत्मा तद्विगमेऽपि तदुपलब्धार्थानुस्मरणात्। पञ्चवातायनोपलब्धार्थानुस्मर्तृदेवदत्तवत्। आगमगम्यता त्वस्य प्रसिद्धैवेति॥३॥

[१७] चतुर्थः प्राह-भूताभाव एव युक्त्युपपन्नः तेषां प्रमाणतोऽग्रहणात्। तथा हि–चक्षुरादिविज्ञानस्यालम्बनं परमाणवो वा स्युः परमाणुसमूहो वा? न तावदणवो विज्ञानेऽप्रतिभासनात्। नापि समूहो भ्रान्तत्वाद् द्विचन्द्रवत्। भ्रान्तता चास्य समूहिभ्यः तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वादतः कुतो भूतसत्तेति?

[१८] भगवानाह-सौम्य! न चक्षुरादिविज्ञाने परमाणवोऽवभासन्ते, तेषां तुल्यातुल्यरूपत्वात्। तुल्यरूपस्य च विज्ञाने प्रतिभासनात्। न च तुल्यरूपं नास्त्येव, तदभावे खल्वेकपरमाणुव्यतिरेकणान्येषामणुत्वाभावप्रसङ्गात्। न च तदन्यव्यावृत्तिमात्रं परिकल्पितमेव, स्वरूपाभावेऽन्यव्यावृत्तमात्रतायां तस्य खपुष्पकल्पत्वप्रसङ्गात्। तथा चाशेषपदार्थव्यावृत्तमपि खपुष्पं स्वरूपाभावान्न सत्तां धारयति। न च तद्रूपमेव सजातीयेतरासाधारणं तदन्यव्यावृत्तेः। तस्य तेभ्यः स्वभावभेदेन व्यावृत्तेः। स्वभावभेदानभ्युपगमे च सजातीयेतरभेदानुपपत्तेः। सजातीयैकान्तव्यावृतौ च विजातीयव्यावृत्तावनणुत्वाभावप्रसङ्गभावे च तुल्यरूपसिद्धिरिति। न चेयमनिमित्ता

तुल्यबुद्धिर्देशादिनियमेनोत्पत्तेः। न च स्वप्नबुद्ध्या व्यभिचारः। तस्या अपि अनेकविध निमित्तबलेनैव भावाद्। आह च भाष्यकारः-***अणुभूयदिट्ठे**ति*। न च भूताभावे स्वप्नास्वप्नगन्धर्वपुरपाटलिपुत्रादिविशेषो युज्यते। न च आलयविज्ञानगतशक्तिपरिपाक-समनन्तरोपजातविकल्पविज्ञानसामर्थ्यमस्याबुद्धेः कारणम्, स्वलक्षणादस्वलक्षणानुत्पत्तेः। नापि पारम्पर्येण तदुत्पत्तिर्युज्यते, स्वलक्षणसामान्यलक्षणातिरिक्तवस्तुभावे न पारम्पर्योपपत्तेः। बाह्यनीलाद्यभावेन शक्तिविपाकनियमो न युज्यते, नियामकसहकारिकारणाभावात्।

[१९] किञ्च, आलयती(येत्या?)त्यादिसंवेदनजननशक्तयो भिन्ना वा स्युरभिन्ना वा? यद्यभिन्नाः सर्वैकत्वप्रसङ्गः, एकालयाभेदान्यथानुपपत्तेः। ततश्च कुतस्तासां पीतादिप्रतिभासहेतुता? प्रयोगश्च–नीलविज्ञानहेतुतया परिकल्पिता शक्तिर्न तद्धर्मा शक्त्यन्तररूपत्वात् शक्यन्तरस्वात्मवत्। अथ भिन्नास्तथाप्यवस्तुसत्यो वा स्युर्वस्तुसत्यो वा? यद्यवस्तुसत्यः समूहवत्कुतः प्रत्ययत्वम्? अथ वस्तुसत्यो बाह्यार्थः केन वार्यते? इत्येवमणूनां तुल्यरूपग्रहणम्, तदाभासज्ञानोत्पत्तेः। न च विषयबलोपजातसंवेदनाकारस्य विषयाद्भेदाभेदविकल्पद्वारेणानुपपत्तिर्भाव्या, विशिष्टपरिणामोपेतार्थसन्निधौ आत्मनः कालक्षयोपशमादि-सव्यप्रेक्षस्य नीलादिविज्ञानमुत्पद्यते तथा परिणामाद्। इत्थं चैतदङ्गीकर्तव्यम् अन्यथा नीलात्संवेदनात् नीलसंवेदनान्तरानुत्पत्तिः, प्रागुपन्यस्तविकल्पयुगलकसम्भवादित्येवं परमाणुतुल्यरूपग्रहोऽविरुद्धः। अतुल्यरूपं तु योगिगम्यत्वाद् विशिष्टक्षयोपशमाभावात् सर्वथा न परिगृह्यते। न च परमाणूनां बहुत्वेऽपि विशेषाभावाद् घटशरावादिबुद्धेस्तुल्यत्वप्रसङ्गः, विशेषाभावस्यासिद्धत्वात्। तथा च परमाणव एव विशिष्टपरिणामवन्तो घटन्ति। न च परमाणुसमुदायातिरिक्तानि भूतानीति॥४॥

[२०] पञ्चमः प्राह-पुरुषो मृतः सन् पुरुषत्वमश्नुते पुरुषत्वमेव प्राप्नोतीत्यर्थः। तथा पशवो गवादयः पशुत्वमेवेति कारणानुरूपं हि कार्यमुत्पद्यते। न शालिबीजाद्गोधूमाङ्कुरप्रसूतिरिति। भगवानाह-न नियमतः कारणानुरूपं कार्यम् उत्पद्यते। वैसदृश्यस्यापि दर्शनात्। तद्यथा-शृङ्गाच्छरो जायते। तस्मादेव सर्षपात्तुलिमात्तृणानीति। तथा गोलोमाविलोमभ्यो दूर्वेति। अथवा कारणानुरूपकार्यपक्षेऽपि भवान्तरवैचित्र्यमस्य युक्तमेव। यतो भवाङ्कुरबीजमात्मकं कर्म तच्च तिर्यङ्नरनारकामराद्यायुष्कादिभेद-भिन्नत्वात् चित्रमेव। अतः कारणवैचित्र्यादेव कार्यवैचित्र्यमिति वस्तुस्थित्या तु सौम्य! न किञ्चिदिहलोके परलोके वा सर्वथा समानमसमानं वास्ति। तथा चेह युवा निजैरप्यतीतानगतैर्बालवृद्धादिपर्यायैः सर्वथा न समानोऽवस्थाभेदग्रहणात्, नापि सर्वथाऽसमानः सत्ताद्यनुगमदर्शनात्। एवं परलोकेऽपि मनुजो देवत्वमापन्नो न सर्वथा समानोऽसमानो वा। इत्थं चैतदङ्गीकर्तव्यम्, दानदयादीनां वैयर्थ्यप्रसङ्गादिति॥॥५॥

[२१] षष्ठः प्राह-बन्धो हि जीवकर्मसंयोगलक्षणः स आदिमान् आदिरहितो वा स्यात्? यदि प्रथमो विकल्पस्ततः किं पूर्वमात्मनः प्रसूतिः पश्चात्कर्मणः, उत पूर्वं कर्मणः पश्चादात्मनः, आहोस्विद्युगमपदुभयस्येति? किं चातः? न तावत्पूर्वमात्मनः प्रसूतिर्युज्यते, निर्हेतुकत्वाद् व्योमकुसुमवत्। सापि(नापि) कर्मणः प्राक्प्रसूतिः, कर्तुरभावात्। न चाकृतं कर्म भवति। युगपत्प्रसूतिरपि अकारणत्वादेव न

युज्यते। न चादिमत्यपि आत्मनि बन्धो युज्यते, बन्धकारणाभावाद् गगनस्येव। इत्थं चैतदङ्गीकर्तव्यम्, अन्यथा मुक्तस्यापि बन्धप्रसङ्गः। तथा च सति नित्यमुक्तत्वान्मोक्षानुष्ठानवैयर्थ्यम्।

एष द्वितीयः पक्षः। तथापि नात्मकर्मवियोगो भवेद्, अनादित्वाद् आत्माकाशसंयोगवद् इति। न चानादित्वात्संयोगस्य वियोगाभावः। यतः काञ्चनोपलयोः संयोगोऽनादिसङ्गतोऽपि क्षारमृत्पुटपाकादिद्रव्यं संयोगोपायतो विघटते। एवं जीवकर्मणोरपि ज्ञानदर्शनचारित्रयोगोपायाद्वियोग इति। न चानादित्वात् सर्वस्य कर्मणो जीवकृतत्वानुपपत्तिः, यतो वर्तमानात्मतया मिथ्यादर्शनादिसव्यपेक्षात्मोपात्तं कृतमित्युच्यते। सर्वं वर्तमानत्वेन मिथ्यादर्शनादिसव्यपेक्षात्मोपात्तं कर्मानादि च कालवत्। यथाहि यावानतीतः कालस्तेन अशेषेण वर्तमानत्वमनुभूतमथ वा(चा)सावनादिरिति। न चामूर्तस्य मूर्तसंयोगो न घटते, घटाकाशसंयोगदर्शनाद् इति। वियोगस्तु दर्शित एव। न च मुक्तस्यापि कर्मयोगस्तस्य कषायादिपरिणामाभावात् कषायादियुक्तश्च जीवः कर्मणो योग्यान् पुद्गलानादत्त इति। न चेत्थं भव्योच्छेदप्रसङ्गः, अनागतकालवत्तेषामनन्तत्वात्। न च परिमितक्षेत्रे तेषामवस्थानाभावोऽमूर्तत्वात्।
प्रतिद्रव्यमनन्तकेवलज्ञानदर्शनसम्पातवन्नर्तकीनयनविज्ञानसम्पातवद्वेति॥६॥

[२२] सप्तमः प्राह-नारकाः संक्लिष्टासुरपरमाधार्मिकायत्ततया कर्मवशतया च परतन्त्रत्वात् स्वयं च दुःखसन्तप्तत्वाद् इहागन्तुमशक्ता एवास्माकमप्यनेन शरीरेण तत्र कर्मवशतयैव गन्तुमशक्तत्वात् प्रत्यक्षीकरणोपायासम्भवादगम्या एव श्रुतिस्मृतिग्रन्थेषु श्रूयमाणाः श्रद्धेया भवन्तु। ये पुनर्देवाः स्वच्छन्दचारिणः कामरूपाः प्रकृष्टदिव्यप्रभावा इहागमनसामर्थ्यवन्तस्ते किमितीह नागच्छन्ति? यतो न दृश्यन्तेऽतो न सन्ति ते, अस्मदाद्यप्रत्यक्षत्वात्, खरविषाणवत्।

[२३] भगवानाह-परमार्थचिन्तायां सन्ति देवा मत्प्रत्यक्षत्वात्, मनुष्यवत्, भवतोऽप्यागमाच्च। सर्वथा सर्वमनित्यं मायोपमम्, न तु देवनास्तित्वपराणि वेदवाक्यानीति। तथा स्वच्छन्दचारिणोऽपि चामी यदिह नागच्छन्ति तत्रेदं कारणम्-नागच्छन्तीह सदैव सुरगणाः सङ्क्रान्तदिव्यप्रेमत्वाद्, विषयप्रसक्तत्वात्, प्रकृष्टरूपगुणस्त्रीप्रसक्तविच्छिन्नरम्यदेशान्तरगतमनुष्यवत्। तथाऽसमाप्तकर्तव्यत्वात् बहुकर्तव्यताप्रसाधनप्रयुक्तविनीतपुरुषवत्। तथाऽनधीनाधीनमनुजकार्यत्वाद् अनभिमतगेहादौ निःसङ्गयतिवद्वेति। तथाऽशुभत्वात् नरभवस्य तद्गन्धासहिष्णुतया नागच्छन्ति, मृतकलेवरमिव हंसा इति। जिनजन्ममहिमादिषु पुनर्भक्तिविशेषाद् भवान्तरानुरागतश्च क्वचिदागच्छन्त्येव। तथा चैते साम्प्रतं भवतोऽपि प्रत्यक्षा एव शेषकालमपि सामान्यतः चन्द्रसूर्यादिविमानाना[मा]लयप्रत्यक्षत्वात् तद्वासिसिद्धिरिति॥

[२४] अष्टमः प्राह-देवा हि चन्द्रार्कादयस्तावत्प्रत्यक्षा एव। अन्येऽपि अ(उ)पयाचितकादिफलदर्शनानुमानतो गम्यन्ते, नारकास्त्वभिधानव्यतिरिक्तार्थशून्याः कथं गम्यन्त इति? प्रयोगश्च न सन्ति नारकाः साक्षादनुमानतो वानुपलब्धेर्व्योमकुसुमवत्। व्यतिरेका देवा इति। भगवानाह-सौम्य! ते हि नारकाः कर्मपरतन्त्रत्वादिहागन्तुमसमर्था भवद्विधानामपि तत्र गमनशक्त्यभावः कर्मपरतन्त्रत्वादेवातो भवद्विधानां तदनुपलब्धिरिति। क्षायिकज्ञानसम्पदुपेतानां तु वीतरागाणां प्रत्यक्षा एव। तेषां सकलज्ञान-युक्तत्वादपास्तसमस्तावरणत्वात्। न चाशेषपदार्थविदः क्षायिकभावस्था न सन्ति। यतो

ज्ञस्वभाव आत्मा ज्ञानावरणीयप्रतिबद्ध-स्वभावत्वान्नाशेषं वस्तु विजानाति। तत्क्षायोपशमजस्तु तस्य स्वरूपाविर्भावविशेषो दृश्यते। तथा च कश्चिद् बहु जानाति, कश्चिद् बहुतरमिति क्षायोपशमिकोऽयं ज्ञानवृद्धिभेद इति। न ह्ययं ज्ञानविशेषः खल्वात्मनस्तद्वत्स्वाभाव्यमन्तरेणोपपद्यते। इत्येवं चापगताशेषावरणस्य ज्ञस्वभावत्वादशेषज्ञेयपरिच्छेदकत्वमिति।

तथा चास्मिन्नेवार्थे लौकिको दृष्टान्तः। यथा हि पद्मरागादिः उपलविशेषो भास्वरस्वरूपोऽपि स्वगतमलकलङ्काङ्कितस्तदा वस्त्वप्रकाशयन्नपि क्षारमृत्पुटपाकाद्युपायतस्तदपाये प्रकाशयति एवमात्मापि ज्ञस्वभावः कर्ममलमलिनः प्रागशेषं वस्त्वप्रकाशयन्नपि सम्यक्त्वज्ञानतपोविशेषसंयोगोपायतोऽपेतसमस्तावरणः सर्वं वस्तु प्रकाशयति, प्रतिबन्धकाभावात्। न चाप्रतिबद्धस्वभावस्यापि पद्मरागवत् सर्वप्रकाशनव्यापाराभावः तस्य ज्ञस्वभावत्वात्। न हि ज्ञेयो ज्ञेये सति बन्धशून्यो न प्रवर्तते। न च प्रकाशकस्वभावपद्मरागेणैव व्यभिचारो भावयितव्यः, तस्य सन्निकृष्टार्थप्रकाशनात्। विप्रकृष्टविषये तु देशे विप्रकर्षणैव प्रतिबद्धत्वादप्रवृत्तिः। न चात्मनोऽपि पद्मरागवत् सर्वत्र देशविप्रकर्ष एवापरिच्छेदहेतुः, तस्यागमगम्येषु सूक्ष्मव्यवहितविप्रकृष्टेषु अखिलपदार्थेष्वधिगतिसामर्थ्यदर्शनात्। तथा च परमाणुमूलकीलोदकामरलोकचन्द्रोपरागादिपरिच्छेदसामर्थ्यमस्यागमोपदेशतः क्षायोपशमतोऽपि दृश्यते। एवं साक्षात्कारि क्षायिकमपि प्रतिपत्तव्यमित्येवं क्षायिकज्ञानवतां नारकाः प्रत्यक्षा एव।

भवतोऽप्यनुमानगम्यास्तच्चेदम्-विद्यमानभोक्तृकं प्रकृष्टपापफलं कर्मफलत्वात्पुण्यफलवत्। न च तिर्यङ्नरा एव प्रकृष्टपापफलभुजस्तस्यौदारिकशरीरवता वेदयितुमशक्यत्वाद् अनुत्तरसुरजन्मनिबन्धनप्रकृष्टपुण्यफलवत्। तथा चागमगम्याश्च ते। यत एवमागमः-

[२५] *सततानुबद्धमुक्तं दुःखं नरकेषु तीव्रपरिणामम्। तिर्य[ग्श्वानां]भयक्षुत्तृडादिदुःखं सुखं चाल्पम्॥*
*सुखदुःखे मनुजानां मनःशरीराश्रये बहुविकल्पे। सुखमेव सुदेवानामल्पं दुःखं तु मनसि भवम्॥*

[२६] नवमः प्राह–पुण्यपापास्तित्वविषये दर्शनविप्रतिपत्तिः। तत्र केषाञ्चिद्दर्शनं पुण्यमेवैकमस्ति, न पापम्। तदेव-अवाप्तप्रकर्षावस्थं स्वर्गोऽपक्षीयमाणं तु मनुष्यतिर्यङ्नरकादिभवफलाय, तदशेषक्षयाच्च मोक्ष इति। यथात्यन्तपथ्याहारसेवनाद् उत्कृष्टमारोग्यसुखं भवति। किञ्चित्किञ्चित्पथ्याहारपरिवर्जनाच्च आरोग्यसुखहानिरशेषाहारपरिक्षयाच्च सुखाभावकल्पोऽपवर्गः। अन्येषां तु पापमेवैकं न पुण्यमस्ति। तदेवोत्तमावस्थामनुप्राप्तं नारकभवायालम्। क्षीयमाणं तु तिर्यङ्नरामरभवायेति,तदत्यन्तक्षयाच्च मोक्ष इति। यथात्यन्तः पथ्याहारसेवनात्परमनारोग्यम्। तस्यैव किञ्चित्किञ्चिदपकर्षाद् आरोग्यसुखमशेषपरित्यागात् मृतिकल्पो मोक्ष इति। अन्येषां तूभयमप्यन्योऽन्यानुविद्धस्वरूपकल्पं सन्मिश्रसुखदुःखं फलहेतुभूतम् इति। तथा च किलमनैकान्त(किल न एकान्तेन)संसारिणः सुखं दुःखं वास्ति, देवानामपीर्ष्यादियुक्तत्वान्नारकाणामपि च पञ्चेन्द्रियत्वानुभवाद्, इत्थम्भूतपुण्यपापाख्यवस्तुक्षयाच्चापवर्ग इति। अन्येषां तु स्वतन्त्रमुभयं विविक्तसुखदुःखकारणं तत्क्षयाच्च निःश्रेयसावाप्तिरिति। अतो दर्शनानां परस्परविरुद्धत्वादप्रमाणत्वादस्मिन् विषये प्रामाण्याभाव इति।

[२७] भगवानाह–यद्दर्शनानामप्रामाण्यं मन्यसे परस्परविरुद्धत्वादेतदसाम्प्रतम्, एकस्य प्रमाणत्वात्। तथा च पाटलिपुत्रादि स्वरूपाभिधायकाः सम्यक्स्वरूपाभिधायकयुक्ताः परस्परविरुद्धवचसोऽपि न सर्व एवाप्रमाणतां भजन्ते। तत्र यत्प्रमाणं तदप्रमाणनिरासद्वारेण प्रदर्शयिष्यामः। तत्र न तावत्पुण्यमेवापचीयमानं दुःखकारणम्, तस्य सुखहेतुत्वेनेष्टत्वात्, स्वल्पस्यापि स्वल्पसुखनिवर्तकत्वात्। तथा चाणीयसो हेमपिण्डादणुरपि सौवर्ण एव घटो भवति, न मार्तिक इति। न च तदभावो दुःखहेतुस्तस्य निरुपाख्यत्वात्। न च सुखाभाव एव स्वसत्त्वा(त्त्व?)विकलो दुःखम्, तस्यानुभयमानत्वात्। ततश्च स्वानुरूपकारणपूर्विका दुःखप्रकर्षानुभूतिः प्रकर्षानुभूतित्वात्पुण्यप्रकर्षानुभूतिवत्। न च पुण्यलेश एवानुरूपं कारणमस्या इत्येवं दृष्टान्तोऽप्याभासितव्यः। केवलपापपक्षेऽपि विपरीतमुपपत्तिजालमिदमेव वाच्यम्।

नापि तत्सर्वथान्योऽन्यानुविद्धस्वरूपं निरंशं वस्त्वन्तरमेव, सर्वथा सन्मिश्रसुखदुःखाख्यकार्यप्रसङ्गाद्, असदृशश्च सुखदुःखानुभवः, देवानां सुखाधिक्यदर्शनात्, नारकाणां दुःखाधिक्यदर्शनात्। न च सर्वथा सन्मिश्रैकरूपस्य हेतोरल्पबहुत्वभेदेऽपि कार्यस्य स्वरूपेण प्रमाणतोऽल्पबहुत्वं विहाय भेदो युज्यते। न हि मेचककारणप्रभवं कार्यमन्यतमवर्णोत्कटतां बिभर्ति। तस्मात् सुखातिशयस्यान्यन्निमित्तमन्यच्च दुःखातिशयस्येति। न सर्वथैकस्य सुखातिशयनिबन्धनांशवृद्धिर्दुखातिशयक्षयकारणांशहान्या सुखातिशयप्रभवाय कल्पयितुं न्याय्या, अभेदप्रसङ्गात्। तथा च यद्वृद्धावपि यस्य वृद्धिर्न भवति तत्ततोऽभिन्नं प्रतीतमेवं सर्वथैकस्वरूपता पुण्यपापयोर्न घटते। कर्मसामान्यतया त्वविरुद्धावपि यतः ***सात[१] सम्यक्त्वहास्यरतिपुरुषवेदशुभायुर्नामगोत्राणि पुण्यम्[२] अन्यत्पापम्।*** इति। सर्वं चैतत्कर्म। तस्माद्विभक्ते पुण्यपापे स्त इति संसारिणश्च सत्त्वस्यैतदुभयमस्ति। किञ्चित्कस्यचिदुपशान्तं किञ्चित्क्षयोपशमतामुपगतं किञ्चित्क्षीणं किञ्चिदुदीर्णम्। अत एव च सुखदुःखातिशयवैचित्र्यं जन्तूनामिति॥९॥

[२८] दशमः प्राह–भूतसमुदायधर्मत्वाच्चैतन्यस्य कुतो भवान्तरगतिलक्षणपरलोकसम्भव इति ? तद्विघाते चैतन्यविनाशात्। तथा सत्यप्यात्मनि नित्ये वा कुतः परलोकः? तस्यात्मनोऽप्रच्युतानुत्पन्नस्थिरैकस्वभावत्वाद् विभुत्वाद्। तथा निरन्वयविनश्वरस्वभावे अप्यात्मनि कारणक्षणस्य सर्वथाऽभावोत्तरकालमिहलोकेऽपि क्षणान्तराप्रभवः कुतः परलोक इति?

[२९] भगवानाह– न भूतसमुदायश्चैतन्यं क्वचित्सन्निकृष्टदेहोपलब्धावपि चैतन्यसंशयात्। न च धर्मिग्रहणे धर्माग्रहणं युज्यते। इतश्च देहादन्यच्चैतन्यं चलनादिचेष्टानिमित्तत्वात्। इह यद्यस्य प्रचलनादिचेष्टानिमित्तं तत्ततोऽभिन्नं दृष्टम्। यथा मारूतः पादपाद् इति। ततश्चैतन्यस्यात्मधर्मत्वात्तस्य चानादिमत्कर्मसन्ततिसमालिङ्गितत्वात्,उत्पादव्ययध्रौव्ययुक्तत्वात्। कर्मपरिणामापेक्षमनुष्यादिपर्याय-निवृत्त्या देवादिपर्यायान्तरावाप्तिरस्य अविरुद्धेति, नित्यानित्यैकान्तपक्षोक्तदोषानुपपत्तिश्चात्रानभ्युपगमाद् इति॥१०॥

---

[१] सद्वेद्य इति मु.

[२] त.सू.८.२६

[३०] अथैकादशः प्राह– संसाराभावो मोक्षः। संसारश्च तिर्यङ्नरनारकामरभवरूपः तद्भावानतिरिक्तश्चात्मा। ततश्च तदभावे चात्मनोऽप्यभाव एवेति कुतो मोक्ष इति?

[३१] भगवानाह– न संसाराभावे तदव्यतिरिक्तत्वादात्मनोऽप्यभावो युज्यते। तस्यात्मपर्यायनिवृतौ पर्यायिणः सर्वथा निवृत्तिरिति। तथा च हेमकुण्डलयोरनन्यत्वम्, न च कुण्डलपर्यायनिवृतौ हेम्नोऽपि सर्वथा निवृत्तिः तथानुभवाद्। इत्थं चैतदङ्गीकर्तव्यम् अन्यथा पर्यायनिवृतौ पर्यायिणः सर्वथानिवृत्त्यभ्युपगमे पर्यायान्तरानुपपत्तिः प्राप्नोति। कारणाभावात् तदभावात्, तदभावस्य च सर्वथा विशिष्टत्वात् तस्मात्संसारनिवृत्तावप्यात्मनो भावाद् वस्तुरूपो मोक्ष इति॥

**॥इति किञ्चिद्गणधरवादः॥**

## ॥केवलज्ञानसिद्धिः॥

[१] केवलज्ञानसिद्धौ प्रमाणम्। अस्ति समस्तवस्तुगोचरं विशदं प्रत्यक्षं दर्शनं तद्गोचरानुमानप्रवृत्तेः। यद्गोचरमनुमानं प्रवर्तते तद्ग्राहकं प्रत्यक्षमपि भवति, यथाग्नेः। अस्ति च सर्वार्थविषयमनुमानं तस्मात् तद्विषयेण विशदप्रत्यक्षदर्शनेनापि भाव्यम्। सर्वार्थेषु स्थित्युदयापवर्गसंसर्गविषयमिदमनुमानम्। इह यदस्ति तत्सर्वं स्थित्युदयापवर्गसंसर्गमनुभवति वस्तुत्वात्। यथा अङ्गुलित्ववक्रत्वऋजुत्वापेक्षयाङ्गुलिः स्थित्युदयापवर्गसंसर्गमनुभवति वस्तुवदस्ति तस्मात् प्रस्तुत त्रयाक्रान्तं तदगन्तव्यम्। तथा सम्भवत्समस्तशुद्धिक आत्मा विद्यामानशुद्ध्युपायत्वात्। यद्यद्विद्यमानशुद्ध्युपायं तत्समस्तसम्भवत्समस्तशुद्धिकं यथा विद्यमानक्षीरमृत्पुटपाकादिशुद्ध्युपायो रत्नविशेषः। तथा च विद्यमानज्ञानाद्यभ्यासशुद्ध्युपाय आत्मा अतः सम्भवत्समस्तशुद्धिकः। सामस्त्यशुद्धश्च आत्मा ज्ञानज्ञानिनोरभेदात् केवलमभिधीयते इति। **(शं)** ज्ञानाद्यभ्यासः कथं विशुद्धिकारणमिति **चेत्**, आवरणमलप्रतिपक्षरूपत्वादिति ब्रूमः। **(शं)** प्रतिपक्षरूपता कथमवधारितेति **चेत्**, तथैव दर्शनात्। तथा हि– ज्ञानाद्यभ्यासतः प्रतिक्षणमावरणविलयो विशिष्टविशिष्टतरतत्कार्यबोधाद्यनुभावात्, तदतिशये पुनः सामस्त्योच्छेदः स्यात् इत्यभिदध्महे। **एतेन यत्परे प्रोचु**र्यथा प्रत्यक्षादिप्रमाणपञ्चकगोचरातिक्रान्तत्वात् सर्वार्थसंवेदनम् अभावाख्यप्रमाणगोचरतां प्रतिपद्यते **तदयुक्तम्**, तत्सम्भवस्यानुमानेन प्रतिपादनात्, प्रमाणपञ्चकप्रवर्तनाभावात् सिद्धेः।

[२] किञ्च, प्रमाणपञ्चकं तद्गोचरं न प्रवर्तते इति कथं भवतो निर्णयः? किं नियतदेशकालव्याप्त्या, यद्वा समस्तकालस्कन्दनेनेति? तत्र यद्याद्यः पक्षस्ततो यथा घटादेः क्वचित् प्रमाणपञ्चकं तदगोचरं निवर्तमानमभावं साधयत्येव समस्तवस्तुसंवेदनगोचरमपि तन्निवर्तमानं नियतदेशदशावच्छिन्नमभावं साधयेत्, न सर्वत्र। ततश्च घटादिवत्तद् दुर्निवारं स्यात्। अथ द्वितीयः पक्षोऽसावप्यसम्भव्येव समस्तदेशकालवर्तिपुरुषसम्भवानभ्युपगमाद्, इतरथा य एव कश्चिन्निश्चित्यैवम् अभिदध्यात् स एव समस्तवस्तुविस्तारव्यापिज्ञानालोक इति समस्तार्थसंवेदनसिद्धिः॥

**॥इति केवलज्ञानसिद्धिः॥**

## ॥एकान्तनित्यानित्यवादभङ्गः॥

**[१]** इह हि एकान्तनित्यानित्यवस्तुवादी तीर्थान्तरीयाभिमतसर्वज्ञस्य सद्भूतवस्तुवादित्वं न जाघटीति। तथा हि– ये तावद् एकान्तनित्यं वस्त्विति प्रतिपन्नाः तैरनित्यत्वं वस्तुनो नाभ्युपगतम्। येऽप्येकान्तानित्यमित्यभ्युपगतास्ते(स्तैः) नित्यत्वं न प्रतिपन्नम्। न चैतद् युज्यते, यतो वस्तुन्यर्थक्रियार्थिभिरर्थक्रियासमर्थान्यभ्युपगतानि। न चैकान्तनित्यमनित्यं वा वस्तु अर्थक्रियासमर्थम्, यतोऽर्थक्रियां कुर्वन् पदार्थः क्रमेण वा कुर्याद् यौगपद्येन वा? क्रमेणापि कुर्वन् सहकारिकारणस्य सापेक्षो निरपेक्षो वा? तत्र न तावत् नित्यस्तन्निरपेक्षः क्रमेणार्थक्रियां करोति, यतः क्रमेणार्थक्रियाकरणमेकक्रियानन्तरं क्रियान्तरकरणम्। तच्च नित्यस्यैकस्वभावत्वात् न युज्यते, यतो यस्मिन् क्षणे प्रथमक्रियाकरणस्वभावो भावानां न तस्मिन् द्वितीयादिक्षणकर्तव्यक्रियाभावः। तत्स्वभावत्वे हि प्रथमक्षणवर्तिक्रियाकरणवत् द्वितीयादिक्षणवर्तिप्रसङ्गात्। तथा च युगपत्समस्तक्रियाकरणाद् यौगपद्यपक्ष एव कक्षीकरणीयः। तत्र च युगपत् सकलक्रियाकरणात् क्रियादुत्तरकालमनर्थक्रियाकारित्वादवस्तु{प}प्रसङ्गः।

नापि सहकारिकारणसापेक्षः क्रमेण नित्योऽर्थोऽर्थक्रियां करोति, यतः सहकारिकारणान्यपि नित्यानि स्युरनित्यानि वा ? नित्यान्यपि क्रमेणोपकारकरणस्वभावान्यन्यथा वा ? न तावन्नित्यानि क्रमेणोपकरणीयोपकरणस्वभावानि, उपकार्यस्योपकारकस्य च नित्यतयैकस्वभावत्वात् क्रमकरणस्य च द्विस्वभावनियतत्वात्। नापि युगपन्नित्यान्यन्योपकारकरणप्रवणानि, युगपद् उपकारकरणक्रियाविरतावस्तुत्वप्रसङ्गात्। नाप्यनित्यानि क्रमेणोपकारकरणस्वभावानि, यतः स उपकार उपकर्तव्यस्वभावानभिभावुकोऽभ्युपगतव्योऽन्यथा उपकारकत्वायोगात्। ततश्च नित्यस्यानुपकर्तव्यस्वभावतया नित्यान्यपि उपकारकारकानि न युज्यन्ते किं पुनरनित्यानि क्रमेणोपकारकरणस्वभावानि नित्यस्वभावानि भावुकानि ? तथा हि-सहकारिभिः स(उ)पकारिभिः उपकारस्तस्य नित्यस्य विधीयमानः किं व्यतिरिक्तो विधीयतेऽव्यतिरिक्तो वा ? न तावत् व्यतिरिक्तो, व्यतिरिक्ते हि उपकारे भावस्यानुपकृतत्वान्न तदुपकारकरणार्थक्रिया ततः स्यात्, तत्सम्बन्धित्वेन उपकारस्य करणात्। (प्र.) उपकारेण सम्बन्धादर्थक्रिया ततो भविष्यतीत्यपि **वक्तुं न शक्यते**, यतो व्यतिरिक्तेऽस्य सम्बन्धः कार्यकारणभावः। स च नित्यस्योपकारेण नास्ति, उपकारस्य स्वकारणैरेव जनितत्वात्। न च जनितस्यापि जननम्, अतिप्रसङ्गात्। तस्मादव्यतिरिक्ते {तु} एवोपकारोऽभ्युपगन्तव्यः। अव्यतिरिक्ते चोपकारेऽनित्यैः सहकारिभिः सञ्जनिते नित्यस्याप्यनित्यस्वभावापत्तेः नित्यस्वभावाभावो भवेत्। नापि युगपत्, तथात्वे हि क्रियाविरतावभावत्वप्रसङ्गात्। तन्न नित्यं वस्तु अर्थक्रियासमर्थम् इति।

[२] नाप्यनित्यम्, यतोऽनित्यमप्यर्थक्रियां कुर्वत्क्रमेण कुर्याद्यौगपद्येन वा? न तावत् क्रमेण, यतः क्रमो ह्येकक्रियाकरणानन्तरं द्वितीयकरणं तच्चोत्पत्तिसमयसमनन्तरध्वस्ते न युज्यते एकस्यैककर्तुः, एककरणानन्तरं द्वितीयं करोति इति व्यवहारदर्शनात्। न हि भिन्नस्य तथा हि भेदे व्यवहारो अन्यथा दृश्यते-इदमनेनाद्यं निष्पादितम्, इदं द्वितीयमनेनेति। क्षणिकत्वे नैकत्वम्, वस्तुनः समुत्पत्ति-समनन्तरमेव ध्वंसात्। विनष्टस्य चार्थक्रियापि न सम्भवति, किं पुनरेककरणानन्तरं द्वितीयकरणम् ? येन क्रमेण तत्रार्थक्रिया स्यात्।

[३] **अथ** एकस्यैककरणानन्तरं द्वितीयकरणमिति भ्रान्तोऽयं व्यवहारः। सदृशापरापरोत्पत्तिदर्शनविप्रलब्धबुद्धी(द्धि)र्न पारमार्थस्तु तेन क्रमेणैकं किञ्चिद्, ए{ते}ककार्यकर्तृभिन्नानामेव भिन्नकार्यकर्तृत्वात्, **तदयुक्तम्,** यतो ज्ञाननिबन्धनोऽयं व्यवहारः। न च क्षणिकस्य ज्ञानस्यैवंरूपव्यवहारनिरूपणनिपुणता। तथा हि ग्राह्यस्य ग्राहकस्य च निरन्वयविनाशे सति यत्प्रथमक्षणभाविरूपं न तद् द्वितीयादिक्षणेष्वस्तीत्यभ्युपगम्यते। ततश्च प्रथमक्षणभाविरूपग्राहकस्य ज्ञानस्य द्वितीयादिक्षणभाविभावरूपसमयेऽभावात्। प्रथमक्षणे च द्वितीयादिक्षणभाविनामभावात् कस्तत्र सदृशापरापरोत्पत्तिदर्शनेन विप्रलम्भः ? तस्माद् भवतामेवाननुभूतार्थवादिनां युक्तिरिक्तवचसां भ्रम इति।

[४] नापि यौगपद्येन, यतो यौगपद्यं युगपत्कर्तृत्वं तच्चैककालमनेककर्तृत्वम्। न चैकस्वभावस्य भावस्य तद् युज्यते। तथा हि–भावः कार्यं कुर्वन् येनैव स्वभावेनैकं कार्यं करोति द्वितीयमपि तेनैव स्वभावान्तरेण वा ? यदि तेनैव कथं कार्यभेदः ? कारणस्वभावनिबन्धनत्वात् कार्यभेदस्य। **न च वाच्यं** सहकारिसामग्रीभेदात् कार्यभेद इति, **(स)** यतस्तत्राप्ययं पर्यनुयोगस्तदवस्थ एव। तथा हि–यो येनैव स्वभावेनैकसहकारिसामग्र्यां स व्यापपर्ति किं सहकारिसामग्र्यामपि तेनैव स्वाभावान्तरेण वा ? न तावत् तेनैव कार्याभेदप्रसङ्गस्य तादवस्थ्यापत्तेः। न च तत्रापि सामग्र्यन्तरापेक्षा, अनवस्थापत्तेः। अथ स्वभावान्तरेण तदा अनेकस्वभावत्वं भावस्य स्यात्। तथा सामग्रीवैफल्यं च। स्वभावेनैव भिन्नकार्यकरणे समर्थत्वात् केवलमेवमभ्युपगमे क्रियानेकान्तवादापत्तिस्तथा चाभ्युपेतबाधा इति। तदेवं नित्यस्यानित्यस्य चार्थक्रियासमर्थत्वाभावादवस्तुत्वम्, अत्र प्रयोगः-यदर्थक्रियासमर्थं न भवति तदवस्तु, यथा शशविषाणम्, न भवति चार्थक्रियासमर्थमेकान्तेन नित्यमनित्यं वस्त्वित्युपरम्यते॥

**॥एकान्तनित्यानित्यभङ्गः॥अनित्यानित्यवाद[स्थलं] समाप्तम्॥**

## ॥परिणामनित्यतावादः॥

[१] पूर्वापरस्वभावपरिहारावाप्तिलक्षणपरिणामवान् शब्दबुद्धिप्रदीपादिकोऽर्थः। स त्वाज्ञतक्याद्वा यावान् कश्चिद्भावस्वभावः स सर्वः तादृशभावस्वभावविवर्तमन्तरेण न सम्भवति। तथा हि–न तावत् क्षणिकस्य निरन्वयविनाशिनः सत्त्वसम्भवोऽस्ति। स्वाकारानुकारिज्ञानमन्यद्वा कार्यान्तरमप्यात्मानं संहरतः सकलशक्तिविरहितस्य व्योमकुसुमादेरिव सत्त्वानुपपत्तेः, तादृशस्य हि न कार्यकालप्राप्तिः क्षणभङ्गभङ्गप्रसक्तेः। नापि फलसमयमात्मानमप्राययतः तज्जननसामर्थ्यं चिरन्तनविनष्टस्येव सम्भवति। न च समनन्तरभाविनः कार्यस्योत्पादनं कारणं स्वसत्ताकाल एवमाप्नोति सामर्थ्यम्, कार्यकाले तस्य स्वस्वभावाभावाविशेषात्, ततः प्रागपि कार्योत्पत्तिप्रसङ्गात्। तस्मिन् सति अभवन् असति स्वयमेव भवन् अयं भावः, तत्कार्यव्यपदेशमपि न लभेत। न हि समर्थे कारणे प्रादुर्भावमप्राप्नुवन् कार्यमितरद्वा कारणम्, अतिप्रसङ्गात्। न च समनन्तरभावविशेषे(ष)मात्रेण तत्कार्यत्वं समनन्तरभावमात्रेण कार्यत्वे सति क्षणिकत्वमिति, उपचरितं चैवं तस्य कार्यत्वम् इतरस्य च कारणत्वं स्यात् क्षणिकवत्।

[२] तथा हि–तत्कारणभावे सत्यभवन्तं प्रति पुनः कारणस्य भावाभावयोर्न कश्चिद्विशेषः। ततो(ऽ)क्षणिकादिवत् क्षणिकादपि इतरे(र)स्य च कारणत्वं स्यात्। (क्षणिकवत्) मन्वादिर्वस्तुस्वभावो व्यावर्तत एव। न ह्यक्षणिक एव क्रमयोगपद्याभ्याम् अर्थक्रियाविरोधः किं तर्हि क्षणभङ्गेऽपि? तथा हि–न तावत् कार्यकारणयोः क्रमः सम्भवति, कालभेदाद् जन्यजनकभावविरोधात् चिरतरोपरतोत्पन्नपितापुत्रवत्। न हि तादृश्यपेक्षापि सम्भवति अनावेया प्रहेयातिशयत्वाद्(?), अक्षणिकवत्। न हि किञ्चिदतिशयं ततो नासादयन् भावान्तरमपेक्षते यतः क्रमः स्यात्। जन्यजनकयोरा--यविशेषत्वेऽपि समकालं हि न हेतुफलभावः, सव्येतरगोविषाणयोरिव अपेक्षानुपपत्तेः।

[३] अत एव कृतकत्वादयोऽपि हेतवो वस्तुभावापरिणामानभ्युपगमवादिनां न सम्भवन्ति। तथा हि–अपेक्षितपरव्यापारो हि भावः स्वभावनिः(ष्प)न्नो कृतक इति उच्यते। सा च परापेक्षा एकान्तनित्यवद् एकान्तानित्येऽपि असम्भाविनी। तदपेक्षाकारणकृतस्वभावविशेषेण विवक्षितवस्तुनः सम्बन्धोऽपि नोपपदे(द्य)ते स्वभावभेदप्रसक्तेः, अभेदे वापेक्षमाणादपेक्षकस्य सर्वथात्मनि व्यक्तिप्रसङ्गात्।

[४] अथ स्वभावनिष्पन्नयोः प्रत्यस्तमितोपकार्योपकारकभावयोः सम्बन्धस्यानुपपत्तेरस्येदमिति व्यपदेशस्याप्यनुपपत्तिः। यदि पुनरपेक्षमाणस्य तदपेक्षमाणौ न व्यतिरिक्तमुपकारान्तरं क्रियते तत्सम्बन्धव्यपदेशार्थम्, तत्रापि उपकारान्तरं कल्पनीयमित्यनवस्था सकलव्योमतलावलम्बिनी प्रसज्येत। तस्मान्नित्यानित्यपक्षयोरर्थक्रियालक्षणं सत्त्वं कृतकत्वं वा न सम्भवति इति यत्किञ्चित् सत् कृतकं वा तत्सर्वं परिणामिक[म्] इतरथा अकिञ्चित्करस्य अवस्तुत्वप्रसङ्गात् नभस्तल्यारविन्दिनीकुसुमवत् सन् कृतको वा शब्दबुद्धिप्रदीपादिरिति सिद्धः परिणामी॥

॥इति परिणामनित्यतावादः॥